
5
REFERENCE



32453

R REFERENCE ONLY

স্বর্গীয় [illegible] নাথ সেন
"সেন বাড়ী" [illegible]
পোঃ বৈদ্যপুর (বর্দ্ধমান)



FOR REFERENCE ONLY

कुमारसम्भवम् ।

सप्तमसर्गान्तम् ।

महाकविकालिदासविरचितम् ।

मल्लिनाथसूरिकृतव्याख्यायान्वितम् ।

गवर्णमेण्टसंस्कृतविद्यालयस्य-दर्शनव्याकरणाध्यापकपद-
श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्येण
विहितव्याकरणसूत्रार्थयान्वितम् ।

बि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृतं प्रकाशितञ्च ।

चतुर्थसंस्करणम् ।

कलिकातानगरे
सरस्वतीयन्त्रे
मुद्रितम् ।
ई॰ १८८६ ।



32453

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ.

২ নং রমানাথ মজুমদারের ষ্ট্রীট।

প্রিণ্টর—শ্রীক্ষেত্রমোহনমুখোপাধ্যায়

৫৬ নং আমহর্ষ্ট ষ্ট্রীট। কলিকাতা।

REFERENCE ONLY

विज्ञापनम् ।



खलु सकलेषु सुखसाधनेषु काव्यमेव परमसुख-
ादि, मुहुर्मुहुरनुशीलितमपि मनागपि विराग-
तां नैव भजते, बहुसेवनेऽपि न याति चापलीयतां
आस्वाद्यमानं नवां नवां कामपि चमत्कारलहरीं
सचेतसां प्रतिक्षणमातनोति समुल्लासयति च
हृदयसम्पद्मं न चापेक्षते तदास्वादनसम्पादने
यासः ।

ाव्यञ्च विलक्षणरचनोपलक्षितो विविधगुणगुम्फितो
लङ्कारमण्डितो रसभावादिप्रधानो वाक्यविशेषः ।
त्प्रणेतारश्च वाल्मीकिकालिदासादयः प्रथिताः ।
ल्मीक्यादयः इतिवृत्तप्रधानं प्रसक्तो रसानुगुणं
णादिकं, कालिदासादयश्च विविधरसानुगुणं प्रस-
तिवृत्तोल्लेखं रघुवंशादिकं काव्यं रचयामासुः ।
च काव्यं श्रव्यदृश्यभेदात् द्विविधम् । तत्र रामा-
घुवंशादिकं श्रव्यं, नागानन्दाभिज्ञानशकुन्तलादिकं
ापरपर्य्यायं रूपकपदाभिधेयं दृश्यं काव्यम् ।
तः पूर्वं १८२७ सप्तविंशत्युत्तरोनविंशतितमवर्षे
वर्षे मालवदेशे उज्जयिनीनामराजधान्यामसीमगुण-
विक्रमादित्यनामा नृपतिरासीत् । तस्य धन्वन्तरि-

प्रभृतयो नव कविवराः सभासदो बभूवुः। तेषु कालिदास एव प्रथितयशा महाकविरासीत्। तेन च रघुवंश-कुमार-सम्भव-मेघदूताभिधं काव्यत्रयं, श्रुतिचन्द्रिकाभिध उत्कल-देशप्रचलितो वेदोक्तकर्म्मप्रतिपादकप्रबन्धः, ज्योतिर्विदा-भरणनामकं कालज्ञानशास्त्रं च क्रमेण निरमायि। अन-न्तरञ्च मालविकाग्निमित्र-विक्रमोर्वशी-शाकुन्तलाभिधानि दृश्यकाव्यानि प्रणीतानि, एतञ्च तत्कृतज्योतिर्विदाभरण-ग्रन्थे शेषाध्याये स्पष्टमुपलभ्यते। यथा—

मत्तोऽधुना कृतिरियं सति मालवेन्द्रे
श्रीविक्रमार्कनृपराजवरे समासीत्। इति,

धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कु-
र्वेतालभट्टघटख[क]र्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥ इति,

यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेश-योगिनी इति।

शङ्क्वादिपण्डितवराः कवयस्त्वनेके
ज्योतिर्विदः समभवंश्च वराहपूर्वाः।
श्रीविक्रमस्य बुधसंसदि प्राज्ञबुद्धे-
स्तैरप्यहं नयसखः किल कालिदासः॥
काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं
जातं यतो ननु कियच्छ्रुतिकर्म्मवादः।
ज्योतिर्विदाभरणकालविधानशास्त्रं
श्रीकालिदासकवितो हि ततो बभूव॥ इति,

वर्षे सिन्धुरदर्शनाम्बरगुणैर्याते कलौ संमिते
मासे माधवसंज्ञिकेऽत्र विहितो ग्रन्थक्रियोपक्रमः ॥ इति ।

अनेन ३०६८ अष्टषड्गुणरविमितवत्सरसंख्यके कलेरब्दवृन्दे याते तदुपक्रमकरणं सुव्यक्तम्। इदानीञ्च कलेर्गताब्दाः ४९७० तेषु निर्दिष्ट ३०६८ संख्याशोधितेषु १९०२ वर्षाः समायान्ति। तत्र इतः पूर्वं १९०२ वर्षगणात् पूर्वं कालिदासकवितो ज्योतिर्विदाभरणं ततः पूर्वं रघुवंशादिकमभूदिति प्रतिभाति। एतत् सन्दर्भैर्यद्यपि दृश्यकाव्यत्रयकरणं न प्रतीयते तथापि दृश्यकाव्यानां प्रागुक्तानां ज्योतिर्विदाभरणग्रन्थात् पश्चात् काले कालिदासकृतानां न तेषां तत्र समुल्लेखः किन्तु तत्तद्ग्रन्थेष्वेव तत्कृतत्वं सुव्यक्तमेव। ऋतुसंहारनलोदययोर्यदि तत्कालिदासकृतत्वं तदा ततः पराधीनतया न तयोल्लेखः।

कालिदासस्य कतममन्वयं कतमञ्च जनपदमलञ्चकार तन्नाकलयामः। किन्तु तस्य चरितविषयेऽस्मद्देशे भूयिष्ठप्रचारमेवमैतिह्यमस्ति। तदत्र सर्वत्र विज्ञापनाय प्रदर्श्यते। काचित् विद्वत्तमा कन्या विवाहार्थं पित्रानीतान् बहून् प्रभूतान् द्विजान् वादविचारेण पराजिग्ये। एवम् आगत्यागत्य तस्याः सकाशात् विचारे पराजयमाप्य प्रतिनिवृत्तेषु वरेषु तदुत्तरं पराजयभयेनेतरे वरा यदा नैवागन्तुमैच्छन् तदा तत्पित्रा विचाराभावेनैव आगतमात्राय पात्राय कन्या देयेति प्रतिज्ञाते पूर्वंपूर्ववरानयने निष्फलप्रयत्नतया बहुधा खिन्ना आतेर्या दूताः पुनर्वरानयनार्थं तत्पित्रा नोदिताः आवल्लभितमात्राच्चोदितया कालि-

दासमल्पबुद्धिमवेत्य तत्कन्यया वरत्वेनावधार्या निन्युः। आनीताय च तस्मै भविचार्य तद्दोषगुणौ तत्पिता तां कन्यां प्रायच्छत्। एवं तस्य विवाहे संवृत्ते दम्पत्योः परस्परालापकाले कालिदासेनापभ्रंशशब्दमात्राभिधानेनापभ्रंशशब्दः प्रायोजि। तत् श्रुत्वा च तद्भार्या तमत्यन्तं तिरस्कृत्य गृहात् निष्कासयामास। एवं पत्न्या निष्कासितः कालिदासोऽतीव निर्वेदमापन्नोऽरण्यं गत्वा सरस्वतीमाराध्य तत्प्रसादात् लब्धविद्यः गृहं प्रति निववृते। आगत्य च रात्रौ गृहद्वारं रुद्धं विलोक्य तेन स्वपत्नीं प्रति "अनावृतकपाटं द्वारं देहि" इति अभिहितम्। तत् श्रुत्वा च स्वरविशेषेण तं स्वपतिमवगत्य कालिदासपत्न्याऽनुयुक्तम् "अस्ति कश्चित् वाग्विशेषः" इति इत्येवं पत्न्या कृते वाग्विशेषास्तित्वप्रश्ने तद्वाक्यं पदत्रयघटितमिति कृत्वा तत्रस्थमेकैकं पदमधिकृत्य तेन एकैकं काव्यं विरचितम्। तत्र तद्वाक्यस्थम् अस्तीति प्रथमं पदमधिकृत्य "अस्त्युत्तरस्याम्" इत्यादि सप्तदशसर्गात्मकं कुमारसम्भवाख्यं महाकाव्यं, कश्चिदिति द्वितीयं पदमधिकृत्य "कश्चित् कान्ताविरहगुरुणा" इत्यादिकं मेघदूताख्यं खण्डं काव्यं वाग्विशेष इति तृतीयं पदं तदेकदेशं वागिति वाक्पदमधिकृत्य "वागर्थाविव संपृक्तौ" इत्यादिकमूनविंशतिसर्गात्मकं रघुवंशाख्यं महाकाव्यञ्च तेन क्रमशो रचितम्। तद्रचनया च कालिदासः सर्वत्र प्रथितसुकवितया प्रख्यातिमुपलभ्य क्रमेण विक्रमादित्यस्य सभासदताम् आजगामेति।

तत्कृतिषु च सप्तदशसर्गात्मककुमारसम्भवनामकमिदं

महाकाव्यम् अत्र च वीररस प्रधानो अन्ये रसा यथा-ऽवयवमङ्गानि । कार्त्तिकेयो नायकः तारकासुरः प्रति-नायकः। एतच्च काव्यं कविना शैवाभिधमहापुराणोत्तर-खण्डीयत्रयोदशाध्यायादष्टादशाध्यायपर्य्यन्त-प्रतिपाद्यतारका-सुरवधकथामाश्रित्य प्रणीतम्, किन्तु तत्र पार्वतीतपस्या-नन्तरं पार्वतीं प्रति प्रसन्नेन महादेवेन स्वयंवरविधान-कर्त्तव्यताया उपदेशः, इह तु सप्तर्षिमण्डलस्य तत्प्रार्थनार्थं हिमवन्तं प्रति प्रेषणमित्येव कविना ब्रह्मपुराणानुसारेण कल्पितमित्येव विशेषः। कविना च शैवपुराणवचनार्थमनु-सृत्यैव प्रायेण श्लोका निर्ममे तद्ज्ञापनाय शैवपुराणस्य कतिचिदध्याया अत्र समुद्ध्रियन्ते अत्र च यस्य श्लोकस्यार्थो यस्मिन् श्लोके कविनानुसृतः तदपि चिह्नद्वारा सूचितम्। तद्दर्शने च कालिदासस्य न सर्वार्थोद्भावनं स्वबुद्धेरिति प्रतिभाति।

शैवे त्रयोदशाध्याये किञ्चिदधिकृत्य।

प्रसूतिरभवत्तस्या मेनायाः कन्यका शुभा ॥ १, २२ ॥
दिशः प्रसेदुः पवनः सुखं ववौ शङ्खं निदध्मुर्गगनेचरास्तथा।
पपात मौलौ कुसुमाञ्जलिस्तदा बभूव तज्जन्मदिनं सुखप्रदम् ॥ १, २३ ॥
मेना तया पूर्वनिशेशवक्त्रया स्फुरत्प्रभामण्डलया रराज ह।
यथा विदूराचलभूमिरङ्कुरा घनोत्थया रत्नशलाकया मुने ! ॥ १, २४ ॥
तां पार्वतीत्याभिजनाच्च नामतो जुहाव तद्बन्धुजनः स्वभावतः।
माता निषिद्धा तपसे यदा तु सा तथाप्युमाख्यां भवभक्तिभाविनी ॥१,२६॥
गङ्गा यथा हंसगणाः शरत्सु वै रात्रौ स्वभासश्च यथा महौषधीः।
गुरूपदेशादुपदेशपक्षिततां तां पूर्वसंस्कारशुभा वपुर्मुदा ॥ १,२८ ॥
तत्पादपाथोजभुवा श्रिया मुने! स्वचारविन्दच्छविरूपनिन्दनम् ॥१,३२॥

सुनूपुरप्रोज्जितपादपद्मगीरश्रिहृद्वचा हंसगमागतं ययुः ॥ १,३४ ॥
निर्माय पद्मे वरजङ्घयुग्मं वृत्तं जानु तदीये वृत्तानुपूर्विके ।
शेषाङ्गनिर्माणविधौ जडोऽभवद्विमोहितस्तन्मुखदर्शनेच्छया ॥ १,३५ ॥
मध्ये च तस्यास्त्रिवली रराज सा कामोत्सवार्थं नवयौवनोद्भवा ॥१,३९॥
स्तनद्वयं वै ववृधे तथा शुभे ! यथा न सूत्रं बिस मध्यगं भवेत् ॥१,४०।
एतद्विचित्रं शृणु तत्स्वरूपकं यथोऽभवत् सैव पुरा पुरारिहा ।
क्रमेण यामर्द्धशरीरसंस्थितां चकार सा ते किल कथ्यते कथम् ॥१,५०॥

एवं सर्वगुणोपेतामुमामालोक्य भूधरः ।
क्रमेण योजयामास तां हरार्चनकर्मणि ॥

हिमवानुवाच ।

शृणु गौरि ! वचोऽस्माकं शङ्करो वर्त्तते मयि ।
इहामुत्र फलार्थञ्च तं पूजय समाहिता ॥
यदा देहं सती देवी दक्षरोषात् ससर्ज ह ।
ततो विमुक्तसङ्गोऽभूत् शङ्करस्त्वपरिग्रहः ॥ १, ५३ ॥
स कृत्तिवासास्तपसे यतात्मा वर्त्तते मम ।
प्रस्थे चालकनन्दायां सदा शीकरशीतले ॥ १,५४ ॥
ईश्वराणां सदा सेवा जायते सर्वमङ्गलम् ।
तस्मात्तदर्चनासक्ता भव त्वं भवभाविनि ! ॥

वामदेव उवाच ।

पितुर्वाक्यमिदं श्रुत्वा जहास मनसा तदा ।
तथेत्युक्त्वा स्वपितरं परिचर्य्यापराभवत् ॥
जया च विजया तस्याः सख्यौ द्वे परिचारिके ।
ताभ्यां साकं चन्द्रमुखी चन्द्रशेखरमार्चयत् ॥ १,५८ ॥
समाधेरनुमेने तां गिरिशः परिपन्थिनीम् ।

समाधिनिश्चलत्वञ्च सर्वेषां दर्शयन् मुने ! ॥ १,५८ ॥
लोकानां धर्मशिक्षायै नो जग्राह तदा तु ताम् ।
प्राप्योऽहं तपसा सत्यमिति लोकांश्च दर्शयन् ॥
गिरीशमुपचचार प्रत्यहं सा सुकेशी ॥ १,६० ॥
स्वजनकवचनाच्चापालनार्थेश्च भक्त्या ।
सकलभुवननाथः शङ्करश्चन्द्रमौली-
र्भवतु मम हि भर्त्ता भावयन्तीति कामम् ॥
इति श्रीशिवपुराणे उत्तरखण्डे उमोत्पत्तिर्नाम
त्रयोदशोऽध्यायः ॥ १२ ॥

वामदेव उवाच ।
एतस्मिन्नन्तरे काले तारकेण दिवौकसः ॥ २,१ ॥
शक्रो पराजिता आसन् शक्रदर्पविघातिना ।
तदा सर्वे सुराणाहं कृताग्रे हतविक्रमाः ।
स्वायम्भुवं ययौ धाम सत्यलोकमिति श्रुतम् ॥ २,१ ॥
दृष्ट्वा तत्र जगन्नाथं विकसत् सुमुखश्रियः ।
बभूवुः पङ्कजानीव प्रातर्दृष्ट्वा दिवाकरम् ॥ २,२ ॥
ततस्ते लोकधातारं वागीशं सर्वतोमुखम् ।
प्रणिपत्य यथान्यायमिदमाहुस्तदा मुने ! ॥ २,३ ॥
देवा ऊचुः । ब्रह्मणे सृजते विश्वं स्थितौ पालयते नमः ।
रुद्ररूपाय कल्पान्ते नमस्तुभ्यं त्रिमूर्त्तये ॥ २,४ ॥
त्वया यत् क्षिप्तममलं बीजं जलधिसद्मने ।
सूयते प्रसवस्तस्य चराचरमिदं जगत् ॥ २,५ ॥
दर्शयन् महिमानं त्वं तिसृभिर्मूर्त्तिभिः प्रभुः ।

उत्पत्तिस्थितिनाशानामेको भूः कारणं स्मृतम् ॥२,६॥
स्त्रीस्वरूपी भवानेव पुमानसि जगत्पते ! ।
तस्मात् सर्वेषु सत्त्वेषु विख्यातौ पितरौ भवान् ॥२,७॥
तवावबोधो भगवन् ! भूतानामुदयाय च ।
प्रलयाय भवेन्निद्रा नमस्ते कालरूपिणे ॥ २,८ ॥
जगदीशस्त्वमेवासि त्वत्तोनास्त्येव ईश्वरः ।
जगदादिरनादिस्त्वं नमस्ते स्वात्मवेदिने ॥ २,९ ॥
आत्मानमात्मना वेदं सृजस्यवसि हंसि च ।
आत्मज्ञानविदो नित्यं त्वां विदुर्नेतरे जनाः ॥२,१०॥
नमः समुद्ररूपाय संघातकठिनाय च ।
स्थूलाय गुरवे तुभ्यं सूक्ष्माय लघवे नमः ॥२,११॥
व्यक्ताव्यक्ताय देवाय सर्वलोकेश्वराय च ।
सर्वान्तःसाक्षिणे तुभ्यं निर्जराजरदायिने ॥
त्वत्तो वेदाः समुद्भूता ऋग्यजुःसमसंज्ञकाः ॥
कर्मयज्ञाः स्वर्गफलाः साङ्गोपनिषदः शुभाः ॥ २,१२ ॥
धर्मार्थकाममोक्षाणामादिभूतां सनातनीम् ।
त्वामामनन्ति प्रकृतिं पुरुषार्थविदः प्रभो ! ॥ २,१३ ॥
इन्द्रादीनाञ्च देवानां देवो भगवते नमः ।
मरीच्यादिविधातॄणां विधातासि जगद्गुरो ! ।
परतोऽपि परोऽसि त्वं सर्वेन्द्रियविगोचरः ॥ २,१४ ॥
हव्यहोतृस्वरूपेण भोज्यभोक्तृस्वरूपतः ॥
सर्वेषां यजमानेव भवान् स्वर्गफलप्रदः ।
वेद्यवेतृस्वरूपेण ध्येयध्यातृस्वरूपतः ॥ २,१५ ॥
निष्कामाणां मुमुक्षूणां मोक्षदोऽसि त्वमेव च ।

त्वमेव सर्वलोकानां स्रष्टा पालयिता भवान् ॥
यथाकाले हरोऽसि त्वं सर्वपापहरो भवान् ।
युष्मन्मुखाम्बुजं दृष्ट्वा वयं सर्वे निराकुलाः ॥
त्राहि नः करुणापाङ्गैररातिबलपीड़ितान् ।
नाभिन्नं वर्त्तते देव ! तव भिन्नं कदाचन ॥
सर्वत्र समदर्शी त्वं तथाप्यस्मांस्तु पालय ॥

ब्रह्मोवाच ।

स्वागतं वो महाभागाः ! सर्वदैत्यविमर्दनाः ! ।
स्वर्गश्च स्वभुजाक्रान्तैर्भवन्तः पालयन्ति हि ॥ २,१८ ॥
इदानीन्तु कथं सर्वे नष्टभासोऽभवन् सुराः ।
तुषारच्छन्नतेजांसि ज्योतींषीव विहायसि ॥२,१९॥
पुरुहूतस्य यद्वज्रमथः क्षतसुरायुधम् ।
तदिदानीं महाभागाः ! दृश्यते हृतयौवनम् ॥२,२०॥
वरुणस्य तु यः पाशो महासुरबलः सदा ।
सोऽयं वै दृश्यते सर्पो मन्त्राहतबलो यथा ॥ २,२१ ॥
कुबेरस्य भुजः शून्यो गदया दृश्यते सुराः ! ॥२,२२॥
यमोऽपि विलिखन् भूमौ दण्डेनास्तमितत्विषा ॥२,२॥
त एते द्वादशादित्या दृश्यन्ते गततेजसः ।
भित्तिभागे यथायाम्य चित्रकैर्लिखिता इव ।२,२४॥
वेगभङ्गाः कथममी सर्वे च मरुतोऽभवन् ॥ २,२५ ॥
रुद्राणां मौलयश्चैव कथं चन्द्रार्धवर्जिताः । २,२६ ॥
पवमग्निः कृशं देवाः ! दृश्यते शान्तवर्चिषम् ।
सोमोऽयं श्यामवर्णोऽभूत् पीयूषपरिवर्जितः ।
ऐरावतगजो ह्येष भग्नदन्तस्तु दृश्यते ।

फलपुष्पविहीनस्तु मूलोत्पाटितपल्लवा ॥

बृहस्पतिरुवाच ।

यदेतदुक्तं भवता नानृतं सत्यमेव हि ।
सर्वभूतान्तरात्मासि कथं न ज्ञास्यसि प्रभो ! ॥२,३१॥
अमी शक्रादयो देवा भ्रष्टराज्याः पराजिताः ।
विचरन्ति महीपृष्ठे तारकेण बलीयसा ।
महासुरस्तारकाख्यस्त्वत्तः प्राप्तपराक्रमः ॥
सर्वलोकविनाशाय केतुराजिरिवोत्थितः ॥ २,३२ ॥
तदन्तःपुरवर्त्तिन्यो दीर्घिकाः सन्ति याः प्रभो ! ।
तासां पद्मोदयायेव विवस्वान् भाति केवलम् ॥२,३३॥
शनैः शनैर्वाति वायुस्तदुद्याने च भीरुवत् ।
पतने कुसुमानाञ्च पुष्पस्तेयी भविष्यति ॥ २,३५ ॥
ऋतवस्ते स्वकालञ्च विहायासुरभीरवः ।
युगपच्च तदुद्यानं फलपुष्पैरुपासते ॥ २,३६ ॥
चन्द्रस्तु तं सदाकालं कलाभिः परिषेवते ।
चन्द्रशेखरमूर्द्धस्थां कलामेकां विहाय च ॥ २,३४ ॥
समुद्रः सर्वरत्नानि तस्मै योग्यानि वै ददौ ॥२,३७॥
ज्वलन्मणिशिखो रात्रौ वासुकिस्तं निषेवते ॥२,३८॥
अग्निस्तु तस्य वस्त्राणि विमलानि करोति हि ।
ग्रीष्मे तदङ्गे शनकैर्मेघा वर्षन्ति शीकरैः ॥
यज्ञभागं स चाश्नाति विनिवर्त्य दिवौकसः ॥२,३९॥
अहं तस्याग्रतो गत्वा कथयामि शुभाशुभम् ।
एवमाराधितश्चापि स क्लिश्नाति जगत्त्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥ २,४० ॥

विच्छेदं नन्दनतरून् देवस्त्रीपरिलालितान् ॥ २,४१ ॥
मन्दाकिन्या जलं सर्वं स्ववाप्यां स्थापितं प्रभो ! ॥२,४४॥
कनकाचलशृङ्गाणि समुत्पाट्य महासुरः ।
क्रीड़ास्थलेषु तान्येव स्थापयामास वेश्मनि । २,४३ ॥
अस्माकं सकलोपाया अभिभूता महासुरे ॥ २,४८ ॥
मेघच्छन्ना रविकरा यथा तेजस्विनो भुवि ।
तदिच्छामो विभो ! स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ २,५१ ॥
हन्तारं परसैन्यानां गोप्तारं त्रिदिवौकसाम् ।
दातारं शक्रलक्ष्म्याश्च महावीर्यपराक्रमम् ॥ २,५२ ॥

ब्रह्मोवाच ।

भविष्यति भवत्कामः सहध्वं सुरपुङ्गवाः ! ॥ २,५३ ॥
तपःफलविपाकस्तु तस्यासीदधुना महान् ।
मया तस्मै वरो दत्तो न हन्तव्यो ह्यसौ मम ।
विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥२,५५॥
युध्यन्तमाहवे तञ्च महाबलपराक्रमम् ।
समर्थः को भवेज्जेतुं विना शम्भुसुतं सुराः ! ॥२,५७॥
यज्ञाग्नौ या पुरा दग्धा उमेति परिकीर्त्तिता ।
सापि तत्राधुना देवाः ! वर्त्तते शिवसन्निधौ ॥
उमाश्रयति गौरीशं तत्परिग्रहणेच्छया ।
ततस्तत्र प्रयत्नञ्च कुरुध्वं विबुधेश्वराः ! ॥
आकाङ्क्षति तथा शम्भुरुमां च नगनन्दिनीम् ॥
वोढुं शम्भुरेतस्तु नान्यः को सैव शक्नुते ॥ २,६० ॥
तयोः पुत्रो यदा भूयात्तदा वो मङ्गलं भवेत् ॥

कामदेव उवाच।

इत्युदाहृत्य तान् देवान् स्वधाम्नः प्राविशत् प्रभुः॥२,६२॥
देवास्ते कृतकृत्यास्तु नमस्कृत्य ययुर्दिवम्।
तस्मिन् कार्य्ये विनिश्चित्य कन्दर्पं शिवविद्रावकम्॥२,६३॥
मघवान् तमुवाचेदं पुष्पबाणधनुर्धरम्॥

इन्द्र उवाच।

त्वमेव सर्वकार्य्येषु सहायोऽस्तु मदर्थकम्।
रक्षायै सर्वलोकानां महाकार्यं हि करिष्यसि॥

कामदेव उवाच।

धन्योऽहं कृतकृत्योऽहं मय्यास्ते त्वदनुग्रहः।
किं करिष्यामि देवेन्द्र! समाज्ञापय सत्वरम्॥३,२॥
असम्मतः कस्तवेन्द्र! मुक्तिमार्गमपेक्षतं।
तं सुन्दरीकटाक्षैस्तु बध्नाम्याज्ञापयस्व मे॥३,३॥
कस्य ममोरपि हरे! धर्मार्थौ पीड़याम्यहम्॥३,७॥
करिष्ये कां सतीं देव! तवाग्रे त्वशलज्जिकाम्॥३,७॥
वज्रं तव सुराधीश! यत् कार्य्यं न करिष्यति।
तत् करिष्यामि पुष्पास्त्रैः सर्वासुरविमोहनम्॥३,८॥
धैर्य्यच्युतं करिष्येऽहं भवस्यापि तवाज्ञया॥३,१०॥
अन्येषाञ्चैव देवानामसुराणाञ्च का कथा॥

इन्द्र उवाच।

यद्देमि तऽनङ्ग! वीर्य्यं हरधैर्य्यहरं परम्॥३,१२॥
तत् कुरुष्वामराणाञ्च क्षितये त्रिदिवस्य च॥३,२०॥
हिमवच्छिखरं गत्वा यत्रास्ते भगवान् हरः॥३,१७॥
उमां गिरिसुतां चैव तत्र तस्मां नियोजय॥

वामदेव उवाच।

इत्युक्तस्तेन कन्दर्पः स जगाम हिमालयम्।
नियोजयितुकामस्तु उमायां चन्द्रशेखरम्॥
तत्सहायो मलयजः पवनस्त्वन्वगान्मुने!।
तत्सखो माधवश्चैव कामोत्सवपरायणः॥ १,२२,२३॥
तस्मिन् वने संयमिनां मुनीनामूर्द्ध्वरेतसाम्।
समाधेः प्रतिकूलस्तु कामो विजयते मुने!॥ १, २४॥
तदा शरीरिणास्तत्र कामासक्तनभूत्मनः।
सर्वत्र विपरीतन्तु जातकुसुमितं वनम्।
कामो धनुषि संयोज्य पुष्पबाणं तदा मुने!॥ १,६४॥
पार्वतीसम्मुखे स्थाणो मोक्तुकामो व्यवस्थितः॥ १, ६६॥
हरस्तु धैर्य्यमालम्ब्य किमेतदिति चिन्तयन्।
ददर्श पृष्ठतः कामं पुष्पबाणधनुर्धरम्॥ १, ६७॥
विद्वदमन्योस्तस्याथ तृतीयनयनान्मुने!।
स्फुरदुद्दीप्तिरग्निस्तु पपात मदनोपरि॥ १, ७१॥
क्रोधं संहर हे देव! इति यावत् वदन्ति खे।
इन्द्रादिसकला देवास्तावद्भस्मीचकार तम्॥ १, ७२॥
उपस्थितं विघ्नमिदं ज्ञात्वा च चन्द्रशेखरः।
अन्तर्दधे स विश्वात्मा महिमानञ्च दर्शयन्॥ १, ७३॥
गतिरेषा भवेत्तत्र! महादेवापराधिनाम्।
भस्मशेषोऽभवत् कामो दक्षस्यासीत् शिरो यथा॥
इति श्रीशिवपुराणे उत्तरखण्डे कन्दर्पदहनो नाम
चतुर्दशोऽध्यायः॥ १४॥

वामदेव उवाच ।

इत्यक्तिते भगवति सा शैलतनया मुने ! ।
निराशा हृतलज्जा च सखीभ्यां भवनं ययौ ॥ ३, ७५ ॥
तां दीनवदनां दृष्ट्वा गिरिर्दुहितरं मुने ! ।
उवाच मधुरं वाक्यमाश्वास्य च पुनः पुनः ॥

हिमवानुवाच ।

किमर्थं वदनं दीनं मृगशावकलोचने ! ।
रुद्रः किं कुपितो देवि ! सेवया बुद्धिहीनया ॥

उमोवाच ।

मत्सेवा महती शुद्धा शिवः शान्तमनास्तदा ।
मम कर्मविपाकेन सा सेवा विफलाऽभवत् ॥
शृणु तात ! प्रवक्ष्यामि तत्र चैको गतः पुमान् ।
पुष्पबाणधनुर्बाहुरेकया सह वै स्त्रिया ।
तस्मिंस्तत्रागते तात ! मारुतो मलयाचलात् ।
ववौ कुसुमिताः सर्वे तिलकाशोकपादपाः ॥
कूजन्ति कोकिलाः सर्वे पञ्चमस्वररञ्जिताः ।
इतस्ततो भ्रमन्त्यत्र भ्रमराः पुष्पमञ्जरीः ॥
तस्मिन् शरदि कालेऽपि सर्वसम्भारसंवृतः ।
बभूव कामसंसर्गाद् वसन्तो देहवानिव ॥
तदा मम नितम्बस्था काञ्ची चञ्चलतां गता ।
हरस्यापि मनोधैर्यांचलितं मां निरीक्ष्य च ॥
तदा स भगवान् शम्भुः पृष्ठभागे ददर्श ह ।
धनुर्धरं हि पुरुषं तं ददाहाग्निचक्षुषा ॥
ततश्चान्तर्दधे सोऽपि भगवान् प्रमथैः सह ।

भस्मीभूतश्च पुरुषस्तथैवास्ते च वर्त्तते ॥

वामदेव उवाच ।

श्रुत्वैतद्दुहितुर्वाक्यं हिमालयगिरिर्मुने ! ।
एवं वदन्तीं वृत्तान्तं गृहीत्वा तां ययौ गृहम् ॥
सापि कन्दर्पपत्नी तु शिवमन्तर्हितं पतिम् ।
भस्मीभूतं समालोक्य विललापातिदुःखिता ॥४,३४॥
ततो वह्निं समादाय सा रतिः कामवल्लभा ।
अनुगन्तुं स्वभर्तारमुद्योगमकरोन्मुने ! ॥ ४, ३२ ॥
ततो रतिं कामपत्नीं स्थितां देहविमुक्तये ।
आकाशसम्भवा वाणी प्राहेदं मधुराक्षरम् ॥ ४, ३९ ॥
प्रजापतिः स्वतनयां यदा कामितवान् पुरा ॥ ४,४० ॥
मृगरूपधरं तच्च बिभेद भगवान् हरः ।
तदा स लज्जितो भूत्वा शशाप मनसा तव ॥ ४, ४१ ॥
भर्त्तारं भव भस्म त्वं हरलोचनवह्निना ॥
ततः शङ्करनेत्राग्निर्भस्मशेषं चकार तम् ।
पुनस्तव पतिर्भूयाच्छङ्कराराधनात्ततः ॥ ४,४२ ॥
इमामन्तर्हितां वाणीं श्रुत्वा सा कामवल्लभा ॥४,४३ ॥
तत्रैव पूजयामास शङ्करं लोकशङ्करम् ।

ततः प्रासङ्गिककथां समाप्य तत्रैव ।

गत्वा पितृगृहं देवी विषण्णवदना सती ।
पितरं मातरं गत्वा प्राह वाक्यमिदन्तु सा ॥
सेवा मे निष्फला जाता धूर्जटेः पुरतः स्वयं ।
विफलाय बभूवेदं पुनर्मे नवयौवनम् ।
आज्ञापय महादेवपदाम्भोजार्चना[illegible] ।

अहं तपः करिष्यामि गत्वा शिखरकाननम् ।
ब्रह्मविष्णुसुरेशाद्यैरपरिच्छेद्य ईश्वरः ।
योऽसौ कथं मया ह्यत्र लभ्यते वै विना तपः ॥
तस्मादहं गमिष्यामि तपः कर्तुं च कानने ।
तपसा लभ्यते शम्भुर्योगिगम्यः परन्तपः ॥
इति स्वतनयावाक्यं श्रुत्वा तु पितरौ मुने ! ।
जगतुर्दुःखितौ भूत्वा वाष्पगद्गदया गिरा ॥
पितरावुचतुः ।
शङ्करस्तु तपोगम्यो नान्यथा कथितस्त्वया ।
भक्त्या तु लभ्यते भूयो भक्तियोगपरो हि सः ॥
तस्माद्भक्तिं समास्थाय सात्विकीं प्रेमलक्षणाम् ।
पूजय स्वगृहे देवं चन्द्रशेखरमम्बिके ! ॥
स्त्रीणां वननिवासस्तु नोचितो मुनिभाषितः ।
कथमेकाकिनी मातर्वनं गन्तुं त्वमिच्छसि ॥
एवन्तु रोचतेऽस्मभ्यं न गन्तव्यं वनं त्वया ।
वनेऽपि दोषो भवति योगिनां सदनं वनम् ॥
वनवासोऽङ्गनो धर्मो वनस्थानां विधीयते ।
नोचितः स च विज्ञेयो गृहस्थाश्रमवासिनाम् ॥
स कृत्तिवासा हे मातः ! सर्वभूतान्तरस्थितः ।
सर्वदर्शी च सर्वज्ञः सर्वेश्वरपतिर्भवः ॥
आराधितो भक्तियुक्तैर्यत्र कुत्रापि शङ्करः ।
प्रकाशमेति भक्तानां तमसामिव भास्करः ॥
तस्मात्त्वं भक्तियुक्तेन पूजय स्वगृहे शिवम् ।
ह ! मा गच्छ वनं घोरं सर्वविघ्नास्पदं सदा ॥

वामदेव उवाच ।

पितोरिति वचः श्रुत्वा सर्व्वधार्म्मार्थसम्मतम् ।
तदनादृत्य भक्तिज्ञा पार्वती प्रत्यभाषत ॥

पार्वत्युवाच ।

स धर्म्मो नास्ति मे तात ! गृहस्थाश्रमसम्मतः ।
गृहधर्माद्वहिर्भूता भवामि ब्रह्मचारिणी ॥
ब्रह्मचर्य्यं वनस्थानां वनवासो नियुज्यते ।
तस्माद् वनं गमिष्यामि शिवेच्छा ब्रह्मचारिणी ।
विशेषतो महादेवो वनौकोमुनिभावितः ।
शीघ्रं प्रसादमायाति तन्मतानां वनौकसाम् ॥

वामदेव उवाच ।

इत्युक्ता विकसत्पद्मलोचना गिरिनन्दिनी ।
शिवस्मरणसंयोगादानन्दाश्रुप्लुताभवत् ॥
अभिवाद्य ततस्तातं स्थविरान् नगजान् गुरून् ।
मुहुर्निवार्य्यमाणापि जगाम तपसे वनम् ॥
गौरी विजयया सख्या जयया च सुनेत्रया ।
साकं सखीभ्यां सुमुखी सा गौरीशिखरं ययौ ।
चकार वसतिं यस्माद्गौरीशिखरमुच्यते ॥ ५, ७ ॥
गौरीशिखरमासाद्य सा गौरी सखीसंयुता ।
तपश्चर्तुं समारेभे प्रीत्यै भगवतो मुने ! ॥
जजाप परमं मन्त्रं शैवं पञ्चवर्णसंज्ञकम् ।
ध्यायन्ती मनसा देवं पञ्चवक्त्रं त्रिलोचनम् ॥
हेमन्ते जाह्नवीतोये करकाम्बुधिशीतले ।
आकण्ठमग्ना ध्यायन्ती संस्थिता चन्द्रशेखरम् ॥

शिशिरे शीतसलिलस्थले चैकार्द्रवाससा ।
युक्ता चन्द्रकलाशीर्षं पूजयामास पार्वती ॥ ५, २६ ॥
वसन्ते तद्भवैः पुष्पैर्निराहारा गतक्लमा ।
श्रद्धया परया युक्ता पूजयन्ती महेश्वरम् ॥
ग्रीष्मे पञ्चाग्निमाधाय मध्ये भूत्वा कृताञ्जलिः ॥ ५,२० ॥
ध्यायन्ती कामदहनं नान्यभावा मुने ! ऽभवत् ॥
वर्षायामुच्चकैः स्थित्वा वर्षतो मध्यतस्तु सा ।
धाराभिर्मुषलाभाभिर्नान्यभावा तदाभवत् ॥ ५,२३ ॥
शरत्काले महापूजामकरोदिन्दुशेखरे ।
षष्ठकालाशना भूत्वा तत्पादाम्बुजमानसा ॥
एवं वर्षत्रिकेष्वेषा षष्ठकालकृताशना ।
चतुर्थे त्यक्तपर्णा च अपर्णाख्यामवाप सा ॥ ५,२८ ॥
पञ्चमे वायुभक्षश्च परित्यज्य समाहिता ।
एवं पञ्चमितं वर्षं सा चकार तपो भृशम् ॥
तपोविपाककाले तां जिज्ञासुर्भगवान् शिवः ।
ब्रह्मचर्य्यव्रतधरो विवेश तपसोऽचलम् ॥
अजिनाषाढधारी च प्रगल्भवचनो मुने ! ।
ज्वलन्निव जटाधारी ब्रह्मणो ब्रह्मतेजसा ॥ ५,३० ॥
दृष्ट्वा तमतिथिं गौरी पूजयामास सादरात् ।
भक्ष्यभोज्यैरशेषैश्च सशय्यासनवारिभिः ॥ ५,३१ ॥
स ब्रह्मचारी जटिलः प्रतिगृह्य च सत्क्रियाम् ।
पप्रच्छ मामुखाम्भोजमित्युवाच सुकोमलम् ॥ ५,३२ ॥

जटिल उवाच ।

अपि क्रियार्थं सुलभं पुष्पवारि समित्कुशम् ।

अपि देवि ! तपोमूर्त्तिं अद्यत्वापि प्रवर्त्तते ॥५,३३॥

एषा ते यौवनावस्था तपः कर्तुं न युज्यते ।

तपसे मुनयश्चापुरुत्तरं वपुषो वयः ॥

वृद्धकालोचिते शेषे जटावल्कलवाससी ।

कथं बिभर्षि सुश्रोणि ! नोचितं तव यौवने ॥ ५,४४ ॥

किमर्थमेतद्घोरञ्च तपः कर्तुं त्वमर्हसि ।

किमाकाङ्क्षसि सुश्रोणि ! मया त्वयि न लक्ष्यते ।

घोरेण तपसा देवि ! भर्तारं यदि वाञ्छसि ।

श्लाघनीया तदा भर्त्रा त्वं भवत्या न वै पतिः ॥५,४५॥

किमाकाङ्क्षसि सुश्रोणि ! कथयस्व ममाग्रतः ।

कुतूहलेन शुश्रूषुरहं तव नगेन्द्रजे ! ॥

जयोवाच । एषा गिरिसुता विप्र ! सती कमललोचना ।

वाचं परस्य साक्षान्नो ददाति भवसेविनी ॥

अतोऽहं ते प्रवक्ष्यामि सख्या वाञ्छितमुत्तमम् ।

यदर्थञ्च तपो घोरं करोति गिरिकन्यका ॥ ५,५२ ॥

यदा हरेक्षणाग्निस्तु ददाह मदनं द्विज ! ।

ततः प्रभृत्यसौ बाला वाञ्छतीन्दुकलाधरम् ॥ ५,५३ ॥

जटिल उवाच ।

साधु साधु महाभागे ! शोभनं वरमिच्छसि ।

इन्द्रादिप्रमुखान् देवान् परित्यज्य दिवौकसः ॥ ५,५३

श्मशानचारी सततं व्यालाभरणभूषितः ।

निन्दितः सर्वलोकेषु स कथं वाञ्छ्यते त्वया ॥ ४,६६ ॥

चिताभस्मविलिप्ताङ्गं वातुलं जटिलं हरम् ॥ ५,६८ ॥

यावेतौ तव पाणी तु लाक्षारसविराजितौ ।

32453 THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE

पूतिमांसयुतो भस्मलिप्तौ तौ च भविष्यतः ॥ ५,६८ ॥
नाजुहावाध्वरे दक्षस्तं कथं वरमिच्छसि ।
यः कपाली करालश्च भूतवेतालसंवृतः ।
दिग्वासा विगतव्रीडः स कथं व्रियते त्वया ॥
धन्यासि कृतपुण्यासि ह्येतदर्थं परन्तपः ।
उपहासं करिष्यन्ति श्रुत्वैतद् गृहमेधिनः ॥
दुकूलं तव सुश्रोणि ! तद्वासस्तु गजाजिनम् ।
विवाहकालसम्भूतवल्कले ! सोपहास्यदम् ॥ ५,६७ ॥
तस्योद्वाहनकाले च हाहा कर्तुं भविष्यति ।
फणिकङ्कणसंयोगं यदा ते कङ्कणं भवेत् ॥ ५,६६ ॥
तत् परित्यज्य गिरिशमुपेन्द्रं वा शचीपतिम् ।
वरय त्वं विशालाक्षि ! वरयोग्यौ तु तौ तव ॥
वामदेव उवाच ।
इति तस्य वचः श्रुत्वा पार्वती ब्रह्मचारिणम् ।
नियमं सा परित्यज्य वाक्यमेतदभाषत ॥
उमोवाच ।
ब्राह्मण ! त्वं सर्ववेत्ता सत्यं वदसि नान्यथा ।
इन्द्रादिसकला देवाः परित्यज्याः शिवेप्सुभिः ॥
आब्रह्मस्तम्बपर्यन्तं भस्मीभूतं चराचरम् ।
महाप्रलयकाले च श्मशाने चरते हरः ॥
अशेषजगतां शेषः शेषोऽहिः परिकीर्तितः ।
शेषकाले धृतः कण्ठे कालाभरणभूषितः ॥
निन्दितः सर्वलोकेषु यः सदानन्ददायकः ।
सत्यमुक्तं द्विजश्रेष्ठ ! स कथं वाञ्छते मया ॥

महाप्रलयसम्भूतं चिताभस्म च दृश्यते ।
तं कथं वरमिच्छामि सत्यमुक्तं न संशयः ॥
वकारं पीयूषं विद्यादतुलोऽसौ सनातनः ।
तस्मादसौ वातुलस्तु मुनिभिः परिकीर्त्तितः ॥
यः सर्वपापसङ्घातं स्मरणाद्धरति प्रभुः ।
तं हरं पापमोक्तारं वरमिच्छामि भो द्विज ! ॥
कथं दृष्टो वरस्त्वं तमावाच्यति शङ्करम् ।
न जुहाव वरेण्यं यस्तस्य स्यादृषवल्गतिः ॥
कं स्वर्गं पालिता यस्मात् पुरा त्रिपुरदाहनात् ।
तस्मात् शिवः कपालीति मुनिभिः स्तूयते सदा ॥
करैरलं भूषितस्य विवस्वान् परिकीर्त्तितः ।
अष्टमूर्त्तिधरत्वेन कराली परिकथ्यते ॥
पृथिव्यादीनि भूतानि तेषां वेतालको गणः ।
ततोऽसौ प्रोच्यते सद्भिर्भूतवेतालसंवृतः ॥
पादौ यस्य तु पातालं कटिर्भूर्द्यौः शिरस्तथा ।
दिशो वासांसि यस्यासन् दिग्वासास्तेन स स्मृतः ॥
विशेषतो गता व्रीड़ा यस्माद् वै पद्मयोनिना ।
स्वसुताभोगसमये विगतव्रीड़ एव सः ॥
एवम्भूतो यः सदात्मा सर्वदेवैर्नमस्यते ।
सत्यमुक्तं द्विजश्रेष्ठ ! स कथं व्रियते मया ॥
धन्याहं कृतपुण्याहमेतदर्थं तपो मम ।
नोपहासं करिष्यन्ति श्रुत्वैतद् ब्रह्मवादिनः ॥
वामदेव उवाच ।
एतद् श्रुत्वा वचस्तस्य जटिलस्तु ततो मुने ! ।

पुनर्वक्तुं समारेभे चन्द्रशेखरनिन्दनम् ॥
पुनर्विवक्षुं तं दृष्ट्वा जटिलं ब्रह्मचारिणम् ।
उमा प्रोवाच विजयामितोऽसौ सखि! नीयताम् ॥५,८२
यः करोति महादेवनिन्दामात्मविनाशिनीम् ।
स पापिष्ठतरस्तस्मात् यः शृणोति स पापभाक् ॥५,८३॥
तस्मादयं वटुर्वादी नीयतां नीयतामिति ।
महादेवापराधश्च कृतोऽनेन महान् मयि ।
शिवद्वेषी नरो यत्र तस्माद्धर्मः पलायते ।
धर्मारूढ़ो महादेवस्तस्मादेनमितो नय ॥
वामदेव उवाच ।
इति ब्रुवाणान्तान्देवीं भक्तिप्रेमपरिप्लुताम् ।
दृष्ट्वा स जटिलस्तुष्टः! प्रोवाच मधुरां गिरम् ॥
जानामि त्वां महाभाग! जगन्मातरमम्बिकाम् ।
तपःफलन्तु ते सत्यं भव त्वं भवभाविनी ॥
इत्युक्त्वा भगवांस्तत्र पश्यन्तीन्तां कृशोदरीम् ।
स्वरूपं दर्शयामास पञ्चवक्त्रं त्रिलोचनम् ॥ ५,८४ ॥
उवाच नीलपद्माक्षि! मम त्वं भव भाविनी ।
क्रीतस्तवाहं दासोऽहं घोरेण तपसामुना ॥ ५,८६ ॥
इतो गच्छ जगन्मातः! गृहं हिमवतः शुभम् ।
उद्वाहञ्च करिष्यामि धर्मशास्त्रोक्तकर्मणा ॥
अहञ्चैव करिष्यामि वेदोक्तविधिमम्बिके! ।
तदा कथं भवेयुस्ते लोकाः श्रेष्ठानुगामिनः ॥
आद्या शक्तिर्मम त्वं हि यामसेऽस्तदंघे पुरा ।
इदानीमावयोर्योगात् जगतां मङ्गलं भवेत् ॥

सहैताभ्यां विशुद्धाभ्यां सखीभ्यां सह सुन्दरि ।
स्वयंवरं पिता देवि ! करोतु तव सत्वरम् ॥
तत्र चाहं गमिष्यामि लोकधर्मं प्रवर्तयन् ।
गच्छ त्वं ह्युद्वहिष्यामि सर्वलोकसमीपतः ॥

वामदेव उवाच ।

इत्युक्त्वा भगवांस्तत्र ह्यन्तर्धानमुपागमत् ।
उमापि गिरिकन्या सा सखीभ्यां भवनं ययौ ॥
इदं जटिलसंवादं पार्वत्या यः पठेन्नरः ।
शृणुयाद्भक्तियुक्तश्च स प्रयाति शिवाकृतिम् ॥

इति शिवपुराणे उत्तरखण्डे तण्डिवामदेवसंवादे उमा-
जटिलसंवादो नाम षोडशोऽध्यायः ॥१६॥

ब्रह्मपुराणे उत्तरखण्डे शिवमाहात्म्ये किञ्चिदुपक्रम्योक्तम् ।
कोकिलासैन्यसंयुक्तो हिमाद्रिं प्रययौ स्मरः ।
तत्रापश्यत शम्भोः स पुण्यमाश्रममण्डलम् ॥
तत्रापश्यत्त्रिनेत्रस्य वीरभद्रं महाबलम् ।
यथा साक्षान्महेशानं गणांश्चायुतशोऽस्य च ॥
ददर्श तत्र चेशानं नासाग्रकृतलोचनम् ॥ २, ४७ ॥
देवदारुद्रुमच्छाया-वेदिका-मध्यमाश्रितम् ॥ २,४४ ॥
समकायं सुखासीनं समाधिस्थं महेश्वरम् ॥ २,४५ ॥
तं तथाविधमालोक्य सोऽन्तर्भेदाय यत्नवान् ।
षट्पदध्वनिव्याजेन विवेश मदनो मनः ॥
एतस्मिन्नन्तरे देवी विकासितविलोचनः ।

सस्मार नगराजस्य तनयां स्वमानसः ॥ ६,६० ॥
निवेदिता गौरवेण विवेश च गिरिः सुता ॥ १,६० ॥

तत्रैवाध्यायान्तरे ।

विश्राय सा सखीमाह किमयं न विवक्षति ।
वार्य्यतामार्य्ये ! विप्रोऽयं मद्दूषणभाषकः ।
न केवलं पापभागी श्रोता वै स्यान्न संशयः ॥
अथवा किञ्च नः कार्य्यं वादेन सह ब्राह्मणैः ।
कर्णौ पिधाय यास्यामो यथार्थः स्यात्तथास्तु सः ॥
इत्युक्त्वोत्थाय गच्छन्त्यां पिधाय श्रवणावुभौ ।
स्वरूपं समुपाश्रित्य जगृहे वसनं हरः ॥
ततो निरीक्ष्य तं देवं सम्भ्रान्ता परमेश्वरी ।
प्रणिपत्य महेशानं तुष्टाव च उमां तदा ॥

देव्युवाच ।

नमस्त्वं प्रभुः शम्भो ! दत्तं तत्र मया तव ।
अपुत्रः पितरावीशौ सम्मानयितुमर्हसि ॥ ६,१ ॥

प्रासङ्गिककथां समाप्य तत्रैवोक्तम् ।

ततः सप्त मुनीन् देवः चिन्तिताभ्यागतान् पुरः ॥७,२॥
प्राहिणोदम्बिकायाश्च स्थिरपत्रार्थमीश्वरः ॥
साऽरुन्धतीकास्ते तत्र ह्लादयन्तो हिमाचलम् ॥
उद्वाहार्थं ततो देवो विश्वं सर्वं न्यमन्त्रयत् ।
समागतन्तु सर्वञ्च विना दैत्यैर्दुरात्मभिः ।
स्थावरं जङ्गमं सर्व विश्वं विष्णुपुरोगमम् ॥
ततस्तं विधिराहेदं गन्धमादनपर्वते ।
पुरे स्थितं विवाहस्य देव ! कालः प्रवर्तते ॥

ततस्तस्य जटाजूटे चन्द्रखण्डं पितामहः ।
कपर्दशोभनं विष्णुः बबन्ध, चण्डिका ततः ।
उवाच चापि गिरिशं पुत्रं जनय शङ्कर ! ।
यो दैत्यं मूकुर्णं हत्वा मां रक्षे सर्पविष्यति ॥
हरो विभूष्यते देवैर्यथं भूषयन्ति च ।
शक्रो गजाजिनं दत्त्वा स्वयमेव व्यवस्थितः ॥
चिताभस्म समादाय कपाले रजतप्रभे ।
मनुष्यास्थिमयीं मालां प्रेतनाथश्च चन्दनम् ॥
वह्निस्तेजोमयं दिव्यमजिनं प्रददौ स्थितः ।
एवं विभूषितः सर्वैर्भृत्यैरीशो बभौ भृशम् ॥
ततो हिमाद्रेः पुरुषा वीरकं प्रोचिरे वचः ।
मा भूत् कालात्ययः शीघ्रं भवस्यैतन्निवेद्यताम् ॥
ततो देवं प्रणम्याह वीरकः करसंपुटी ।
त्वरयन्ति महेशान ! हिमाद्रेः पुरुषास्त्वमी ॥
इति श्रुत्वा वचो देवः शीघ्रमित्येव चाब्रवीत् ।
ततो बद्धाञ्जलिर्धीमान् स्थाणुं प्रोवाच केशवः ॥
शोभसेऽनेन रूपेण जगदानन्ददायिना ।
करमालम्ब्य विष्णोश्च वृषभं ववहे हरः ॥
ततस्तु वसवो देवाः शूलं तस्य न्यवेदयन् ।
धनदो निधिभिर्युक्तः समीपस्थस्ततोऽभवत् ॥
देवदुन्दुभिनादैश्च पुष्पसारैश्च शीतलैः ।
कृतमङ्गलवरोक्षित जयेति च महास्वनैः ॥
सव्यदक्षिणपार्श्वस्थौ ब्रह्मविष्णू च जग्मतुः ।
पश्चात्स्थितिर्दितिः सा च हरः ककुद्मवाहनः ॥

[illegible] कल्पादेवं कल्पस्तथा: सप्तदशाः च
चतुरस्तुर्भपादेवं कोटिश्चोऽस्तु इदम् हि ।
गणाश्च पुस्तको यस्तुः कोटिशो प्रथमस्तथा ।
महोत्सवेन देवेभ्यो गिरिराजं विवेश सः ॥
प्रभासस्वर्णकलशैस्तोरणानां शतैर्युतम् ।
ततो ब्रह्माद्यमरास्तो गुरुत्वे प्रार्थयंस्तदा ॥



अस्मिंश्च काव्ये प्राथमिकाः सप्त सर्गा एव सर्वत्र सुप्रसिद्धाः व्याख्यातृभिश्च प्रायेण त एव सर्गा व्याख्याताः । तदुत्तरसर्गेषु तु पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनेन मातापित्रोरिव अनास्वाद्यतया तेष्वनादरणीयत्वेन लोकेषु प्रचाराभावः व्याख्यातृणामुपेक्षा च ।

अष्टमादिसर्गोत्तरग्रन्थसद्भावस्य कुमारसम्भवसमाख्यया सिद्धिः उत्तरखण्डमुखबन्धे मया प्रतिपादिता । तथा उज्ज्वलदत्तेन वङ्क्राद्यश्चेति ४,६६ सूत्रे उणादिवृत्तौ "रवः प्रगल्भाहतभेरिसम्भवः" इति कुमारसम्भवनाम्नोदाहृतस्य पद्यस्य सप्तसर्गमध्येऽसम्भवात् तुल्यच्छन्दस्के चतुर्दशसर्गे सम्भवाच्च लिपिकरप्रमादवशात् मूलपुस्तके पतितत्वेन मुद्रितपुस्तकेऽदर्शनेऽपि अत्यभावाच्च कुमारसम्भवस्य अष्टमादिसर्गसद्भावः सुव्यक्त इति ।

एषु सप्तसु सर्गेषु मध्ये प्रथमे, हिमालयवर्णनम्, दाक्षायणीशरीरत्यागेन पार्वतीजन्मवर्णनम्, तद्रूपवर्णनम्, नारदेन पार्वत्या हरपत्नीत्वकथनात् अथ हिमालयस्या-

ध्वराभिवाञ्छितः, दाक्षायणीवियोगानन्तरं शिवस्य हैमवतसानौ तपश्चर्यावर्णनम् पितुरुपदेशात् पार्वत्यास्त-दाराधनवर्णनम्। द्वितीये, तारकासुरविप्रकृतदेवैः ब्रह्म-समीपे गतैर्ब्रह्मणः स्तुतिः, प्रसन्नब्रह्मणा सह देवानां कथो-पकथनम्, देवैः ब्रह्मसकाशे तारकासुरवधप्रार्थनम्, तत्र शिवपुत्रस्यैवोत्पत्त्या तद्वध इति ब्रह्मणा उपदिष्टे तत्-साधनायेन्द्रेण कामस्य स्मरणवर्णनम्। तृतीये, कामदेवेन सह वासवस्य कथोपकथनम्, शिवध्यानभङ्गार्थं कामदेव-प्रेषणम्, रतिवसन्ताभ्यां सह कामस्य शिवाश्रमे गमनम्, वसन्तवर्णनम्, ध्यानभङ्गायोद्यतस्य कामस्य शिवेन भस्मी-करणवर्णनम्। चतुर्थे, रतिविलापः, वसन्तसकाशात् अनु-मरणार्थं रत्या चितायाः प्रार्थनम्, मरणोद्यताया रत्या आकाशवाण्या पुनः कामसङ्गमस्य भाविताकथनेन समा-श्वासनवर्णनम्। पञ्चमे, पार्वत्याः पित्राज्ञया सखीभ्यां सह तपस्यार्थं गौरीशिखरगमनम्, तत्र घोरतरतपश्चरणम्, तेन तुष्टेन शिवेन परीक्षार्थं ब्रह्मचारिवेशेनागत्य पार्वतीं प्रति तपश्चरणप्रयोजनस्य प्रश्ने कृते पार्वत्या सखीमुखेन तदुत्त-रस्य दाने ब्रह्मचारिणा शिवस्यानुपादेयतायाः प्रतिपाद-नम्, तेन क्रुद्धायाः पार्वत्याः तमुपालभ्य स्थानान्तरगमनो-द्योगः, तेन प्रसन्नेन शिवेन स्वरूपावलम्बनेन पार्वती-हस्तस्य ग्रहणम्, शिवं प्रति पार्वत्या स्वदानाय पितुः प्रार्थ-नाया उपदेशः। षष्ठे, शिवेन सप्तर्षीणां स्मरणम्, आगतेषु तेषु हिमवन्तं प्रति पार्वतीप्रार्थनार्थं तेषां प्रेषणम्, हिमा-लयसमीपे आगतैश्च तैः शिवार्थं पार्वत्याः प्रार्थने, हिमवता

मेनकानुमत्या शिवार्थं हिमवतैव पार्वतीदानस्वीकारः, त्रिदिनोत्तरं विवाहस्य दिननिश्चितताकरणम्, शिवं प्रति तथाऽभिधाय सप्तर्षिमण्डलस्य स्वस्थाने गतिवर्णनम्। सप्तमे, वरकन्ययोर्वैवाहिकनेपथ्यादिरचना, वरयात्रिकाणामोषधिप्रस्थगमनम्, विवाहक्रियासमाधानम्, देवानां कामं प्रति शिवस्य प्रसादप्रार्थना। पार्वत्या सह शिवस्य कौतुकागारे प्रवेशः, इत्येते पदार्था दर्शिताः अष्टमसर्गादौ तु वर्णनीयाः पदार्था उत्तरखण्डेऽपि दर्शयिष्यन्ते।

32,453

एतच्च काव्यं मल्लिनाथसूरिविरचितटीकयालङ्कृतं मत्साहाय्येन इतः पूर्वं १९०७ संवत्सरे मुद्रितमासीत्। तदनुकूलतयैव च पुनः संस्कृतयन्त्रे १९१९ संवत्सरे मुद्रितमभूत्। किन्तु तयोरुभयोरपीदानीं दुर्लभतया पुनरप्यधुनैतत् प्रचारितम्। किन्तु मल्लिनाथधृतव्याकरणसूत्रवार्त्तिकानि अपाणिनीयैर्दुर्बोधतया सर्वेषां तद्धृतसूत्रवार्त्तिकानां सुबोधार्थं मया तेषां वृत्तिरूपा व्याख्याऽप्यत्र कृता। एवं यानि यानि सूत्रवार्त्तिकानि तेन समुद्धृतानि चिह्नद्वारा तत्तत्सूत्रपाठाध्यायपादादिसंख्या प्रकाशिता। तेन संख्यानुसारेण सूत्राद्यवलोकनं सुकरमिति।

एतच्च सर्वथा परिशुद्धमिति वक्तुमशक्यं तथापि यावता श्रमेण परिशुद्धिर्भवति तावान् भूयान् परिश्रमः कृतः। प्रमादात् यत्किञ्चिदशुद्धं तत् विद्वद्भिः परिशोधनीयम्।

१९२७ संवत्सरे
कलिकातायाम्

संस्कृतपाठशालाध्यापक-
श्रीतारानाथशर्मणः।

कुमारसम्भवस्थधातुरूपम् ।

प्रथमसर्गः ।

१म श्लोके ।—अस विद्यमानतायाम् अदा० प० सेट् । अस्ति, स्तः, सन्ति, असि, स्थः, स्थ, अस्मि, स्वः, स्मः । स्यात्, स्याताम्, स्युः । अस्तु, स्ताम्, सन्तु, एधि । आसीत्, आस्ताम्, आसन् । लुङादौ आर्द्धधातुकमात्रेऽस्य प्रयोगो नास्ति, भूधातुप्रयोग एवास्य रूपम् । सन् ।

गाहू विलोड़ने भ्वादि, आत्म० वेट् । गाहते अगाहिष्ट,—अगाढ़ । जगाहे, गाहिष्यते, घाक्ष्यते । गाढ़ः, गाढ़िः । गाहितुम्-गाढुम्, गाहित्वा, गाढ्वा, गाहमानः ।

स्था (ष्ठा) गतिनिरोधे भ्वा०, प० अनिट् । तिष्ठति, अतिष्ठत्, अस्थात्, तस्थौ, स्थितः, स्थितिः । स्थातुम्, स्थित्वा, तिष्ठन् ।

२ ।—दुह दोहने उभ० द्विक० अदा० अनिट् । दोग्धि, दुग्धः, दुहन्ति, धोक्षि, दुग्धे, अधुक्षत्, अदुग्ध-अधुक्षत, दुदोह, दुदुहे । दुग्धः, दुग्धिः, दोग्धुम्, दुग्ध्वा, दुहन्, दुहानः ।

३ ।—लुप छेदने तुदा० उभ० अनिट् । लुम्पति, लुम्पते, अलुपत्, अलुप्त, लुलोप, लुलुपे, लुप्तः, लुप्तिः, लुप्त्वा, लुम्प-न्-मानः ।

मस्ज सशिरस्कस्नाने तुदा० प० अनिट् । मज्जति, अमाङ्क्षीत्, ममज्ज, मग्नः, मङ्क्तिः, मङ्क्त्वा, मज्जन् ।

४ ।—भृ भरणे जुहो० प० अनिट् । बिभर्त्ति, बिभृतः, बिभ्रति, बिभर्षि, बिभृथः, बिभृथ, बिभर्मि, बिभृवः, बिभृमः, बिभृयात्, बिभर्त्तु, बिभृताम्, बिभ्रतु, बिभृहि, बिभराणि, अबिभः । अभार्षीत्, बिभराम्-बभूव-आस चकार बभार, आमभावपक्षे बभ्रतुः, बभर्थ, भरिष्यति । भृतः, भृतिः, बिभ्रत् ।

५ ।—षे(से)व सेवने भ्वा० आ० सेट् । सेवते, असेविष्ट । सेवितः सेवमानः ।

श्रि सेवने भ्वा० उभ० सेट् । श्रयति, श्रयते, अशिश्रियत्-त, शिश्राय, शिश्रिये । श्रितः, श्रितिः । श्रयितुम्, श्रयन्, श्रयमाणः ।

विज भये कम्पे च तु० आ० सेट्। विजते, अविजिष्ट, विविजे, विग्नः विग्निः, विजमानः।

६ ।—दृश दर्शने भ्वा० प० अनिट्। पश्यति, अदर्शत्,-अद्राक्षीत्, ददर्श, द्रक्ष्यति, दृष्टः, दृष्टिः, द्रष्टुम्, दृष्ट्वा, पश्यन्।

विद ज्ञाने अदा० प० सेट्। वेद-वेत्ति, विदतुः-वित्तः, विदुः-विदन्ति, वेत्थ-वेत्सि, अवेदीत्, विवेद, विदितः, वित्तिः, वेदितुम्, विदित्वा, विदन्।

७ ।—व्रज गतौ भ्वा०प०सेट्। व्रजति, अव्राजीत्, वव्राज, व्रजितः, व्रजन्।

८ ।—पूर पूर्त्तौ चुरा०उभ०सेट्। पूरयति, पूरयते, अपूपुरत्-त पूरयाम्-आस,-बभूव, चकार। पूर्णः-पूरितः, पूरय-न्-मानः।

गै गाने भ्वा० प० अनिट्। गायति, अगासीत्, जगौ, गीतः, गीतिः गातुम्, गीत्वा, गायन्।

इष वाञ्छायाम् तु०प०सेट्। इच्छति, ऐच्छत्, ऐषीत्, इयेष, एषिता, एष्टा, इष्टः, इष्टिः, एषित्वा,-इष्ट्वा, एषितुम्, एष्टुम्, इच्छन्।

गम गतौ भ्वा०प०अनिट्। गच्छति, अगच्छत्, अगमत्, जगाम, गमिष्यति। गतः, गतिः, गन्तुम्, गत्वा, गच्छन्।

९ ।—नी प्रापणे भ्वा०उभ०द्विक०अनिट्। नयति, नयते, अनैषीत्, अनेष्ट, निनाय, निन्ये, नीतः, नीतिः, नेतुम्, नयन्, नयमानः।

स्रु धारणे भ्वा०प०अनिट्। स्रवति, असुस्रुवत्, सुस्राव, स्रुतिः, स्रवन्।

सू (षू) प्रसवे अदा०आ०वेट्। सूते, सुवे, असूत, असविष्ट,-असोष्ट, सुषुवे। सूतिः, सूत्वा, सुवानः।

भिद विदारणे रुधा० प० अनिट्। भिनत्ति, अभैत्सीत्, बिभेद। भिन्नः, भित्तम् (सकलम्) भित्तिः, भिन्दन्।

रक्ष पालने भ्वा०प०सेट्। रक्षति, अरक्षीत्, ररक्ष, रक्षितः। रक्षन्।

१० ।—क्षी क्षये दि० आ० अनिट्। क्षीयते, अक्षास्त-अक्षेष्ट, चिक्ये, क्षीणः, क्षीतिः, क्षातुम्-क्षेतुम्, क्षीयमाणः।

११ ।—सृप गतौ भ्वा० पर० अनिट्। सर्पति, असृपत्, असाप्सीत्, असार्प्सीत्, ससर्प, सृप्तः, सृप्तिः, सप्तुम्-सर्प्तुम्, सर्पन्।

कृ करणे तना० उभ० अनिट्। करोति, कुरुते, अकार्षीत्, अकृत, चकार, चक्रे, करिष्यति,-ते, कृतः, कृतिः, कर्तुम्, कुर्वन्, कुर्वाणः।

१५।—वह प्रापणे भ्वा० उभ० अनि०। वहति, वहते, अवाक्षीत्, अवोढ, उवाह, ऊहे, वोढा, वक्ष्यति, ऊढः, ऊढिः, वोढुम्, वहन्, वहमानः।

१६।—वृत वर्तने भ्वा० आत्म० लुङि लृटि लृङि च उ० सेट्। वर्तते, अवृतत्, अवर्तिष्ट, ववृते, वर्त्स्यति, वर्तिष्यते, वृत्तः, वृत्तिः, वर्तमानः।

१७।—ईक्ष दर्शने भ्वा० आ० सेट्। ईक्षते, ऐक्षिष्ट, ईक्षाञ्चक्रे, ईक्षितः, ईक्षमाणः।

१८।—यम उपरमे भ्वा० प० अनिट्। यच्छति, अयंसीत्, ययाम, येमतुः, यतः, यतिः, यन्तुम्, यमित्वा, यान्त्वा, यच्छन्।

२०।—बन्ध बन्धने क्र्यादि० प० अनिट्। बध्नाति, अबान्त्सीत्, बबन्ध, बद्धः, बद्धिः, बन्धुम्, बद्ध्वा, बध्नन्।

छिद् छेदने रु० उभ० अनिट्। छिनत्ति, छिन्ते, अच्छिनत्, अच्छैत्सीत्, अच्छित्त, चिच्छेद, चिच्छिदे, छिन्नः, छित्तिः, छेत्तुम्, छिन्दन्, छिन्दानः।

क्रुध कोपे दि० प० अनिट्। क्रुध्यति, अक्रुधत्, चुक्रोध, क्रुद्धः, क्रोद्धुम्, क्रुध्यन्।

२१।—युज युतौ रु० उभ० अनिट्। युनक्ति, युञ्जन्ति, युङ्क्ते, अयौक्षीत्, अयुजत्, अयुक्त, युयोज, युयुजे, युक्तः, युञ्जन्, युञ्जानः।

पद गतौ दि० आ० अनिट्। पद्यते, अपादि, पेदे, पन्नः, पत्तिः पद्यमानः।

२४।—काश प्रकाशे भ्वा० आत्म० सेट्। काशते, अकाशिष्ट, काशाम् आस-बभूव-चक्रे, चकाशे, काशितः, काशमानः।

२५।—वृध वर्द्धने भ्वा० आ० वृतवत् उभ० सेट्। वर्द्धते, अवृधत्, अवर्द्धिष्ट, ववृधे, वर्त्स्यति, वर्द्धिष्यते, वृद्धः, वृद्धिः, वर्द्धमानः।

पुष पोषणे दि० प० अनिट्। पुष्यति, अपुषत्, पुपोष, पुष्टः, पुष्टिः, पोष्टुम्, पुष्यन्।

२६।—ह्वे आह्वाने भ्वा० उभ० अनिट्। ह्वयति-ते, अह्वत्, अह्वत, जुहाव, हूतः, हूतिः, ह्वातुम्, हूत्वा, ह्वयन्, ह्वयमानः।

षि(सि)ध गतौ भ्वा० प० सेट् । सेधति, असेधीत्, सिषेध, सिद्धः, सिद्धिः, सेधित्वा,-सिद्ध्वा, सेधितुम्, सेधन् ।

२८ ।—पू शोधने क्र्या० उभ० सेट् । पुनाति, पुनीते, अपावीत्, अपविष्ट, पुपाव, पुपुवे । पूतः-पूनः, (नाशे) पूतिः, पवित्वा, पूत्वा, पुनन्, पुनानः ।

२९ ।—रम क्रीडने भ्वा० आ० अनिट् । रमते, अरंस्त, रेमे, रतः, रतिः, रन्तुम्, रमित्वा,-रन्त्वा, रममाणः ।

विश प्रवेशने तु० प० अनिट् । विशति, अविक्षत्, विवेश, वेक्ष्यति, विष्टः, विष्टिः, विशन् ।

१२ ।—भज भागे भ्वा० उभ० अनिट् । भजति-ते, अभाक्षीत्, अभक्त, बभाज, भेजे, भक्तः, भक्तिः, भक्तुम्, भजन्, भजमानः ।

२१ ।—गृ उद्गमने तु० प० सेट् । गिरति, अगारीत्, जगार, गरितुम्, गरीतुम्, गीर्णः, गीर्णिः, गिरन् ।

हृ हरणे भ्वा० उभ० अनिट् । हरति-ते, अहार्षीत्, अहृत, जहार, जह्रे, हरिष्यति-ते, हृतः, हृतिः, हर्तुम्, हृत्वा, ह्रियमाणः ।

१५ ।—अस गतिदीप्त्यादौ भ्वा० प० सेट् । असति, आसीत्, आस, असन् ।

यत यत्ने भ्वा० आ० सेट् । यतते, अयतिष्ट, येते, यत्तः, यत्तिः, यतमानः ।

२६ ।—लभ प्राप्तौ भ्वा० आ० अनिट् । लभते, अलब्ध, लेभे, लब्धः, लब्धिः, लब्धुम्, लब्ध्वा, लभमानः ।

न(ण)ह बन्धने दि० उभ० अनिट् । नह्यति-ते, अनात्सीत्, अनद्ध, ननाह, नेहे, नद्धः, नद्धिः, नद्धुम्, नह्यन्, नह्यमानः ।

जन जनने दि० आ० सेट् । जायते, अजनि-अजनिष्ट, जज्ञे, जातः, जातिः, जनितुम्, जायमानः ।

२७ ।—मा माने अ० प० अनिट् । माति, अमासीत्, ममौ, मितः, मितिः, मातुम्, मित्वा, मान् ।

१८ ।—राज दीप्तौ भ्वा० उभ० सेट् । राजति-ते, अराजीत्, अराजिष्ट, रराज, रेजे, राजितः, राजित्वा, राजमानः ।

क्रम क्रमणे भ्वा० प० सेट् । क्रामति-क्राम्यति, अक्रमीत्, चक्राम, क्रान्तः,

क्रान्तिः, क्रमितुम्, क्रमित्वा, क्रान्त्वा, क्राम्यन्, क्रमन् ।

४१ ।—जि जये भ्वा०प०अनिट् । जयति, अजैषीत्, जिगाय, जितः, जितिः, जेतुम्, जिष्णुः, जित्वा, जयन् ।

४२ ।—भुज भक्षे रु० आ० अनिट् । भुङ्क्ते, अभुक्त, बुभुजे । भुक्तः, भुक्तिः, भोक्तुम्, भुञ्जानः, अवने प० भुनक्ति, बुभोज ।

आप प्राप्तौ स्वा० प० अनिट् । आप्नोति, आपत्, आप, आप्तः, आप्तिः, आप्नुवन् ।

४६ ।—ग्रह ग्रहणे क्र्या०उभ०सेट् । गृह्णाति, गृह्णीते, अग्रहीत्, अग्रहीष्ट, जग्राह, जगृहे, गृहीतः, गृहीतिः, ग्रहीतुम्, गृहीत्वा, गृह्णन्, ग्राहकः ।

४७ ।—मुच मोचने तु० उभ० अनिट् । मुञ्चति,-ते, अमुचत्, अमुक्त, मुमोच, मुमुचे, मुक्तः, मुक्तिः, मोक्तुम्, मुक्त्वा, मुञ्चन्-मानः ।

५० ।—दिश देशने तु० उभ० अनिट् । दिशति,-ते, अदिक्षत्,-त दिदेश, दिदिशे, दिष्टः, दिष्टिः, देष्टुम्, दिशन्-मानः ।

५१ ।—अर्ह योग्यतायाम् भ्वा०प०सेट् । अर्हति, आर्हीत्, आनर्ह, अर्हितः अर्हन् ।

५२ ।—याच प्रार्थने भ्वा० उभ० द्वि० सेट् । याचति,-ते, अयाचीत्, अयाचिष्ट, ययाच, ययाचे, याचितः, याचित्वा, याचन्,-मानः ।

शक शक्तौ स्वा० प० अनिट् । शक्नोति, शक्नुतः, शक्नुवन्ति, अशकत्, शक्तः, शक्तिः, शक्नुवन् । लबि ध्वंसने भ्वा० आ० सेट् । लम्बते, अलम्बिष्ट, ललम्बे, लम्बितः, लम्बमानः ।

५३ ।—सृज विसर्गे तु० प० अनिट् । सृजति, असाक्षीत्, ससर्ज, सृष्टः, सृष्टिः, स्रष्टुम्, सृजन् ।

५४ ।—वस आच्छादने अ० आ० सेट् । वस्ते, अवसिष्ट, ववसे, वसितः वस्तिः, वसितुम्, वसानः ।

वस निवासे भ्वा० प० अनिट् । वसति, अवात्सीत्, उवास, ऊषतुः, उषितः, उष्टिः, वस्तुम्, उषित्वा, वसन् ।

५५ ।—धा धारणे जु०उभ० अनिट् । दधाति, धत्ते, अधात्, अधित; दधौ, दधे, हितः, हितिः, हित्वा, दधत्, दधानः ।

व[ष]ह गतौ अवधारे तु० प० अनिट्। चोदति, अचदह, चचाह, चेदतुः, चन्नः, चत्तिः, चत्तुम्, चोदन्।

५६ ।—चिक्ष सेचने तु० प० सेट्। चिक्षति, अचेक्षीत्, चिचेक्ष, चिक्षितः।

न[ष]द शब्दे भ्वा० प० सेट्। नदति, अनादीत्, अनदीत्, नदितः, नदन्।

५७ ।—इन्ध दीप्तौ भ्वा० आ० सेट्। इन्धते, ऐन्धिष्ट। इद्धः, इन्धमानः।

चर गमने भ्वा० प० सेट्। चरति, अचारीत्, चचार, चेरतुः, चरितः, चूर्णिः, चरन्।

५८ ।—अर्च पूजने भ्वा० प० सेट्। अर्चति, आर्चीत्, आनर्च, अर्चितः, अर्चन्।

५९ ।—मन बोधे दि० आ० अनिट्। मन्यते, अमंस्त, मेने, मतः, मतिः। मन्तुम्, मत्वा, मन्यमानः।

६० ।—मृज शोधने अ० प० सेट्। मार्ष्टि, मृष्टः, मार्जन्ति, मृजति, अमार्जीत्,-अमार्क्षीत्, अमार्क्षीत्, ममार्ज, मृष्टः, मार्जितम्, मार्ष्टुम्, मृष्टुम्, मार्जन्, मृजन्।

द्वितीयसर्गः।

१ ।—या गतौ अ० प० अनिट्। याति, अयात्, अयुः,-अयान्, अयासीत्, ययौ, यातः, यातिः, यान्।

४ ।—इ गतौ अ० प० अनिट्। एति, इतः, यन्ति, एषि, अगात्, इयाय, एष्यति, इतः, एतुम्, इतिः, इत्वा, यन्।

५ ।—वप बीजवपने भ्वा० उभ० अनिट्। वपति,-ते, अवाप्सीत् अवाप्त, उवाप, ऊपे, उप्तः, वप्तुम्, उप्त्वा, वपन्,-मानः।

६ ।—ईर गतौ चु० उ० भ्वा० प० सेट्। ईरयति-ते, ईरति, ऐरिरत्-त, ऐरीत, ईरयाञ्चकार, चक्रे, बभूव, ईरयामास, ईरितः, ईरयन्, ईरयमाणः, ईरन्।

७ ।—ऋ गतौ भ्वा० प० अनिट्। ऋच्छति, आर्षीत्, आर, अरिष्यति, ऋतः, ऋतिः, अरन्, अर्त्तुम्, अरन्।

१२ ।—ग्लै हर्षक्षये भ्वा० प० अनिट्। ग्लायति, अग्लासीत्, जग्लौ,

म्नातः, म्नातिः, म्नातुम्, मनन् ।

१५ ।—ध्यै चिन्तायाम् भ्वा० प० अनिट् । ध्यायति, अध्यासीत्
दध्यौ, ध्यातः, ध्यातिः, ध्यातुम्, ध्यात्वा, ध्यायन् ।

१६ ।—श्रु श्रवणे भ्वा० प० अनिट् । शृणोति, शृणुतः, शृण्वन्ति,
शृणोतु, अश्रौषीत्, शुश्राव, श्रुतः, श्रुतिः, श्रोतुम्, शृण्वन् ।

वच कथने अ० प० अनिट् । वक्ति, वक्तः, वक्तु, अवोचत्, उवाच,
ऊचतुः, ऊचुः । उक्तः, उक्तिः, वक्तुम् उक्त्वा, वचन् ।

२० ।—लक्ष दर्शने चु० उभ० सेट् । लक्षयति-ते, अललक्षत्-त, लक्ष-
याम् आस-बभूव-चकार-चक्रे, लक्षितः, लक्षयितुम् । लक्षयित्वा,
लक्षयन्, लक्षयमाणः ।

२२ ।—शन्स कथने भ्वा० प० सेट् । शंसति, अशंसीत्, शशंस,
शस्तः, शस्तिः, शंसितुम्, शंसित्वा-शस्त्वा, शंसन् ।

२८ ।—ब्रू कथने दि० उभ० सेट् द्वि० । ब्रवीति-आह, ब्रूतः-
आहतुः, ब्रुवन्ति, आहुः । अवोचत्-त, उवाच, ऊचतुः, ऊचे,
वक्ष्यति, उक्तः, उक्तिः, वक्तुम्, उक्त्वा, ब्रुवन्, ब्रुवाणः ।

अर्थ याचने चु० आ० द्वि० सेट् । अर्थयते, आर्तिथत, अर्थयाम्
बभूव, आस, चक्रे । अर्थितः, अर्थयितुम्, अर्थयित्वा अर्थयमानः ।

२९ ।—शुभ दीप्तौ भ्वा० आ० सेट् । शोभते, अशुभत्, अशोभिष्ट,
शुशुभे, शोभितः, शुभित्वा, शोभितुम्, शोभमानः ।

३१ ।—मृश मर्षने तु० प० अनिट् । मृशति, अम्राक्षीत्, अमा-
र्क्षीत्, अमृक्षत्, ममर्श, म्रक्ष्यति-मर्क्ष्यति, मृष्टः मृष्टिः, म्रष्टुम्,
मर्ष्टुम् मृष्ट्वा, मृशन् ।

ज्ञा बोधे क्र्या० प० अनिट् । जानाति, अज्ञासीत्, जज्ञौ, ज्ञातः,
ज्ञातिः, ज्ञात्वा, जानन् ।

३२ ।—तन विस्तृतौ तना० उभ० सेट् । तनोति, तनुते, अतानीत्
अतनीत्, अतत-अतनिष्ट, ततान, तेने, ततः, ततिः, तनित्वा,
तत्वा, तन्वन् ।

दा दाने जु० उभ० अनिट् । ददाति, दत्तः, ददति, दत्ते, ददाते,
ददते, अदात्, अदित ददौ, ददे, दत्तः, दत्तिः, दातुम्, दत्त्वा,

इच्छन्, इच्छानः ।

३९ ।—वा गमने अ० प० अनिट् । वाति, अवासीत्, ववौ वातः वातिः, वातुम् वात्वा, वान् ।

३९ ।—क्लिश बाधने क्र्या० प० वेट् । क्लिश्नाति, क्लिश्नीतः, क्लिश्नन्ति । अक्लेशीत्, अक्लिक्षत्, चिक्लेश । क्लिष्टः, क्लिष्टिः । क्लेशितुम्, क्लेष्टुम्, क्लेशित्वा क्लिष्ट्वा, क्लिश्नन् ।

४० ।—लूञ् छेदने क्र्या० उभ० सेट् । लुनाति, लुनीते, अलावीत्, अलविष्ट लुलाव, लुलुवे, लूनः, लूनिः, लुनन्, लुनानः ।

शम शान्तौ दि० प० सेट् । शाम्यति, अशमीत्, अशमत् शशाम । शान्तः, शान्तिः । शमितुम् शमित्वा, शान्त्वा, शाम्यन् ।

४२ ।—वीज व्यजने अ० चु० उभ० सेट् । वीजयति-ते अविवीजत्-त, वीजयामास । वीजितः, वीजयन् वीजयमानः ।

४३ ।—स्व(ष्व)प शयने अ० प० अनिट् । स्वपिति, अस्वाप्सीत्, सुष्वाप, सुप्तः सुप्तिः, सुप्त्वा, स्वप्तुम्, स्वपन् ।

४४ ।—पट दीप्तौ चु० उ० सेट् । पाटयति-ते, अपीपटत्-त । पाटितः, पाटयन्, पाटयमानः ।

४५ ।—चुट प्रेषणे स्व० उभ० सेट् । चुटुनोति चुनुते, अचुटत्,-अचोटीत्, अचोटिष्ट, चुचोट, चुचुटे, चुटः चुन्वन्, चुन्वानः ।

४६ ।—यज देवपूजनादौ भ्वा० उभ० अनिट् । यजति-ते, अयाक्षीत् अयष्ट । इयाज, ईजे, इष्टः, इष्ट्वा, यष्टुम्, यजन्-मानः ।

४८ ।—हन हिंसायाम् अ० प० अनिट् । हन्ति, हतः, घ्नन्ति । हन्यात्, हन्तु, हताम्, घ्नन्तु, जहि, अवधीत्, जघान, हनिष्यति, हतः हतिः, हन्तुम्, हत्वा, घ्नन्, जघ्निवान् ।

५० ।—अस क्षेपणे दि० प० सेट् । अस्यति, आस्थत्, आस, अस्तः, अस्तिः, असितुम्, असित्वा, अस्त्वा, अस्यन् ।

५२ ।—गुप रक्षणे भ्वा० प० वेट् । गोपायति, अगोपायीत्, अगोपीत्, अगौप्सीत्, जुगोप, गुप्तः गुप्तिः । गोपायितुम्, गोपितुम्, गोप्तुम्, गोपायित्वा, गोपित्वा, गुप्त्वा, गोपायन् ।

५३ ।—षो [सो] नाशे दि० प० अनिट् । स्यति, असात्, असासीत् ससौ,

चितः, चितिः, चातुम्, चित्वा, चम् ।

जि जये भ्वा० प० अनिट् । जयति, अजैषीत्, जिगाय, जितः, जितिः, जेतुम्, जित्वा, जयन् ।

६३ ।—चि चयने स्वा० उभ० द्वि० अनिट् । चिनोति, चिनुते, अचैषीत् अचेष्ट, चिकाय, चिचाय, चिक्ये, चिच्ये, चित्वा, चितः चितिः, चेतुम्, चिन्वन् चिन्वानः ।

६४ ।—स (ष) ञ्ज् सङ्गे भ्वा० प० अनिट् । सजति, असाङ्क्षीत्, ससञ्ज, सक्तः, सक्तिः सक्तुम्, सक्त्वा, सजन् ।

तृतीय सर्ग ।

१ ।—हा त्यागे जु० प० अनिट् । जहाति, जहीतः, जहितः, जहति, जहातु, जहीहि जहिहि, जहाहि, अहासीत्, जहौ, हीनः, हानिः, हातुम्, हित्वा, जहत् ।

पत पतने भ्वा० प० सेट् । पतति, अपप्तत् पपात, पेततुः । पतितः पतिः, पतितुम्, पतित्वा, पतन् ।

२ ।—कृष कर्षणे भ्वा० प० अनिट् । कर्षति, अक्राक्षीत्, अकार्क्षीत्, अकृक्षत्, चकर्ष । कृष्टः, कृष्टिः, क्रष्टुम्, कर्ष्टुम्, कृष्ट्वा, कर्षन् ।

८ ।—धू कम्पने स्वा० क्र्या० भ्वा० उभ० वेट् । धूनोति, धूनुते, धुनाति, धुनीते, धवति-ते, अधावीत्, अधविष्ट अधोष्ट । धूतः, धूतिः, धवितुम् धोतुम्, धून्वन्, धून्वानः धुनन्, धुनानः, धवन्, धवमानः ।

६ ।—श्रम आयासे भ्वा० प० सेट् । श्राम्यति, अश्रमीत्, अश्रमत्, शश्राम, श्रान्तः, श्रान्तिः, श्रमित्वा, श्राम्यन् ।

भी भये जु० प० अनिट् । बिभेति, अभैषीत्, बिभाय, भीतः भीतिः, भेतुम्, बिभ्यत् ।

च्यु गतौ भ्वा० आ० अनिट् । च्यवते, अच्योष्ट, चुच्युवे, च्युतः च्युतिः, च्योतुम् च्युत्वा, च्यवमानः ।

तॄ तरणे भ्वा० प० सेट् । तरति, अतारीत्, ततार, तीरतुः तीर्णः तरितुम्, तरीतुम्, तीर्त्वा तरन् ।

११ ।—वृ वरणे स्वा० क्र्या० उभ० । वृणोति, वृणुते, वृणाति वृणीते

अवारीत्, अवरिष्ट, अवरीष्ट, अवृत । ववार, वव्रे, वृतः, वृतिः, वृण्वन्, वृण्वानः ।

भाष कथने भ्वा० आ० सेट् । भाषते, अभाषिष्ट, बभाषे, भाषितः, भाषितुम्, भाषमाणः ।

१३ ।—युज युजौ रु० उभ० अनिट् । युनक्ति, अयुजत्, अयौक्षीत्, अयुक्त, युयोज । युक्तः, युञ्जन् ।

१४ ।—बुध बोधने भ्वा० प० अनिट् । बोधति, अभात्सीत्, बुबोध । बुद्धः, बुद्धिः, बोद्धुम्, बोधन् ।

१५ ।—वश इच्छायाम् अ० प० सेट् । वष्टि, उष्टः, उशन्ति, वक्षि, उष्ठः, उष्ठ, वश्मि, उश्मः । वष्टु, उष्टाम्, उशन्तु, अवाशीत्, अवशीत्, उवाश, ऊशतुः । उशितः, उष्टिः, वशितुम्, उशित्वा, उशन् ।

२० ।—स्पृह इच्छायाम् अक० चु० उभ० सेट् । स्पृहयति-ते, अपस्पृहत्-त, स्पृहयामास, स्पृहितः स्पृहयितुम्, स्पृहयित्वा, स्पृहयन्-माणः ।

२२ ।—स्पृश स्पर्शने तु० प० अनिट् । स्पृशति, अस्पृक्षत्, अस्प्राक्षीत् अस्पार्क्षीत्, पस्पर्श । स्पृष्टः, स्पृष्टिः, स्प्रष्टुम् स्पर्ष्टुम्, स्पृष्ट्वा, स्पृशन् ।

२४ ।—जृम्भ जृम्भणे भ्वा० आ० सेट् । जृम्भते, अजृम्भिष्ट, जजृम्भे, जृम्भितः, जृम्भित्वा, जृम्भमाणः ।

२८ ।—दु अनुतापे स्वा० प० वेट् । दुनोति, दुनुतः, दुन्वन्ति, अदावीत्, अदौषीत्, दुदाव, दूनः, दवितुम्-दोतुं, दुन्वन् ।

२८ ।—भा दीप्तौ अ० प० अनिट् । भाति, अभासीत्, बभौ, भातः, भातिः, भातुम्, भात्वा, भान् ।

३२ ।—कूज अव्यक्तशब्दे भ्वा० प० सेट् । कूजति, अकूजीत्, चुकूज, कूजितः, कूजितुम्, कूजन् ।

३६ ।—पा पाने भ्वा० प० अनिट् । पिबति, अपात्, पपौ, पीतः, पीतिः । पातुम्, पीत्वा, पिबन् पाययन् ।

३८ ।धुक्षि धुक्षने चु० उभ० भ्वा० प० सेट् । धुक्षयति-ते, धुक्षति,

अचुचुम्बत्-त, अचुम्बीत्, चुम्बयामास, चुचुम्ब, चुम्बितः, चुम्बयमा-
मानः, चुम्बन् ।

४० ।—स्फुर स्फूर्तौ तु॰ प॰ सेट् । स्फुरति, अस्फुरीत्, पुस्फोर,
स्फुर्त्तिः, स्फुरितुम्, स्फुरन् ।

४२ ।—शास शासने अ॰ प॰ सेट् । शास्ति, शिष्टः, शासति, अशा-
सत्, शशास । शिष्टः, शिष्टिः, शासितुम्, शिष्ट्वा, शासत् ।

४५ ।—फुल्ल विकासे भ्वा॰ प॰ सेट् । फुल्लति, अफुल्लीत्, पुफुल्ल,
फुल्लितः फुल्लिः, फुल्लितुम्, फुल्लन् ।

४७ ।—स्पन्द ईषत् कम्पे भ्वा॰ आ॰ सेट् । स्पन्दते, अस्पन्दिष्ट,
पस्पन्दे, स्पन्दितः स्पन्दितुम्, स्पन्दमानः ।

४८ ।—रुध आवरणे रु॰ उभ॰ अनिट् । रुणद्धि रुन्धः, रुन्धन्ति,
अरुणत्, अरुणः, अरुधत्, अरौत्सीत्, अरुद्ध, रुरोध, रुरुधे, रुद्धः,
रुद्धिः, रोद्धुम्, रुद्ध्वा, रुन्धन्, रुन्धानः ।

४९ ।—ग्लै विषादे भ्वा॰ प॰ अनिट् । ग्लायति, अग्लासीत्, जग्लौ,
ग्लानः, ग्लानिः, ग्लातुम्, ग्लात्वा, ग्लायन् ।

५० ।—लोक दर्शने भ्वा आ॰ सेट् । लोकते, अलोकिष्ट, लुलोके
लोकितः लोकितुम् लोकित्वा । लोकमानः ।

५२ ।—धृष हिंसायाम् भ्वा॰ प॰ सेट् । धर्षति, अधर्षीत्, दधर्ष,
दधृषतुः धर्षितः धृष्टः । धर्षितुम्, धर्षन् ।

स्रंस् भ्रंशे भ्वा॰ आ॰ सेट् । स्रंसते, अस्रंसत्, अस्रंसिष्ट ।
स्रस्तः, स्रस्तिः, स्रंसितुम् । स्रंसमानः ।

५३ ।—भुज सन्दीपने भ्वा॰ आ॰ सेट् । भुजते, अभुजिष्ट, बुभुजे ।
भुजमानः ।

५९ ।—भर्त्स भर्त्सने चु॰ उभ॰ सेट् । भर्त्सयति-ते, अबभर्त्सत्-त,
भर्त्सितः, भर्त्सयितुम् । भर्त्सयन्-मानः ।

६० ।—क्षिप प्रेरणे तु॰ उभ॰ अनिट् । क्षिपति-ते, अक्षैप्सीत्, अक्षिप्त,
चिक्षेप, चिक्षिपे, क्षिप्तः, क्षिप्तिः, क्षेप्तुम् क्षिप्त्वा, क्षिपन् ।

कॄ विक्षेपे तु॰ प॰ सेट् । किरति, अकारीत्, चकार, कीर्णः कीर्णिः,
करितुम् करीतुम्, कीर्त्वा, किरन्, करीष्यन्, करिष्यन् ।

६२ ।—म [ण] म नमने भ्वा० प० अनिट् । नमति, अनंसीत्, ननाम, नेमतु, नतः, नतिः, नन्तुम्, नत्वा, नमन् ।

६३ ।—पुष पुष्टौ क्र्या० प० सेट् । पुष्णाति, पुष्णीतः, पुष्णन्ति, अपोषीत्, पुपोष, पुष्टः, पुष्टिः, पुष्णन्, पोषितुम् ।

७४ ।—भन्ज भञ्जने रु० प० अनिट् । भनक्ति, अभाङ्क्षीत्, बभञ्ज, भग्नः, भक्तिः, भञ्जन् ।

चतुर्थ सर्ग ।

२ ।—मिष, स्पर्द्धायाम् तु० प० सेट् । मिषति, अमेषीत्, मिषितः, मिष्टिः, मेषितुम्, मेषित्वा, मिषन् ।

३ ।—जीव प्राणने भ्वा० प० सेट् । जीवति, अजीवीत्, जीवितः जीवितुम्, जीवित्वा, जीवन् ।

४ ।—लप भाषणे भ्वा० प० सेट् । लपति, अलापीत्-अलपीत्, ल-लाप, लेपतुः, लपितः, लप्तिः । लपितुम्, लपित्वा, लपन्, लपिष्यन् ।

६ ।—द्रु गतौ प० भ्वा० अनिट् । द्रवति, अदुद्रुवत्, दुद्राव, द्रुतः, द्रुतिः, द्रोतुम्, द्रुत्वा, द्रवन् ।

१२ ।—घूर्ण भ्रमणे तु० उभ० सेट् । घूर्णति-ते, अघूर्णीत्, अघू-र्णिष्ट, जुघूर्ण, जुघूर्णे, घूर्णितः, घूर्णितुम्, घूर्णित्वा, घूर्णन् ।

स्खल चलने भ्वा० प० सेट् । स्खलति, अस्खालीत् चस्खाल, स्खलितः, स्खलितुम्, स्खलित्वा, स्खलन् ।

१५ ।—रु ध्वनौ अ० प० सेट् । रवीति-रौति, रुतः रुवन्ति, अरावीत्, अरौषीत्, रराव, रुतः, रुतिः, रोतुम्, रवितुम्, रुत्वा, रुवन् ।

१५ ।—रुद रोदने अ० प० सेट् । रोदिति, रुदितः, रुदन्ति, अरुदत्-अरोदीत्, ररोद, रुदितः, रुत्तिः, रोदितुम्, रुदित्वा, रुदन् ।

१७ ।—गुह संवरणे । उभ० भ्वा० सेट् । गूहति-ते, अगूहीत् अघुक्षत, अगूहिष्ट, अगूढ, जुगूह, जुगुहे । गूढः, गूढिः, गूहितुम्, गोढुम्, गूढ्वा, गूहन्, गूहमानः ।

१८ ।—रच रचने अ० चु० उभ० सेट् । रचयति-ते, अररचत्-त,

रचितः, रचयितुम् । रचयन्-मानः । [हृत्वा, ध्रियमाणः ।
ध्रुङ् स्थितौ तु० आ० अनिट् । ध्रियते, अधृत, दध्रे, धृतः, धृतिः, धर्तुम्,
२६ ।—बाध विघाते भ्वा० आ० सेट् । बाधते अबाधिष्ट, बबाधे,
बाधितः, बाधितुम्, बाधित्वा । बाधमानः ।
२७ ।—सह मर्षणे भ्वा० आ० सेट् । सहते, असहिष्ट, सेहे,
सोढ़ः, सोढ़िः, सहितुम्-सोढुम् । सहमानः ।
२८ ।—शुष शोषे दि० प० अनिट् । शुष्यति, अशुषत्, शुशोष ।
शुष्कः, शुष्यन् ।
३१ ।—लष इच्छायाम् दि० भ्वा० उभ० सेट् । लष्यति-ते, लषति-
ते, अलाषीत्, अलषीत्, अलषिष्ट, ललाष, लेषतुः, लेषे, लषितः,
लष्टिः, लषितुम्, लषित्वा, लषन्, लष्यन् ।
शप आक्रोशे भ्वा० उभ० अनिट् । शपति-ते, अशाप्सीत्, अशप्त,
शशाप, शेपे, शप्तः, शप्तिः, शप्तुम्, शप्त्वा, शपन्-मानः ।
३४ ।—रक्ष पालने भ्वा० प० सेट् । रक्षति, अरक्षीत्, ररक्ष,
रक्षितः, रक्षितुम्, रक्षित्वा, रक्षन् ।
३५ ।—श्वस प्राणने अ० प० सेट् । श्वसिति, श्वसितः, श्वसन्ति,
अश्वसीत् शश्वास, श्वसितः, श्वस्तिः, श्वसितुम्, श्वसन् ।
४६ ।—पाल रक्षणे चु० उभ० सेट् । पालयति-ते, अपीपलत्-त,
पालितः । पालयन्-मानः ।
४६ ।—क्षि क्षये भ्वा० प० अनिट् । क्षयति, अक्षैषीत्, चिक्षाय,
क्षीणः, क्षितः, क्षयन् ।

पञ्चम सर्ग ।

१ ।—दह दाहे भ्वा० प० अनिट् । दहति, अधाक्षीत्, ददाह,
देहतुः, दग्धः, दग्धिः । दग्धुम्, दग्ध्वा, दहन् ।
[णि] दि निन्दायाम् भ्वा० प० सेट् । निन्दति, अनिन्दीत्,
निनिन्द, निन्दितः, निन्दितुम् निन्दित्वा, निन्दन् ।
।—तुष तोषे दि० प० अनिट् । तुष्यति, अतुषत्, तुतोष, तुष्टः,
तुष्टिः, तोष्टुम्, तुष्ट्वा, तुष्यन् ।

दविहुम्, दूत्वा, दूयमानः।

शी शयने अ० आ० सेट्। शेते, शयाते, शेरते शेषे, । अशयिष्ट, शिश्ये, शयितः, शय्या, शयितुम्, शयानः।

१२ ।—वेष्ट वेष्टनायाम् भ्वा० आ० सेट्। वेष्टते अवेष्टिष्ट, विवेष्टे वेष्टितः। वेष्टमानः।

१६ ।—षिच [षिच] च सेचने तु० उभ० अनिट्। सिञ्चति-ते, असिचत्-त, असिक्त, सिषेच-सिषिचे, सिक्तः, सिक्तिः, सेक्तुम्, सिञ्चन्-मानः।

१८ ।—काङ्क्ष वाञ्छायाम् भ्वा० प० सेट्। काङ्क्षति, अकाङ्क्षीत्, चकाङ्क्ष, काङ्क्षितः, काङ्क्षित्वा, काङ्क्षन्।

२१ ।—तप दाहे भ्वा० उभ० सेट्। तपति-ते, अताप्सीत्, अतपीत्, अतप्त, तताप, तेपे, तप्तः, तपन्-मानः।

२२ ।—रिच वियोगे चु० उभ० भ्वा० प० सेट्। रेचयति-ते, रेचति, अरीरिचत्-त, अरेचीत्।

२३ ।—उक्ष सेचने भ्वा० प० सेट्। उक्षति, औक्षीत्, उक्षाम्बभूव, आस-चकार।

२६ ।—क्रन्द क्रन्दने भ्वा० प० सेट्। क्रन्दति, अक्रन्दीत्, चक्रन्द, क्रन्दितः, क्रन्दन्।

२७ ।—वेप चलने भ्वा० आ० सेट्। वेपते, अवेपिष्ट, विवेपे, वेपितः, वेपमानः।

२८ ।—शॄ हिंसने क्र्या० प० सेट्। शृणाति, अशारीत्, शशार, शेरतुः, शीर्णः, शृणन्।

वद व्यक्तायां वाचि भ्वा० प० सेट्। वदति, अवादीत्, उवाद, ऊदतुः, उदितः, उक्तिः, वदितुम्, उदित्वा, वदन्।

३० ।—धृ धारणे चु० उभ० अनिट्। धारयति-ते, अदीधरत्-त, धारयन्-माणः।

३२ ।—उज्झ त्यागे तु० प० सेट्। उज्झति, औज्झीत्, उज्झाञ्चकार, उज्झितः, उज्झित्वा, उज्झन्।

३३ ।—शम शमने दि० प० सेट्। शाम्यति, अशमीत्, शशाम, शान्तः, शान्तिः, शमितुम्, शमित्वा, शान्त्वा, शाम्यन्।

२४ ।—रुह रोहणे भ्वा० प० अनिट् । रोहति, अरुक्षत्, रुरोह, रूढः, रूढिः, रोढुम्, रूढ्वा रोहन् ।

२७ —हस हासे भ्वा० प० सेट् । हसति, अहसीत्, अहासीत्, जहास, हसितः, हसितिः, हसितुम्, हसित्वा, हसन् ।

० ।—प्रच्छ जिज्ञासायाम् तु० द्विक० प० अनिट् । पृच्छति, अप्राक्षीत्, पप्रच्छ, पृष्टः, पृष्टिः, प्रष्टुम्, पृच्छन् ।

२ ।—शुच शोके भ्वा० प० सेट् । शोचति, अशोचीत्, शुशोच, शुक्तः, शुक्तिः, शोचितुम्, शोक्तुम्, शोचित्वा, शुचित्वा शुक्त्वा, शोचन् ।

लृप कल्पने भ्वा० आ० लुङि लटि लृटि लृङि च, उभ०, वेट्, कल्पते, अक्लृपत, अकल्पिष्ट, चक्लृप, चक्लृपे । क्लृप्तः, क्लृप्तिः, कल्पितुम्, कल्प्तुम् । कल्पित्वा, क्लृप्त्वा, कल्पमानः ।

८ ।—कृश तनूकरणे दि० सेट् । कृश्यति, अकृशत्, अकर्शीत् । कृशः, कृष्टिः । कृश्यन् ।

८ ।—प्लुष दाहे भ्वा० प० सेट् । प्लोषति, अप्लोषीत्, पुप्लोष, प्लुष्टः, प्लुष्टिः प्लोषितुम्, प्लुष्ट्वा, प्लोषन् ।

९ ।—वञ्च् प्रतारणे भ्वा० प० सेट् । वञ्चति, अवञ्चीत्, वञ्चितः, वञ्चन् ।

० ।—विद भावे दि० आ० अनिट् । विद्यते, अवित्त, विवेद, वित्तः, वित्तिः, वेत्तुम्, विदित्वा, विद्यमानः ।

१ ।—शक शक्तौ स्वा० प० अनिट् । शक्नोति, अशकत्, शशाक, शेकतुः, शक्तः, शक्तिः, शक्तुम्, शक्नुवन् ।

८ ।—मील निमेषणे भ्वा० प० सेट् । मीलति, अमीलीत्, मीलितः, मीला, मीलित्वा, मीलितुम्, मीलन् ।

४ ।—लघि अतिक्रमे भ्वा० आ० सेट् । लङ्घते, अलङ्घिष्ट, ललङ्घे, लङ्घितः, लङ्घितुम्, लङ्घित्वा, लङ्घमानः ।

७ ।—चिन्त चिन्तने चु० उभ० सेट् । चिन्तयति-ते, अचिचिन्तत्-त, चिन्तितः, चिन्ता, चिन्तयितुम्, चिन्तयन्-मानः ।

२ ।—[illegible]

स्मर्गयितुम्, स्मर्गयित्वा स्मर्गयमाणः ।

७५ ।—द्विष द्वेषे अ० उभ० अनिट् । द्वेष्टि, द्विष्टः, द्विषन्ति, अद्वि षत्, अद्विष्ट, दिद्वेष, दिद्विषे, द्विष्टः, द्विष्टिः, द्वेष्टुम्, द्विष्ट्वा, द्विषन् ।

७८ ।—भास दीप्तौ भ्वा० आ० सेट् । भासते, अभासिष्ट, बभासे भासितः, भासितुम् । भासित्वा, भासमानः ।

७९ ।—शुध शोधने दि० प० अनिट् । शुध्यति, अशुधत्, शुशोध, शुद्धः, शुद्धिः, शोद्धुम्, शुद्ध्वा, शुध्यन् ।

लिप लेपने तु० उभ० अनिट् । लिम्पति ते, अलिपत्, अलिपत, अलिप्त, लिलेप, लिलिपे, लिप्तः, लिप्तिः, लिम्पन्, लिम्पमानः

८० ।—घ्रा स्वप्ने अ० प० अनिट् । घ्राति, अघ्रासीत्, घ्राणः ।

८६ ।—क्री क्रये क्र्या० उभ० अनिट् । क्रीणाति, क्रीणीते, क्रीणातु अक्रैषीत, अक्रेष्ट, चिक्राय, चिक्रिये, क्रीतः, क्रीतिः, क्रेतुम्, क्रीणन् ।

षष्ठ सर्गः ।

४ ।—द्युत विद्योते भ्वा० आ० सेट् । द्योतते, अद्युतत्, अद्योतिष्ट, दिद्युते, द्युतितम्, द्योतितम्, द्योतित्वा, द्योतितुम् ।

५ ।—प्रु सर्पणे उत्प्लुत्य-गतौच भ्वा० आ० अनिट् । प्रवते अप्रोष्ट, पुप्रुवे, प्रुतः प्रुतिः, प्रुत्वा, प्रोतुम्, प्रवमानः ।

७ ।—वृज त्यागे वा चु० उभ० पक्षे भ्वा० प० सेट् । वर्जयति-ते वर्जति, अववर्जत्, अवीवृजत, अवर्जीत्, वर्जन् वर्जितः, वर्जयन्-मानः ।

८ ।—कृत कीर्त्तने चु० उभ० सेट् । कीर्त्तयति-ते, अचिकीर्त्तत्, त, कीर्त्तयाम्बभूव-आस-चकार, चक्रे, कीर्त्तितः, कीर्त्तिः, कीर्त्तयितुम्, कीर्त्तयित्वा, कीर्त्तयन् मानः ।

५४ ।—तर्क वितर्के चु० उभ० सेट् । तर्कयति ते, अततर्कत्-त ।

५८ ।—मुर्च्छ मूर्छौ भ्वा० प० सेट् । मूर्च्छति, अमूर्च्छीत्, मूर्त्तः मूर्च्छितम्, मूर्च्छन् ।

६५ ।—तुद प्रेरणे तु० उभ० अनिट् । तुदति-ते, अतौत्सीत्, अतुत्त, तुतोद, तुतुदे, तुन्नः, तुन्नः, तुत्तिः । तोत्तुम्, तुत्वा

तुदन्-मानः ।

৮৪ ।—गण संख्याने अदन्त चु० उभ० सेट् । गणयति-ते, अजी-गणत्-त, अजगणत्-त, गणितः, गणयितुम्, गणयन्-मानः ।

৬ ।—ख्या कथने अ० उभ० अनिट् । आद्येषु, चतुर्षु, लकारेषु, रूपं नास्ति । अख्यत्-त, चख्यौ, चख्ये, ख्यातः, ख्यातिः, ख्यातुम् ।

सप्तम वर्ग ।

৫ ।—अङ्क चिह्नीकरणे अदन्त चु० उभ० सेट् । अङ्कयति-ते, आञ्चिकत्-त, अङ्कयाञ्चकार-चक्रे । अङ्कितः, अङ्कयितुम्, अङ्कयित्वा, अङ्कयन् ।

৬ ।—लस्ज व्रीडायाम् भ्वा० आ० सेट् । लज्जते, अलज्जिष्ट, लग्नः ।

৮ ।—रन्ज रञ्जने दि० उभ० अनिट् । रज्यति ते, अराङ्क्षीत्, अरक्त । ररञ्ज, ररञ्जे, रक्तः, रक्तिः, रङ्क्तुम्, रज्यन् ।

৯ ।—ष्ठिव निरसने दि० प० सेट् । ष्ठीव्यति, अष्ठेवीत्, तिष्ठेव, टिष्ठेव, ष्ठ्यूतः, ष्ठ्यूतिः, ष्ठेवितुम्, ष्ठेवित्वा, ष्ठीव्यन् ।

০ ।—णु स्तुतौ अ० प० वेट् । नौति, नुतः, अनावीत्, अनौषीत्, नुनाव, नुतः, नवितुम्, नोतुम्, नवित्वा, नुत्वा ।

০ ।—पू शोधने क्र्या० उभ० सेट् । पुनाति, पुनीतः, पुनन्ति, पुनीते । अपावीत्, अपविष्ट, पुपाव, पूतः, पूतिः ।

कुमारसम्भवटीका सञ्जीवनी ।

मङ्गलाचरणम् ।

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥
शरणं करवाणि शर्मदं ते चरणं वाणि ! चराचरोपजीव्यम्
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब ! कृतार्थसार्थवाहम्

प्रतिज्ञा ।

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥
भारती कालिदासस्य दुर्व्याख्याविषमूर्च्छिता ।
एषा सञ्जीवनी व्याख्या तामद्योज्जीवयिष्यति ॥

कुमारसम्भवम् ।

प्रथमः सर्गः ।

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥ १ ॥

तत्रभवान् कालिदासः कुमारसम्भवं काव्यं चिकीर्षुः "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति शास्त्रात् काव्यादौ वक्ष्यमाणार्थानुगुणं वस्तु निर्दिशति,—

अस्तीति । [उत्तरस्यां दिशि] अनेनास्य देवभूमित्वं सूच्यते । [देवता आत्मा] अधिष्ठाता यस्य सः । एतेनास्य वक्ष्यमाणमेनकापरिणयपार्वतीजननादिचेतनव्यवहारयोग्यत्वसिद्धिः । हिमस्यालयः स्थानमिति [हिमालयो नाम] हिमालय इति प्रसिद्धः । अधिको राजा [अधिराजः] राजाहःसखिभ्यष्टच् (१) (५,४,९१ पा०) न गच्छन्तीति [नगाः] अचलाः तेषामधिराजः [नगाधिराजः अस्ति ।] कथम्भूतः ? [पूर्वापरौ] प्राच्यपश्चिमौ [तोयनिधी] समुद्रौ [वगाह्य] प्रविश्य । अतएव [पृथिव्याः] भूमेः [मानम] हस्तादिना परिच्छेदः । भावे ल्युट् । तस्य [दण्डः] यद्वा मीयतेऽनेनेति

---

(१) राजाद्यन्तात्तत्पुरुषात् टच् स्यात् ।

यं सर्वशैलाः परिकल्प्य वत्सं
मेरौ स्थिते दोग्धरि दोहदक्षे।

[मानम्] करणे ल्युट्। स चासौ [दण्डश्च] स इव [स्थितः] आयामपरिच्छेदकदण्ड इव स्थित इत्यर्थः। पूर्वापरसागरावगाहित्वञ्चास्य हिमालयस्यास्त्येव। उक्तञ्च ब्रह्माण्डपुराणे,— "कैलासो हिमवांश्चैव दक्षिणे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तरपस्थितौ॥" अत्र हिमाचलस्योभयाब्धिव्याप्तिसाम्यात्मानदण्डत्वेनोत्प्रेक्षणात् उत्प्रेक्षालङ्कारः। "प्रकृते अप्रकृतगुणक्रियादिसम्बन्धादप्रकृतत्वेन प्रकृतस्य सम्भावनम् उत्प्रेक्षा" इत्यलङ्कारसर्वस्वकारः। अस्मिन् सर्गे प्रायेण वृत्तमुपजातिः, क्वचिदिन्द्रवज्रोपेन्द्रवज्रे च। तल्लक्षणन्तु "स्यादिन्द्रवज्रा यदि तौ जगौ गः। उपेन्द्रवज्रा जतजास्ततो गौ। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः" इति॥१॥

इतःपरं षोड़शभिः श्लोकैर्हिमाद्रिं वर्णयति,—तत्र नगाधिराजत्वं निर्वोढुमाह,—यमिति। सर्वे च ते शैलाश्च [सर्वशैलाः] पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेति (१) (२,१,४९ पा०) समासः। [यम्] हिमालयं [वत्सं परिकल्प्य] विधाय [दोहदक्षे] दोहनसमर्थे [मेरौ दोग्धरि स्थिते] सति। यस्य च भावेन भावलक्षणमिति (२) (२,३,३७ पा०) सप्तमी। [पृथूपदिष्टाम्] पृथुना वैण्येन उपदिष्टाम् ईदृशतया प्रदर्शिताम् [धरित्रीम्] गोरूपधरामिति

(१) पूर्वकालादयः समानाधिकरणेन अभेदान्वयबोधकेन सह समस्यन्ते स तत्पुरुषः।

(२) यस्य क्रियया क्रियान्तरं लक्ष्यते तत्र सप्तमी स्यात्।

भास्वन्ति रत्नानि महौषधीश्च
पृथूपदिष्टां दुदुहुर्धरित्रीम्॥ २॥

শ্রী ... নাথ সেন ... গোঃ বৈকুণ্ঠপুর (বর্দ্ধমান)

शेषः। "गौर्भूत्वा तु वसुन्धरा" इति विष्णुपुराणात्, अकथितञ्चेति (१,४,५१ पा०) कर्मत्वम् (१)। भास्वन्ति च भास्वत्यश्च [भास्वन्ति] द्युतिमन्ति ओषधिविशेषणञ्चैतत्। नपुंसकमनपुंसकेन (१,२,६९ पा०) इत्यादिना (२) नपुंसकैकशेषः। [रत्नानि] मणीन् जातिश्रेष्ठवस्तूनि च। "रत्नं श्रेष्ठे मणावपि" इति विश्वः। "जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कथ्यते" इति यादवः। [महौषधीश्च] सञ्जीवनीप्रभृतीश्च क्षीरत्वेन परिणता इति शेषः। "ताः क्षीरपरिणामिनीः" इति विष्णुपुराणात्। [दुदुहुः]। दुहियाचीत्यादिना (१,४,५१ पा०,भा०) (३) द्विकर्मकत्वम्। अत्र प्रयोजकत्वेऽपि शैलानां प्रश्वभिर्हलैः कर्षति ग्रामं ग्रामणीरितिवत् तत्समर्थाचरणात् कर्तृत्वेन व्यपदेशः। दुहेः स्वरितेत्त्वेऽपि (४) अकर्त्रभिप्रायविवक्षायां परस्मैपदम्। अत्रार्थे प्रमाणम्,—"गोभूमिरवत्सः

---

(१) अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

(२) अक्लीबेन सहोक्तौ क्लीबं शिष्यते अपरं लुप्यते।

(३) दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ। ब्रुविशासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना'। इति भाष्यकारिका। सचते संबध्नाति।

(४) स्वरितञितः कर्त्रभिप्राये क्रियाफले इति (१,३,७२ पा०) स्वरितः स्वरविशेषः अकारश्च इत् यस्य तस्मात् धातोः क्रियाफले कर्तृगामिनि आत्मनेपदं स्यादिति अत्र आत्मनेपदप्रसक्तावपि कर्तृगामित्वविवक्षाभावाच्च तङ्। पदादौ यच चत्वार स्वरितेन इत्युपक्रम्य पाठात् दुहेः स्वरितेत्त्वम्।

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ ३ ॥

सर्वे कर्त्तारोऽत्र पयांसि च। ओषध्यश्चैव भास्वन्ति रत्नानि विविधानि च। वत्सश्च हिमवानासीद्दोग्धा मेरुर्महागिरिः" इति। एतेन वत्सस्य मातुः प्रेमास्पदत्वादस्य सारग्राहित्वं गम्यते। तथा चास्य नगस्य रत्नविशेषभोक्तृत्वान्नगाधिराजत्वं युक्तमिति भावः। अत्र हिमवद्वर्णनस्य प्रकृतत्वात् तत्प्रतौषधिरत्नानां द्वयानामपि प्रकृतत्वात्तेषां दोहनक्रियारूपसमानधर्मसम्बन्धादौपम्यस्य गम्यत्वात् केवलप्राकरणिकविषयतुल्ययोगिता नामालङ्कारः। तदुक्तं "प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥" न चात्र रूपकपरिणामाद्यलङ्कारशङ्का कार्य्या, तेषामारोपहेतुत्वात् हिमहेमाचलादिषु वत्सत्वदोग्धृत्वादीनामागमसिद्धत्वेनानारोप्यमाणत्वादिति ॥ २ ॥

ननु हिमदोषदूषितस्य तस्यात्यन्तमनभिगम्यत्वाच्छिन्नेष इव सर्वमपि सौभाग्यं विफलमित्याशङ्क्याह,—

अनन्तेति। प्रभवत्यस्मादिति प्रभवः कारणम् [अनन्तानाम्] अपरिमितानां [रत्नानां] श्रेष्ठवस्तूनां [प्रभवस्य यस्य] हिमाद्रेः [हिमम्] कर्तृ, सुभगस्य भावः सौभाग्यम्। हृद्भगसिन्ध्वन्ते पूर्वपदस्येति (७,३,१९ पा०) उभयपदवृद्धिः। तद् विलुम्पतीति [सौभाग्यविलोपि] सौन्दर्यविघातकं [न जातं] नाभूत्। तथाहि, [एको दोषः गुणसन्निपाते इन्दोः किर-

यश्चाप्सरोविभ्रममण्डनानां
सम्पादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम् ॥ ४ ॥

यथाङ्क इव निमज्जति] अन्तर्लीयते इत्यर्थः । न हि स्वल्पो दोषोऽमितगुणाभिभावकः, किन्तु कश्चिदिन्दुकलङ्कादिवद् गुणैरभिभूयते अन्यथा सर्वरम्यवस्तुहानिप्रसङ्गादिति भावः । अत्रोपमानुप्राणितोऽर्थान्तरन्यासालङ्कारः । तल्लक्षणन्तु,—"ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः" इति दण्डी ॥ ३ ॥

यश्चेति । किञ्चेति चकारार्थः । [यः] हिमाद्रिः [अप्सरसां विभ्रममण्डनानि] विलासालङ्करणानि । अथवा विभ्रमो विपरीतन्यासः "विभ्रमस्त्वरयाऽकाले भूषास्थानविपर्ययः" इति दशरूपकात् । तेन मण्डनानि तेषां [सम्पादयित्रीम्] एतच्चानुरागदर्शिन्योऽप्सरसः सन्ध्याभ्रमेण प्रसाधनाय त्वरयन्तीति भावः । तथात्वे भ्रान्तिमदलङ्कारो व्यज्यते । कर्तृकर्मणोः कृतीति (२,३,६५ पा०) (१) कर्मणि षष्ठी । वारीणां वाहकाः [बलाहकाः] पृषोदरादित्वात् (२) साधुः । तेषां [छेदेषु] खण्डेषु [विभक्तः] सङ्क्रमितो [रागः] यया ताम् । एतेनाद्रेरभ्रङ्कषत्वं गम्यते । इदं विशेषणद्वयं सन्ध्यायामपि योज्यम् । [धातवः] सिन्दूरगैरिकादयोऽस्य

---

(१) कृद्योगे सति कर्तरि कर्मणि च षष्ठी स्यात् ।

(२) पृषोदरादीनि यथोपदिष्टम् (६, ३, १०८ पा०) ।

आमेखलं सञ्चरतां घनानां
छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥ ५ ॥

सन्तीति [धातुमान्] नित्ययोगे (१) मतुप्। तस्य भावः [धातुमत्ता] ताम्। धातुयोगित्वमिति सम्बन्धोऽपि वाच्यार्थः। समासकृत्तद्धितेषु सम्बन्धाभिधानं भावप्रत्ययेनेति (२) वचनात्। लक्षणया नित्यानुषङ्गिकधातुमित्यर्थः। [अकालसन्ध्यामिव] अनियतकालप्राप्तसन्ध्यामिव [शिखरै-र्बिभर्त्ति] धत्ते। अत्र सन्ध्याशब्दस्य जातिवाचित्वात् जात्युत्प्रेक्षा ॥ ४ ॥

आमेखलमिति। [सिद्धाः] अणिमादिसिद्धाः देवयोनि-विशेषाश्च "पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः" इत्यमरः। आ मेखलाभ्यः [आमेखलम्] नितम्बपर्य्यन्तम्। "मेखला खड्गबन्धे स्यात् काञ्चीशैलनितम्बयोः" इति विश्वः। आङ् मर्य्यादाभिविध्योः (१,१,१३ पा०) इत्यव्ययीभावः (३) [सञ्चरतां घनानां] मेघानाम् [अधःसानूनि] मेघमण्डलादध-स्तटानि [गतां] प्राप्ताम्। द्वितीयाश्रितातीतपतितगतात्यस्त-प्राप्तापन्नैरिति (२,१,२४ पा०) समासः (४)। [छायाम्]

(१) भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्ति विव-क्षायां भवन्ति मतुबादयः। इति भाष्यकारिकयेति शेषः।

(२) कृत्तद्धितसमासेभ्यस्तद्भावप्रत्ययेन संबन्धस्याभिधानमिति वार्त्तिकार्थः।

(३) मर्य्यादा सीमा अभिविधिर्व्याप्तिः एतयोरर्थयोर्वर्त्तमान आङ् पञ्चम्यन्तेन सह वा समस्यते सोऽव्ययीभावः।

(४) द्वितीयान्तं श्रित इत्यादिभिः सह वा समस्यते स तत्पुरुषः।

पदं तुषारस्रुतिधौतरक्तं
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तै-
र्मुक्ताफलैः केसरिणां किराताः ॥ ६ ॥
न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।

अनातपम् । "छाया सूर्य्यप्रियाकान्तिप्रतिबिम्बमनातपम्" इत्यमरः । [निषेव्य वृष्टिभिरुद्वेजिताः] क्लेशिताः सन्तः । "उद्वेगस्तिमिते क्लेशे भये मन्थरगामिनि" इति शब्दार्णवः । [यस्य] हिमाद्रेः [आतपवन्ति] सातपानि शृङ्गाणि आश्रयन्ते] आश्रित्य स्थिता इत्यर्थः । अतिमेघमण्डलमस्यौन्नत्यमिति भावः ॥ ५ ॥

पदमिति । [यस्मिन्] अद्रौ [किराताः] [तुषारस्रुतिभिः] हिमनिष्यन्दैः [धौतं] क्षालितं [रक्तं] शोणितं यस्य तत् तथोक्तम् । अतो दुर्ग्रहमिति भावः । हताः द्विपाः गजाः यैस्तेषाम् । [हतद्विपानां केशरिणाम्] सिंहानां [पदम्] पादप्रक्षेपस्थानम् [अदृष्ट्वापि नखरन्ध्रैः] नखच्छिद्रेभिः [मुक्तैर्मुक्ताफलैर्मार्गं विदन्ति] जानन्ति । अत्र आकाशः सिंहघातिनो गजेन्द्राश्च मुक्ताकरा इति भावः । "करीन्द्र-जीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि । मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि" ॥ ६ ॥

न्यस्तेति । [यत्र] हिमाद्रौ [धातुरसेन] सिन्दूरादिद्रवेण । "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः" इत्य-

व्रजन्ति विद्याधरसुन्दरीणा-
मनङ्गलेखक्रिययोपयोगम् ॥ ७ ॥
यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥ ८ ॥

मरः। [न्यस्ताक्षराः] लिखितवर्णाः अतएव [कुञ्जरस्य] ये [बिन्दवः] काये वयोविशेषभाविनः पद्मकाख्याः "पद्मकं बिन्दुजालकम्" इत्यमरः। ते इव [शोणाः] रक्तवर्णा लिखितभागेष्विति शेषः। [भूर्जत्वचः] भुजपत्रवल्कलानि "भूर्जपत्रे भुजो भूर्जो मृदुत्वक् चर्मिका अपि" इति यादवः। [विद्याधरसुन्दरीणां] लिख्यन्ते येषु ते [लेखाः] पत्रिकाः [अनङ्गस्य लेखाः] तेषां [क्रियया] कामव्यञ्जकलेखकरणेन इत्यर्थः [उपयोगम्] उपकारं [व्रजन्ति] दिव्याङ्गनाविहारयोग्योऽयं शैल इति भावः ॥ ७ ॥

य इति। [यः] हिमाद्रिः [दरी] गुहा सैव [मुखं] तस्मात् [उत्थेन] उत्पन्नेन। आतश्चोपसर्गे (३,१,१३६ पा०) इति कप्रत्ययः (१)। [समीरणेन] वायुना [कीचकाः] वेणुविशेषाः "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः। तेषाम् [रन्ध्रभागान्] छिद्रप्रदेशान् [पूरयन्] धमयन्। "वांशिकोऽपि वंशरन्ध्राणि मुखमारुतेन पूरयति" इति प्रसिद्धिः। [उद्गास्यताम्] देवयोनित्वादुच्चैर्गास्यताम्

(१) उपसर्गे उपपदे आदन्तात् धातोः कः स्यात् ।

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति ॥ ९ ॥

ग्रामेण गानं करिष्यताम् । उक्तञ्च नारदेन,—"षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः । न तु गान्धारनामानं, स लभ्यो देवयोनिभिः" इति । [किन्नराणां] देवगायकानां [तानप्रदायित्वम्] तानो नाम स्वरान्तरप्रवर्त्तको रागस्थितिप्रहत्र्यादिहेतुरंशापरनामा वंशवाद्यसाध्यः प्रधानभूतः स्वरविशेषः । "तानस्त्वंशस्वरो मतः" इत्यभिनवगुप्तः, "मात्रा यं यं स्वरं गच्छेत् तं तं वंशेन तानयेत्" इति भरतः । तत्प्रदानशीलत्वं [तानप्रदायित्वम्] प्राप्तिकामम् [उपगन्तुम् इच्छतीव] इत्युत्प्रेक्षा सा च दरीमुखोत्थेन इत्येकदेशविवर्त्तिरूपकोत्थापिता, मुखसाध्यत्वात् तानप्रदायित्वस्य । यत्रावयवरूपणादवयविरूपणं गम्यते, तदेकदेशविवर्त्ति रूपकम् । गम्यते चात्र अवयविनः पुंसो रूपणं वचनानिर्दिष्टे हिमाद्रावित्यलम् बहुना ॥ ८ ॥

कपोलेति । [यत्र] हिमाद्रौ [करिभिः] गजैः [कपोलकण्डूः] गण्डस्थलकण्डूः [विनेतुम्] अपनेतुं [विघट्टितानां] घर्षितानां [सरलद्रुमाणां] सम्बन्धिन्या [स्रुतानि] करिकपोलघर्षणात् क्षरितानि [क्षीराणि] येषां तेषां भावस्तत्ता तया हेतुना [प्रसूतः] उत्पन्नः [गन्धः सानूनि सुरभीकरोति] एतेनास्य गजाकरत्वं गम्यते । तथा च गजायुर्वेदम् "हिमवद्विन्ध्यमलया गजानाम् प्रभवा नगाः" इति ॥ ९ ॥

वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्या-
मतैलपूराः सुरतप्रदीपाः ॥ १० ॥

उद्वेजयत्यङ्गुलिपार्ष्णिभागान्

वनेचराणामिति । [यत्र] हिमाद्रौ [रजन्यां] [दर्यः] कन्दरा एव [गृहाः] तेषाम् [उत्सङ्गेषु] अभ्यन्तरेषु [निषक्ताः] संक्रान्ताः [भासः] यासां ताः [ओषधयः] [तृणज्योतींषि] "अस्तावोषधिषु च तेजो निधाय रविरस्तं याति" इत्यागमः। वनितानां सखायः [वनितासखाः] राजाहःसखिभ्यष्टच् (५,४,९१ पा०) तेषां रममाणानामित्यर्थः । वने चरन्तीति [वनेचराः] किराताः । चरेष्टः (३,२,१६ पा०) (१) इति टप्रत्ययः, तत्पुरुषे कृति बहुलम् (६,३,१४ पा०) इत्यलुक् (२) । तेषां [वनेचराणाम् अतैलपूराः] अनपेक्षिततैलपूरणा इत्यर्थः [सुरते] सुरतकर्मणि [प्रदीपाः भवन्ति] अत्र ओषधीष्वारोप्यमाणस्य प्रदीपत्वस्य प्रकृतसुरतोपयोगित्वात् परिणामालङ्कारः। तदुक्तम् "आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" इति । तथा प्रदीपकारणतैलपूरणनिषेधादकारणकार्य्योत्पत्तिलक्षणा विभावना चेत्युभयोः संसृष्टिः ॥ १० ॥

उद्वेजयतीति । [यत्र] हिमाद्रौ [शिलीभूतं] घनीभूतं [हिमं] यत्र तस्मिन् अतएव [अङ्गुलीनां पार्ष्णीनाञ्च

---

(१) अधिकरणे उपपदे चरेष्टः स्यात् ।

(२) कृदन्ते घञ् परे तत्पुरुषसमासे सप्तम्या बहुलमलुक् स्यात् ।

मार्गे शिलीभूतहिमेऽपि यत्र।
न दुर्वहश्रोणिपयोधरार्त्ता
भिन्दन्ति मन्दां गतिमश्वमुख्यः ॥ ११ ॥

दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने
ममत्वमुच्चैःशिरसां सतीव ॥ १२ ॥

गान्] प्रदेशान् [उद्वेजयति] अतिशेत्यात् क्लेशयत्यपि र्गे] श्रोणयश्च पयोधराश्च श्रोणिपयोधरम्। [दुर्वहेण] रेण [श्रोणिपयोधरेण आर्त्ताः] पीड़िताः आङ्पूर्वादृच्छतेः। उपसर्गादृति धाताविति (६,१,८१ पा०) (१) वृद्धिः। ानां मुखानीव मुखानि यासां ताः [अश्वमुख्यः] किन्नर-यः। उष्ट्रमुखवत्समासः। "स्यात्किन्नरः किम्पुरुषस्तुरङ्ग-नो मयुः" इत्यमरः। [मन्दां] मन्थरां [गतिं न भिन्दन्ति] त्यजन्तीत्यर्थः। पादपीड़ाकरेऽप्यतिभारभङ्गुरशरीरतया शीघ्रं गन्तुं शक्यते इति भावः ॥ ११ ॥

दिवाकरादिति। [यः] हिमाद्रिः [दिवा] दिवसे [भीतं] ाविष्टमिव। उलूकमिवेति च ध्वनिः। [गुहासु लीन-कारं] ध्वान्तं दिवा दिनं करोतीति दिवाकरस्तस्मात् दिवाकरात्] दिवाविभानिशाप्रभाभास्करेत्यादिना (२) R, २१ पा०) टप्रत्ययः। भीत्रार्थानाम् भयहेतुः (१,४,

(१) उपसर्गस्थावर्णात् ऋकारादौ धातौ परे वृद्धिरेकादेशः स्यात्।

(२) दिवादिषूपपदेषु कृञष्टः स्यात्।

लाङ्गूलविक्षेपविसर्पिशोभै-
रितस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति बालव्यजनैश्चमर्यः ॥ १३ ॥
यत्रांशुकाक्षेपविलज्जितानां

२५ पा०) इत्यपादानत्वात् (१) पञ्चमी । [रक्षति त्रायते । ननु क्षुद्रसंरक्षणमनर्हमित्याशङ्क्याह,—क्षुद्र इति [उच्चैःशिरसाम्] उन्नतानां [शरणं प्रपन्ने] शरणागते [क्षुद्रे नीचेऽपि [सति] सज्जने [इव] [नूनं ममत्वं] ममायमित्य भिमानः अस्तीति शेषः । ममशब्दात् त्वप्रत्ययः । अर्थान्तर न्यासोऽलङ्कारः ॥ १२ ॥

लाङ्गूलेति । [चमर्यः] मृगीविशेषाः [इतस्ततः] [लाङ्गू लानि] बालधयः । "पुच्छोऽस्त्री लोमलाङ्गूले बालहस्तश्च बालधिः" इत्यमरः । तेषां [विक्षेपैः] विधूननैः [विसर्पिण्यः विसृमराः [शोभाः] कान्तयो येषां तैः [चन्द्रमरीचिभिः इव [गौरैः] शुभ्रैः "गौरः करीषे सिद्धार्थे शुक्ले पीतेऽरुणे ऽपि च" इति यादवः । उपमानानि सामान्यवचनैः (२,१ ५५ पा०) (२) इति समासः । बालव्यजनैः] चामरैः [यस्य हिमाद्रेः [गिरिराजशब्दं] गिरिराज इति संज्ञाम् [अर्थ युक्तम्] अभिधेयवत्तं [कुर्वन्ति] । राजानो हि छत्रचाम रादिचिह्निता इति भावः ॥ १३ ॥

(१) भयार्थानां त्राणार्थानाञ्च प्रयोगे भयहेतुरपादानसंज्ञः स्यात

(२) उपमानवाचकपदानि साधर्म्यवाचकपदैः सह वा समस्यन्ते तत्पुरुषः ।

यदृच्छया किम्पुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बा
स्तिरस्करिण्यो जलदा भवन्ति ॥ १४ ॥

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातै-
रासेव्यते भिन्नशिखण्डिबर्हः ॥ १५ ॥

यत्रेति । [यत्र] हिमाद्रौ [अंशुकाक्षेपेण] वस्त्रापहरणेन [विलज्जितानां किम्पुरुषाङ्गनानाम्] किन्नरस्त्रीणाम् [यदृच्छया] दैवगत्या [दरीगृहद्वारेषु] [विलम्बिबिम्बाः] लम्बमानमण्डलाः [जलदास्तिरस्करिण्यः] जवनिकाः [भवन्ति ।] "प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा" इत्यमरः । तिरसोऽन्यतरस्यामिति (८,३,४२ पा०) सत्वम् (१) । अत्र जलदेष्वारोप्यमाणस्य तिरस्करिणीत्वस्य प्रकृतोपयोगित्वात् परिणामालङ्कारः ॥ १४ ॥

भागीरथीति । [भागीरथीनिर्झरशीकराणाम्] गङ्गाप्रवाहपयःकणानाम् । कर्मणि षष्ठी । [वोढा] प्रापकः । वहेस्तृच् । [मुहुः] पुनः पुनः, सद्यो वा । "पौनःपुन्ये भृशार्थे च सद्यो वा स्यान्मुहुःपदम्" इति वैजयन्ती । [कम्पिताः देवदारवः] येन स तथोक्तः । [भिन्नानि] विश्लेषितानि [शिखण्डिनाम् बर्हाणि] गतिलाघवार्थम् किरातकटिबद्धानि येन स तथोक्तः । क्रमाद्विशेषणत्रयेण शैत्यसौरभ्यमान्द्यान्युक्तानि ।

(१) तिरसः सो वा स्यात् कखपफेषु परेषु ।

सप्तर्षिहस्तावचितावशेषा-
ण्यधो विवस्वान् परिवर्त्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि
प्रबोधयत्यूर्ध्वमुखैर्मयूखैः ॥ १६ ॥
यज्ञाङ्गयोनित्वमवेक्ष्य यस्य
सारं धरित्रीधरणक्षमञ्च ।

[यस्य] हिमाद्रेः [वायुः] [अन्विष्टमृगैः] मार्गितमृगैः श्रान्तै-रिति भावः । "अन्विष्टम् मार्गितम् मृगितम्" इत्यमरः [किरातैरासेव्यते ॥ १५ ॥

सप्तर्षीति । सप्त च ते ऋषयश्च [सप्तर्षयः ।] "दिक्संख्ये संज्ञायाम् (१) (२,१,५० पा०) इति समासः । तेषाम् [हस्तैरवचितेभ्यः] लूनेभ्यः [अवशेषाणि] अवशिष्टानि । "शेषोऽप्रधाने सन्तापे त्रिष्वन्यत्रोपयुज्यते" इति केशवः । कर्मणि घञ् प्रत्ययः । अनेन पद्मानां साफल्यं सूचितम् । [यस्य] हिमाद्रेः । रोहन्तीति रुहाणि । इगुपध-ज्ञा-प्री-किरः कः (३,१, १३५ पा०) इति कप्रत्ययः । [अग्रे] उपरि यानि [सरांसि] तेषु [रुहाणि पद्मानि] [अधः परिवर्त्तमानः] भ्रमन् [विवस्वान्] सूर्य्यः [ऊर्द्ध मुखैः मयूखैः प्रबोधयति] विकासयति न कदाचिदधोमुखैः, अतिमार्त्तण्डमण्डलत्वादस्यभूमेरिति भावः । सप्तर्षिमण्डलं ध्रुवादप्यूर्द्धमिति ज्योतिषिकाः । अतस्तेषामग्रसरोरुहभागित्वं युक्तम् ॥ १६ ॥

---

(१) दिग्वाचकः संख्यावाचकश्च संज्ञायामेव समानाधिकरणेन सह वा समस्यते स कर्मधारयः । असंज्ञायां तु द्विगुत्वमेव ।

प्रजापतिः कल्पितयज्ञभागं
शैलाधिपत्यं स्वयमन्वतिष्ठत् ॥ १७ ॥
स मानसीं मेरुसखः पितॄणां
कन्यां कुलस्य स्थितये स्थितिज्ञः।
मेनां मुनीनामपि माननीया-
मात्मानुरूपां विधिनोपयेमे ॥ १८ ॥

यज्ञाङ्गेति। [यस्य] हिमाद्रेः [यज्ञाङ्गानाम्] यज्ञसाधनानां सोमलतादीनाम् [योनिः] प्रभवः तस्य भावस्तत्त्वम्। "यज्ञार्थं मया सृष्टो हिमवानचलेश्वरः" इति विष्णुपुराणात्। [धरित्रीधरणक्षमम्] भूभारधरणयोग्यम् [सारम्] बलञ्च "सारो बले स्थिरांशे च" इत्यमरः। [अवेक्ष्य] ज्ञात्वा [प्रजापतिः] [स्वयमेव] [कल्पितो यज्ञभागः] यस्मिन् तत्तथोक्तम्। "सोमस्य राज्ञः कुलङ्गः पृन्तीः शृङ्गी समुद्रस्य विडमारी हिमवतो हस्ती" इति श्रुतेः (१) इति भावः। [शैलानामाधिपत्यम्] अधिपतित्वम्। पत्यन्तपुरोहितादिभ्यो यक् इति (५, १,१२८ पा०) यक्प्रत्ययः। [अन्वतिष्ठत्] ददाति स्म इत्यर्थः। उक्तञ्च ब्रह्माण्डपुराणे,—"शैलानां हिमवन्तञ्च नदीनाञ्चैव सागरम्। गन्धर्वाणामधिपतिञ्चक्रे चित्ररथं विभुः" इति॥१७॥

सम्प्रति कथाम् प्रस्तौति,—

स मानसीमिति। मेरोः सखा [मेरुसखः] तत्तुल्यस्य इतिभावः। [स्थितिज्ञः] मर्य्यादाभिज्ञः, अनेन गुणसम्पत्तिः

(१) देवताविशेषे पश्वादिविशेषावधानप्रकरणे यजुर्वेदे २४ [illegible] हिमवद्भ्यो हस्ती [illegible]। कुलङ्गः कुरङ्गः।

कालक्रमेणाथ तयोः प्रवृत्ते
स्वरूपयोग्ये सुरतप्रसङ्गे ।
मनोरमं यौवनमुद्वहन्त्या
गर्भोऽभवद्भूधरराजपत्न्याः ॥ १९ ॥

असूत सा नागवधूपभोग्य

सूयते ॥ [सः हिमवान्] [पितॄणाम्] [मानसीम्] मनःसङ्कल्पजन्याम् । [मुनीनामपि माननीयाम्] योगब्रह्मवादाभ्यां पूज्यत्वमितार्थः । उक्तञ्च विष्णुपुराणे,—"तेभ्यः शुभाऽदं अग्रे मेनका धारिणी तथा । ते उभे ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विज !" इति । [आत्मानुरूपाम्] कुलशीलसौन्दर्यादिभिः सदृशीम् । [मेनाम्] मेनकादेवीति नामवतीम् [कन्याम्] [कुलस्य स्थितये] प्रतिष्ठायै [विधिना] यथाशास्त्रेण [उपयेमे] परिणीतवान् । उपायमः स्वकरणे (१) (१,३,५६ पा०) इत्यात्मनेपदम् । "तेषान्तु मानसी कन्या मेना नाम महागिरेः । पत्नी हिमवतो यस्याः पुत्रो मैनाक उच्यते" इति ब्रह्माण्डपुराणात् ॥ १८ ॥

कालक्रमेणेति । [अथ] [कालक्रमेण] गच्छता कालेनेत्यर्थः । [तयोः] मेनकाहिमवतोः [स्वरूपयोग्ये] सौन्दर्य्यानुगुणे । यद्वा रूप्यते निरूप्यते अनेनेति रूपं ज्ञानम् तद्योग्ये ज्ञानानुकारिणीत्यर्थः । [सुरतप्रसङ्गे] सुरतकर्मणि [प्रवृत्ते] सति [मनोरमं यौवनमुद्वहन्त्याः] [भूधरराजपत्न्याः] मेनकायाः गर्भोऽभवत् ॥ १९ ॥

(१) उपयमं स्वीकारः अस्मिंश्चार्थे यमधातुः उपपूर्वात् आत्मनेपदं स्यात् ।

मैनाकमम्भोनिधिबद्धसख्यम् ।
क्रुद्धेऽपि पक्षच्छिदि वृत्रशत्रा-
ववेदनाज्ञं कुलिशक्षतानाम् ॥ २० ॥

असूतेति । [सा] मेना [नागवधूपभोग्यम्] नागकान्या-
रैणेतारमित्यर्थः । [अम्भोनिधिबद्धसख्यम्] समुद्रकृत-
मैत्रीकम् । सख्यमूलं सूचयति,—[पक्षच्छिदि] पक्षच्छेत्तरि ।
सत्सूद्विषेत्यादिना (३,२,६१ पा०) क्विप्प्रत्ययः । [वृत्रशत्रौ]
[क्रुद्धे] कुपिते सत्यपि [कुलिशक्षतानाम्] वज्रप्रहाराणाम् ।
सम्बन्धसामान्ये षष्ठी । जानातीति ज्ञः । इगुपधेति (३,१,
१३५पा०) कप्रत्ययः । वेदनानां ज्ञः । अथवा वेदनां जाना-
तीति वेदनाज्ञः । आतोऽनुपसर्गे कः (३,२,३पा०) इति कप्र-
त्ययः । उपपदमतिङ् (२,२,१९पा०) (१) इति समासः । स
न भवतीति [अवेदनाज्ञः] तं कुलिशक्षतवेदनानभिज्ञमित्य-
र्थः । सापेक्षत्वेऽपि गमकत्वात्समासः (२) । पक्षच्छेदोद्यतम-
हेन्द्रात् त्राणाय शरणागमनमनयोः सख्यमूलमिति भावः ।
[मैनाकं पुत्रमसूत] । सर्वपर्वतपक्षच्छेदेऽपि अयमक्षतपक्ष
एवेति मैनाकस्योत्कर्षः । तादृक्पुत्रवत्त्वं हिमाद्रेः, इति
तदर्थकं मैनाकस्य वर्णनम् । "पिता न ज्ञायते यस्या भ्राता
यदि न विद्यते । नोपयच्छेत तां कन्यां धर्मलोपभयात्

(१) तिङ्भिन्नमुपपदं (प्रत्ययविधानकाले सप्तमीनिर्दिष्टम्) समर्थेन सह समस्यते ।

(२) सापेक्षत्वेऽपि कुलिशक्षतानां सम्बन्धितयाऽपेक्षायेऽपि समस- [illegible] एव समासेऽपि [illegible] बोधकत्वात् समासः तथा- [illegible] "[illegible]" इति ।

अथावमानेन पितुः प्रयुक्ता
दक्षस्य कन्या भवपूर्वपत्नी ।
सती सती योगविसृष्टदेहा
तां जन्मने शैलवधूं प्रपेदे ॥ २१ ॥

सा भूधराणामधिपेन तस्यां
समाधिमत्यामुदपादि भव्या ।
सम्यक्प्रयोगादपरिक्षतायां
नीताविवोत्साहगुणेन सम्पत् ॥ २२ ॥

सुधीः” इति अभ्रातृककन्यापरिणय निषेधात् प्रकृते पार्वती भ्रातृमती एवेति सूचनार्थं मैनाक वर्णनमिति तात्पर्य्यार्थः॥२

अथेति । [अथ] मैनाकजननानन्तरम् [दक्षस्य] प्रजापतेः [कन्या] [भवस्य] महादेवस्य [पूर्वपत्नी] पूर्वभार्य्या [सती] पतिव्रता । “सती साध्वी पतिव्रता” इत्यमरः । [सती] नाम देवी । [पितुः] दक्षस्य । कर्त्तरि षष्ठी । [अवमानेन] स्वभर्त्तृ वज्ञया [प्रयुक्ता] प्रेरिता [योगमार्गेण विसृष्टदेहा] त्यक्तदेहा सती । [जन्मने] पुनरुद्भवाय [ताम्] शैलवधूम्] मेनकाम् [प्रपेदे] । अत, पुरा किल सती देवी दक्षाध्वरे तत्कृताम् स्वभर्त्तृ वज्ञाम-सहमाना पितरं प्रसूच्च उपेत्य मत्कर्त्तव्यकार्य्यम् लज्जामातैव करिष्यतीति निर्द्धार्य्य देवकार्य्याणि साधयितुञ्च योगाग्निना स्वशरीरं ददाह इति पुरावृत्तकथा अनुसन्धेया ॥ २१ ॥

सेति । [भव्या] कल्याणी [सा] सती [भूधराणामधिपेन] हिमवता [समाधिमत्याम्] नियमवत्याम् [तस्याम्] मेनकायां

प्रसन्नदिक् पांशुविविक्तवातं
शङ्खस्वनानन्तरपुष्पवृष्टि ।
शरीरिणां स्थावरजङ्गमानां
सुखाय तज्जन्मदिनं बभूव ॥ २३ ॥
तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ।

सम्यक् प्रयोगात्] साध्वाचरणाद्धेतोः [अपरिक्षतायाम्] अभ्र-
ायाम् [नीतौ] [उत्साहगुणेन] उत्साहशक्त्या कर्त्री [सम्पदिव
उदपादि] उत्पादिता उत्पद्यतेर्ण्यन्तात् कर्मणि लुङ् ।
चिण् भावकर्मणोः (३,१,६६ पा०) इति चिण्प्रत्ययः । चिणो
क् (६,४,१०४, पा०) इति तस्य (१) लुक् ॥ २२ ॥

प्रसन्नेति । प्रसन्नाः निर्मलाः दिशो यस्मिन् तत् [प्रसन्न-
दिक् ।] [पांशुविविक्ताः] रजोरहिताः [वाताः] यस्मिन् तत्
थोक्तम् । [शङ्खस्य स्वनात् स्वनस्य] वा अनन्तरं पुष्पवृष्टिः ।
स्मिन् तत्तथोक्तम्, [तस्याः] पार्वत्या [जन्मदिनम् ।] स्थिति-
ीलाः [स्थावराः] शैलवृक्षादयः । स्थेशभासपिसकसो वरच्
३,२,१७५पा०) इति वरच्प्रत्ययः । जङ्गम्यन्ते भृशम् गच्छ-
तीति [जङ्गमाः] देवतिर्य्यङ्मनुष्यादयः । स्थावराश्च जङ्गमाश्च
षां द्वयानामपि [शरीरिणां सुखाय] आनन्दाय बभूव ॥२३॥

तयेति । [स्फुरत्प्रभामण्डलया तया दुहित्रा] [सवित्री]
नयित्री । स्वरतिसूयतिसूतिधूञूदितो वा (७,२,४४ पा०)
तीडागमः । विदूरस्याद्रेः प्रान्तभूमिः [विदूरभूमिः ।] "अवि-

(१) चिणः परस्य [illegible] लुक् स्यात् ।

विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ॥ २४ ॥
दिने दिने सा परिवर्धमाना
लब्धोदया चान्द्रमसीव लेखा ।
पुपोष लावण्यमयान् विशेषान्

दूरे विदूरस्य गिरेस्तुङ्गरोधसः । काकतालीयसीमान्ते मणी नामाकरो भवेत्" इति शुभः । [नवमेघशब्दादुद्भिन्नया] [रत्नशलाकया] रत्नाङ्कुरेण [इव] [सुतरां चकाशे] रराज ॥२४॥

दिनेदिन इति । लब्ध उदयो यया सा [लब्धोदया] उत्पन्नेत्यर्थः । अभ्युदितेत्यन्यत्र । [दिने दिने] प्रतिदिनम् । नित्यवीप्सयोः (८,१,४ पा०) (१) इति वीप्सायां द्विरुक्तिः । [परिवर्द्धमाना] उभयत्र समानमेतत् । [सा] बाला चन्द्रमस इयम् [चान्द्रमसी] [लेखेव] [लावण्यमयान्] कान्तिविशेषप्रचुरान् "मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते" इति भूपालः । विशेषान् अवयवान् "विशेषोऽवयवे व्यक्तौ" इत्युत्पलमाला । ज्योत्स्नायाम् अन्तरमन्तर्धानं येषां तानि [ज्योत्स्नान्तराणि] ज्योत्स्नया अन्तर्हितानि तन्मयानीति यावत् । अन्याः कलाः [कलान्तराणीव] । सुप्सुपेति (२) समासः । "स्थानाभीयान्यताद्यर्थेर

(१) आभीक्ष्ण्ये च वीप्सायाञ्च द्योत्ये सर्वस्य पदस्य द्वित्वं स्यात् ।

(२) सह सुपा (२,१,४ पा०) इति सूत्रे योगविभागात् समुच्चये-सम्भवपक्षे सुबन्तं सुबन्तेन सह वा समस्यते इत्यर्थः । वस्तुतः मयूरव्यंसकादित्वादेव (२,१,७२ पा०) अत्र समासः ।

ज्योतस्तमस्तराशीव बुधास्तसा वि॥ २५ ॥

तां पार्वतीत्याभिजनेन नाम्ना
बन्धुप्रियां बन्धुजनो जुहाव।
उमेति माता तपसो निषिद्धा
पश्चादुमाख्यां सुमुखी जगाम ॥ २६ ॥

न्तर्भिन्नु चान्तरम्" इति शाश्वतः। [पुपोष] उपचित-
ती। इदं वाक्योपमा इत्याह दण्डी। तल्लक्षणन्तु,—"वाक्या-
नैव वाक्यार्थः कोऽपि यद्युपमीयते। एकानेकेवशब्दत्वात्
तु वाक्योपमा द्विधा" ॥ २५ ॥

तामिति। [बन्धुप्रियां ताम्] बालाम् [बन्धुजनः] पित्रा-
। अभिजनादागतेन [आभिजनेन] पित्रादिपूर्वसम्बन्धो-
गिकेनेत्यर्थः। "अभिजनाः पूर्ववान्धवाः" इति काशिका।
म्ना]। पर्वतस्यापत्यं स्त्री [पार्वती]। तस्यापत्यम् (४,१,
पा०) (१)इत्यण्प्रत्ययः। [इति जुहाव] आहूतवान्।
लिटि रूपम्। पर्वतजन्यत्वोपाधिना पार्वतीति नाम्ना
हूतिरिति भावः। [पश्चात्] आभिजननामप्रवृत्यनन्तरम्
ता] जनन्या उ-इति सम्बोधने। "उ-इति वितर्कसम्बो-
पादपूरणेषु" इति गणव्याख्याने। मा-शब्दो निषेधे।
उ वत्से। [मा] मा कुरु इत्येवंरूपेण [तपसः] तपश्चर्यायाः।
वारणार्थानामीप्सितः (१,४,२७ पा०) इत्यपादानत्वात् पञ्च-
। [निषिद्धा] निवारिता सती [सुमुखी सा] बाला उमा
आख्याम् नामधेयम् [उमाख्याम् जगाम] ॥ २६ ॥

(1) तस्यापत्यम् अपत्यमित्यर्थेऽण् स्यात्।

32453

महीभृतः पुत्रवतोऽपि दृष्टि-
स्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
अनन्तपुष्पस्य मधोर्हि चूते
द्विरेफमाला सविशेषसङ्गा ॥ २७ ॥

प्रभामहत्या शिखयेव दीप-
स्त्रिमार्गयेव त्रिदिवस्य मार्गः ।

महीभृत इति । पुत्राश्च दुहितरश्च पुत्राः । भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (१,२,६८ पा०) (१) इत्येकशेषः । तेऽस्य सन्तीति पुत्रवान् । भूमार्थे मतुप् । तस्य [पुत्रवतोऽपि] बहुपुत्रस्यापीत्यर्थः । [महीभृतः] हिमाद्रेः [दृष्टिः] [चक्षुः] [तस्मिन् अपत्ये] तोके "अपत्यं तोकं तयोः समे" इत्यमरः । तस्यां पार्वत्यामित्यर्थः । [तृप्तिं न जगाम] । तथा हि, [अनन्तपुष्पस्य] नानाविधकुसुमस्यापि [मधोः] वसन्तस्य सम्बन्धिनी [द्विरेफमाला] भृङ्गपङ्क्तिः चूतस्य विकारे [चूते] चूतकुसुमे । अवयवे च प्राण्योषधिवृक्षेभ्यः (४,३,१३५ पा०) इति विकारार्थोत्पन्नस्याण् प्रत्ययस्य लुप्प्रकरणे पुष्पमूलेषु बहुलम् (४,३,१६६ पा० सू० वा०) इति पठनाल्लुक् । [सविशेषः] सातिशयः [सङ्गः] यस्याः सा तथोक्ता अत्यन्तासक्तेत्यर्थः ॥ २७ ॥

प्रभेति । [प्रभामहत्या] प्रकाशाधिकया [शिखया] ज्वालया [दीपइव] । शिखादीपयोरवयवावयविभावाद् दे न व्य.... देशः । त्रयो मार्गा यस्यास्तया [त्रिमार्गया] मन्दाकि....

(१) क्रमेण स्वसृदुहितृशब्दाभ्यां सहोक्तौ भ्रातृपुत्रशब्दावेव शिष्येते स्वसृदुहितृशब्दौ लुप्येते इत्यर्थः ।

संस्कारवत्येव गिरा मनीषी
तया स पूतश्च विभूषितश्च ॥ २८ ॥
मन्दाकिनीसैकतवेदिकाभिः
सा कन्दुकैः कृत्रिमपुत्रकैश्च ।

तीया द्यौर्लोक इति [त्रिदिवः] स्वर्गः । इतिविषये त्रिम-
स्य त्रिभागवत्पूरणार्थत्वम् । पृषोदरादित्वाद्विग्रहशब्दका-
गमः पुंस्त्वं लोकात् । दीव्यतेर्वञर्थे कविधानम् दीव्यन्त्यत्र
ता इति दिव इति क्षीरस्वामी । तस्य [मार्ग इव] । [सं-
रः] व्याकरणजन्या शुद्धिः तद्वत्या [गिरा] वाचा "भद्रै-
म् लक्ष्मीर्निहिताधिवाचि" इति श्रुतेः इति भावः । मन-
या मनीषा साऽस्यास्तीति [मनीषी] विद्वान् [इव ।] सव-
नादित्वात् (६,१,९४,वा०) साधुः । [तया] पार्वत्या [सः]
मवान् [पूतः] शोधितश्च [विभूषितश्च] । अत्र शिखागिरी-
मिष्टयोरुपमानानर्हत्वात् न विशेषणाधिक्यदोषः । इयं
ोपमा ॥ २८ ॥

मन्दाकिनीति । [सा] पार्वती [बाल्ये] वयसि क्रीडानां
स्वादः रुचिरिति यावत् तम् [क्रीडारसम्] । "रसो गन्धे
स्वादः" इति विश्वः । [निर्विशतीव] भुञ्जानेव । "निर्वेशो
भोगमयोः" इति विश्वः । आच्छीनद्योर्नुम् (७,१,८० पा)
इति विकल्पात् नुमभावः । [सखीनाम् मध्यगता] सती
किन्याः सैकतेषु] पुलिनेषु [वेदिकाभिः] [कन्दुकैः] ।

(१) [illegible] परयोः । [illegible] इति कीपः संज्ञा ।

रेमे मुहुर्मध्यगता सखीनां
क्रीडारसं निर्विशतीव बाल्ये ॥ २९ ॥

तां हंसमालाः शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥ ३० ॥

असम्भृतं मण्डनमङ्गयष्टे
रनासवाख्यं करणं मदस्य ।

क्रियया निर्वृत्तैः [कृत्रिमैः ।] ड्वितः क्त्रिः (३,३,८८ पा०) इ
(१) क्त्रिप्रत्ययः । क्त्रेर्मम् नित्यम् (४,४,२०पा०) इति (२
वामनव । [पुत्रकैः] पाञ्चालिकाभिः । "पाञ्चालिका पुत्रि
वस्त्रदन्तादिभिः कृता" इत्यमरः । संज्ञायां कन् (५,३,८
पा०) इति कन्प्रत्ययः । [मुहुः] पुनः पुनः [रेमे] ॥२९॥

तामिति । [स्थिरः] स्थायिन् [उपदेशः] प्राग्भवीयो यस्या
स्ताम् मेधाविनीमित्यर्थः । [ताम्] पार्वतीम् [उपदेशकाले
[प्राक्तनजन्मविद्याः] पूर्वजन्माभ्यस्तविद्या इत्यर्थः । [शर
गङ्गां हंसमाला इव [नक्तम्] रात्रौ [महौषधिम्] तृणविशे
[आत्मभासः] स्वदीप्तयः [इव प्रपेदिरे] । उपमानवाक्य
दुपदेशमन्तरेणैवेति गम्यते ॥ ३० ॥

असम्भृतमिति । [अथ] [सा] पार्वती [अङ्गयष्टेः] [स्वाभ
तम्] अप्रयत्नसिद्धम् [मण्डनम्] प्रसाधनम् [अनासवाख्यम्]

(१) कुमारेतो धातोः क्त्रिः स्यात्प्रावेऽकर्तरि च कारके ।
(२) क्त्रिप्रत्ययान्तात् नित्यं मप् स्यात् निर्वृत्तेऽर्थे ।

कामस्य पुष्पव्यतिरिक्तमस्त्रं
बाल्यात् परं साथ वयः प्रपेदे ॥ ३१ ॥

उन्मीलितं तूलिकयेव चित्रं
सूर्य्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि
वपुर्विभक्तं नवयौवनेन ॥ ३२ ॥

[अवाल्यारहितम् मदस्य करणम्] साधनम् [कामस्य पुष्पव्यतिरिक्तमस्त्रम्] अस्त्रभूतम् [बाल्यात्] शैशवात् [परम्] अनन्तरभावि [वयः] यौवनं [प्रपेदे] प्राप। यौवनेनैव हि युवतयः साध्यन्ते काम्यन्ते चेति भावः। अत्र द्वितीयपादे आसवकारणाभावेऽपि तत्कार्य्यमदोक्तेर्विभावनालङ्कारः। तदुक्तं "कारणाभावे कार्य्योत्पत्तिर्विभावना" इति। प्रथमतृतीययोस्तु आरोप्यमाणयोर्मण्डनमदनास्त्रलयोः प्रकृतोपयोगात् परिणामालङ्कारः। तल्लक्षणन्तु १४ श्लोकव्याख्याने उक्तम् ॥३१॥

उन्मीलितमिति। [नवयौवनेन] प्रथमयौवनेन [विभक्तम्] अभिव्यञ्जितं पीनजघनादिसंस्थानमित्यर्थः। [तस्याः] पार्वत्याः [वपुः] [तूलिकया] कूर्चिकया शलाकयेत्यर्थः। "तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः" इति विश्वः। [उन्मीलितम्] रञ्जनद्रव्येणोद्भासितं समुत्कीर्णं रूपमिति यावत् [चित्रम्] आलेख्यम् [इव] [सूर्य्यांशुभिः] [भिन्नम्] विकसितम् [अरविन्दम्] पद्मम् [इव]। चतस्रः अस्रयो यस्य तच्चतुरस्रम्(१) अन्यूनातिरिक्तं यथा तथा शोभत इति [चतुरस्रशोभि।]

(१) अचतुरेत्यादिना (५,४,१२०) निपातनात् सिद्धम् ।

अभ्युन्नताङ्गुष्ठनखप्रभाभि-
र्निक्षेपणाद्रागमिवोद्गिरन्तौ ।
आजह्रतुस्तच्चरणौ पृथिव्यां
स्थलारविन्दश्रियमव्यवस्थाम् ॥ ३३ ॥

ताच्छील्ये णिनिः । [बभूव ।] चित्रारविन्दयोस्तूलिकात
णिकिरणसम्बन्ध इव स्ततःसिद्धस्यैवाङ्गसौष्ठवस्य यौवनप्रा
र्भावः अभिव्यञ्जको बभूवेत्यर्थः ॥ ३२ ॥

देवतानां रूपं पादाङ्गुष्ठप्रभृति वर्ण्यते, मानुषाणां केश
दारभ्येति धार्मिकाः । सम्प्रति सप्तदशभिः श्लोकैः पार्वत्य
पादादिकेशान्तवर्णनमारभते—

अभ्युन्नतेति । [अभ्युन्नतयोरङ्गुष्ठनखयोः प्रभाभिः] निमि
त्तेन [निक्षेपणात्] निर्भरन्यासाद्धेतोः [रागम्] अन्तर्गतं लौ
हित्यम् । "रागः क्लेशादिके रक्ते मात्सर्ये लोहितादिषु
इति शाश्वतः । [उद्गिरन्तौ] वमन्तौ बहिर्निःसारयन्ताविव
स्थिताविल्यर्थः । अत्रोद्गिरतेर्गौणार्थत्वान्न ग्राम्यतादोषः, प्रत्यु
गुण एव । यथाह दण्डी,—"निष्ठ्यूतोद्गीर्णवान्तादि गौणः
त्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते" इति
तस्याश्चरणौ [तच्चरणौ ।] [पृथिव्यामव्यवस्थाम्] अवस्थारहित
सञ्चारिणीमित्यर्थः । [स्थलारविन्दश्रियमाजह्रतुः । स्थलनि
ष्ठत्वान्नियतलौहित्यलाभः । अत्र सामुद्रिकाः,—"यस
रक्ततलौ पादावुन्नताग्रौ तलस्पृशौ ।" निगूढगुल्फौ निर्ह
सा स्यान्नृपतिसम्मता" इति । अत्रोपमानधर्मस्यारविन्दश्रि
यश्चरणयोरुपमेययोरसम्भवादरविन्दश्रियमिव श्रियमिति ।

सा राजहंसैरिव सन्नताङ्गी
गतेषु लीलाञ्चितविक्रमेषु ।
व्यनीयत प्रत्युपदेशलुब्धै-
रादित्सुभिर्नूपुरशिञ्जितानि ॥ ३४ ॥

वृत्तानुपूर्वे च न चातिदीर्घे

विम्बीकरणाक्षेपान्निदर्शनालङ्कारः । सा च सम्बन्धेऽसम्ब-
न्धरूपातिशयोक्त्यनुप्राणिता अध्यवस्यामित्यनेन स्वकार-
रस्य स्थैर्येऽसम्बन्धेऽपि असम्बन्धाभिधानात् । निदर्शना-
लक्षणन्तु,—"असम्भववस्तुसम्बन्धयोगादुपमानोपमेययोः । प्रतिबिम्ब-
क्रिया गम्या यत्र सा स्यान्निदर्शना" इति ॥ ३३ ॥
सेति । [प्रत्युपदेशलुब्धैः] "गुरुशुश्रूषया विद्या पुष्कलेन
न वा । अथ वा विद्यया विद्या, चतुर्थी नोपपद्यते"
न्यायादिति भावः । तदेव व्यनक्ति,—[नूपुरशिञ्जि-
तानि आदित्सुभिः] आदातुमिच्छुभिः मञ्जीरशिञ्जितमञ्जु-
गतोपदेशमिच्छद्भिरित्यर्थः । [राजहंसैः] [सन्नताङ्गी]
आरादिति भावः । [सा] पार्वती [लीलाभिः] विलासैः
अञ्चिताः] पूजिता [विक्रमाः] पादन्यासा येषु तेषु । अञ्चेः
याम् (७,२,५३ पा०) (१) इतीडागमः । "लीला विला-
ययोः" इत्यमरः । गतेषु विषयेषु [व्यनीयत इव] विनीता
? अन्यथा कथमस्या हंसगमनम् ? इत्युत्प्रेक्षा ॥३४॥
वृत्तेति । वृत्ते वर्तुले पूर्वमनुगते, अनुपूर्वे गोपुच्छाकारे

(१) पूजार्थे वर्तमानादञ्चतेः परस्याः क्त्वानिष्ठयोरिट् स्यात् ।
च लक्षणम् ।

अङ्गे शुभे सृष्टवतस्तदीये।
शेषाङ्गनिर्माणविधौ विधातु-
र्लावण्य उत्पाद्य इवास यत्नः॥ ३५॥
नागेन्द्रहस्तास्त्वचि कर्कशत्वा-

इत्यर्थः। वृत्ते च ते अनुपूर्वे च [वृत्तानुपूर्वे] [नातिदीर्घे च
महाविभाषया न समासः। नञो विशेषणत्वं च शब्दप्रयोगा
देव ज्ञेयम्। [शुभे] मङ्गले तस्या इमे [तदीये अङ्गे] प्रस
"जङ्घा तु प्रसृता" इत्यमरः। [सृष्टवतः] निर्मितवतः [विधा
तुः] स्रष्टुः [शेषाङ्गनिर्माणविधौ] जङ्घाव्यतिरिक्तावयवनिर्मा
णार्थमित्यर्थः। [उत्पाद्ये] पुनःसम्पाद्ये [लावण्ये] कान्तिविशे
षविषये। लावण्यलक्षणन्तु—२५ श्लोकव्याख्याने उक्तम्
[यत्नः आसेव] बभूवेवेत्युत्प्रेक्षा। उपादानमन्तरेण कार्यस्य
दुष्करत्वात्तदङ्गानाञ्च लावण्योपादानत्वात्पूर्वसम्पादितस्य
च जङ्घार्थमेव कार्त्स्न्येन विनियोगात् पुनर्लावण्यसम्पाद
यत्नः स्यादेव इत्येतादृक्सौन्दर्य्ये, तज्जङ्घे इति भावः। आसे
ति बभूवार्थे, तिङन्तप्रतिरूपकम् अव्ययमित्याह शाकटा
यनः। वल्लभस्तु—न तिङन्तप्रतिरूपकमव्ययम्, अस्तेभूरि
(१,४,५२ पा०) (१) आदेश-नियमात् तादृक्तिङन्तस्यै
भावात् किन्तु कवीनामयं प्रामादिकः प्रयोग इत्याह। वा
नस्तु—असगतिदीप्त्यादानेषु इति धातोर्लिटि रूपमिद
इत्याह। अस इत्यनुदात्तेत् [२] दीप्त्यर्थे, आस दिदीपे प्र
इत्यर्थः॥ ३५॥

---

(१) अस्तेर्भूः आर्धधातुके विषये।

(२) अनुदात्तेत् आत्मनेपदमनित्य चक्षिङोऽङित्वकरणात् प्राप-

देकान्तशैत्यात् कदलीविशेषाः।
लब्ध्वापि लोके परिणाहि रूपं
जातास्तदूर्वोरुपमानबाह्याः॥ ३६॥
एतावता नन्वनुमेयशोभि
काञ्चीगुणस्थानमनिन्दितायाः।

नागेन्द्रेति। [नागेन्द्राणाम्] ऐरावतादीनाम् [हस्ताः] कराः [त्वचि] चर्मणि [कर्कशत्वात्] [कदलीविशेषाः] रामरम्भादयः [एकान्तशैत्यात्] नियतशैत्याद्धेतोः [लोके] [परिणाहि] वैपुल्ययुक्तम्। "परिणाहो विशालता" इत्यमरः। [रूपं लब्ध्वापि] अपिशब्दात् करिकदलीमात्रस्य तादृक्परिणाहो नास्तीति भावः। तस्या ऊर्व्वोः [तदूर्व्वोः] [उपमानबाह्या जाताः] उपमानक्रियानर्हा बभूवुः। तदूर्वोर्न कार्कश्यं, नाप्येकान्तशैत्यम् इति भावः॥ ३६॥

एतावतेति। [अनिन्दितायाः] अनवद्यायाः [पार्वत्याः] [काञ्चीगुणस्थानम्] नितम्बबिम्बम् [एतावता ननु] एतावतैव। "प्रश्नावधारणानुज्ञाविनयामन्त्रणे ननु" इत्यमरः"। शोभते इति शोभि। आवश्यके णिनिः, ततस्त्वप्रत्ययः। अनुमेयं शोभित्वं शोभा यस्य तत् [अनुमेयशोभि।] त्वप्रत्ययस्तु गतार्थत्वान्न प्रयुक्तः--इत्याह वामनः। [पश्चात्] आदौ नैःसङ्गेऽपि पश्चात् तपश्चर्यानन्तरमित्यर्थः। गिरौ शेते इति गिरिशः शिवः। गिरौ डश्छन्दसीति (३,२,१५, का॰ वा॰) डप्रत्ययः। भाषायामपि क्वचिदिष्यते। अथवा गिरिः कैलासोऽस्यास्ति गिरिशः। लोमादित्वात् (५,२,१०० पा॰) श-प्र-

आरोपितं यद्गिरिशेन पश्चा-
दनन्यनारीकमनीयमङ्कम् ॥ ३७ ॥

तस्याः प्रविष्टा नतनाभिरन्ध्रं
रराज तन्वी नवरोमराजिः ।
नीवीमतिक्रम्य सितेतरस्य
तन्मेखलामध्यमणेरिवार्चिः ॥ ३८ ॥

32453

त्वयः । तेन [गिरिशेन ।] अन्यासां नारीणां कामनीयः कामयितुं शक्यो न भवतीति [अनन्यनारीकमनीयः] तम् [अङ्कम्] निजोत्सङ्गम् [आरोपितम्] अधिरोपितमिति यत् एतावता लिङ्गेनेति पूर्वेणान्वयः । रोहतेर्ण्यन्तात् कर्मणि क्तः । रुहः पोऽन्यतरस्यामिति (७,३,४३ पा०) हकारस्य पकारः । गत्यर्थविवक्षायां द्विकर्मकत्वम् । प्रधाने कर्मणि क्तः । गिरिजानितम्बबिम्बं विख्यातिशायिसौन्दर्यं गिरिशाङ्कारूढत्वात् व्यतिरेकेण नार्यन्तरनितम्बबिम्बवत् । विपक्षे इत्यनुक्तिरेव बाधिका । दाक्षायणीनितम्बबिम्बस्य तु पक्षसपक्षयोरन्यतरभावानतिवृत्तेर्निष्कलङ्कमनुमानमित्यलमस्थानसंरम्भेण ॥३७॥

तस्या इति । [नीवीम्] वस्त्रग्रन्थिम् । "स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च" इत्यमरः । [अतिक्रम्य] अतीत्य [नतम्] निम्नम् । [नाभिरन्ध्रम् प्रविष्टा] प्रविशन्ती [तन्वी] सूक्ष्मा [तस्याः] पार्वत्याः [नवरोमराजिः ।] [सितेतरस्य] असितस्य इन्द्रनीलस्येत्यर्थः । तस्याः पार्वत्याः मेखला: [तन्मेखला ।] तस्या इत्यनुवृत्ती पुनस्तच्छब्दोपादानं वाक्यान्तरत्वात् सोढव्यम् । यद्वा तस्याः नीव्याः मेखला तन्मेखला

मध्येन सा वेदिविलग्नमध्या
वलित्रयं चारु बभार बाला ।
आरोहणार्थं नवयौवनेन
कामस्य सोपानमिव प्रयुक्तम् ॥ ३९ ॥
अन्योऽन्यमुत्पीडयदुत्पलाक्ष्याः
स्तनद्वयं पाण्डु तथा प्रवृद्धम् ।
मध्ये यथा श्याममुखस्य तस्य
मृणालसूत्रान्तरमप्यलभ्यम् ॥ ४० ॥

तदवस्थानात् । तस्याः [मध्यमणेरर्चिः] प्रभा [इव रराज] "ज्वालाभासोर्नपुंस्यर्चिः" इत्यमरः ॥ ३८ ॥

मध्येनेति । "वेदिः परिष्कृता भूमिः" इत्यमरः । [वेदिविलग्नमध्या] वेदिवत् कृशमध्या १) तनुमध्येति यावत् । [बाला] पार्वती [मध्येन] मध्यभागेन [चारु] सुन्दरम् [वलित्रयम्] [कामस्यारोहणार्थम्] [नवयौवनेन प्रयुक्तम्] रचितसोपानमिव बभार] इत्युत्प्रेक्षा ॥ ३९ ॥

अन्योऽन्यमिति । [अन्योऽन्यम्] परस्परम् । कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये इति (८,१,१२पा०वा०) द्विरुक्तिः । समासवद्बहुलमिति बहुलवचनादसमासपक्षेऽपि पूर्वपदस्थस्य सुपः सुर्वक्तव्य इति तत्रत्यवार्तिकम् । [उत्पीडयत्] उपरुन्धत् [पाण्डु] गौरम् [उत्पलाक्ष्याः स्तनद्वयम्] [तथा] तेन प्रका-

१) [illegible] ।
[illegible] ।

शिरीषपुष्पाधिकसौकुमार्यौ
बाहू तदीयाविति मे वितर्कः ।
पराजितेनापि कृतौ हरस्य
यौ कण्ठपाशौ मकरध्वजेन ॥ ४१ ॥

कण्ठस्य तस्याः स्तनबन्धुरस्य
मुक्ताकलापस्य च निस्तलस्य ।

.रैर्वा [प्रवृद्धम् ।] कर्तरि क्तः । [श्याममुखस्य] कृष्णचुचुकस्ये
स्वरूपवर्णनम् [तस्य स्तनद्वयस्य मध्ये यथा] येन प्रकारे
[मृणालसूत्रान्तरम्] बिसतन्तुमात्रावकाशोऽपि [अलभ्य
लब्धु मशक्यम् । "अन्तरमवकाशावधिपरिधानान्तर्विभेदत
दर्थे" इत्यमरः । अत्र सम्बन्धे असम्बन्धरूपातिशयोक्त्यलङ्कार
कुचयोः पीवरत्वातिशयार्थम् अवकाशसम्बन्धेऽप्यसम्बन्धा
धानादिति ॥ ४० ॥

लोके सुकुमारत्वमेव कुसुमास्त्रस्य साधकत्वमिति सि
सत्याह,—शिरीषेति । तस्या इमौ [तदीयौ] [बाहू] [शि
षपुष्पादधिकं सौकुमार्यम्] मार्दवं ययोस्तथोक्तौ [इति] मे
तर्कः ऊहः कुतः ? [यौ] बाहू [पराजितेनापि] पूर्वं निर्जि
नापि [मकरध्वजेन] कामेन [हरस्य कण्ठपाशौ] कण्ठबन्ध
रज्जू [कृतौ] कण्ठालिङ्गनं प्रापिताविथर्थः । तदसाध्यसा
मात् तत् आधिक्यमिति भावः । अत्र बाह्वोरारोपितकण्ठ
शत्वस्य प्रकृतवैरनिर्यातनोपयोगात् परिणामालङ्कारः ॥४

कण्ठस्येति [स्तनाभ्यां बन्धुरस्य] उन्नतस्य [तस्याः] प
र्वत्याः [कण्ठस्य] गलस्य [निस्तलस्य] वर्तुलस्य [मुक्ताकला

अन्योऽन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः ॥ ४२ ॥
चन्द्रं गता पद्मगुणान्न भुङ्क्ते
पद्माश्रिता चान्द्रमसीमभिख्याम् ।
उमामुखन्तु प्रतिपद्य लोला
द्विसंश्रयां प्रीतिमवाप लक्ष्मीः ॥ ४३ ॥

णाभूषणस्य च । "वर्तुलं निस्तलं वृत्तं बन्धुरन्नूनतानतम्" 'कलापो भूषणे बर्हे तूणीरे संहतावपि' इति चामरः । अन्योऽन्यशोभाजननात्] [भूषणभूष्यभावः] अलङ्कारालङ्कार्यभावः [साधारणः] समानो [बभूव ।] उभावपि अन्योऽन्यस्य भूषी भूषणे च बभूवतुरित्यर्थः । अत्र कण्ठमुक्ताकलापयोः शोभाक्रियाद्वारेणान्योऽन्यभूषाजनकत्वादन्योन्यालङ्कारः । तदुक्तम्—परस्परं क्रियाजननमन्योऽन्यमिति ॥ ४२ ॥

इदानीं पार्वतीवदनं चन्द्रकमलसदृशमित्येतदेव वचोभङ्ग्याह,—चन्द्रमिति । [लोला चपला परिभ्रमणशीलेत्यर्थः । लक्ष्मीः] कान्त्यभिमानिनी देवता [चन्द्रं गता] प्राप्ता सती पद्मगुणान्] सौगन्ध्यादीन् । [न भुङ्क्ते नानुभवति । [पद्माश्रिता] सती चन्द्रमस इमाम् [चान्द्रमसीम् अभिख्याम्] शोभाम् । "अभिख्या नामशोभयोः" इत्यमरः । अस्तवदनान्दर्शी न भुङ्क्ते । [उमामुखं प्रतिपद्य तु] हे चन्द्रपद्मे संश्रयः आश्रयं यस्यास्ताम् [द्विसंश्रयां प्रीतिम्] आनन्दम् [अवाप] शोभयगुणसत्त्वादिति भावः । अत्रोपमानभूतचन्द्रपद्मापेक्षया उपमेयस्य उमामुखस्य अधिकगुणवत्त्वोक्त्या व्यतिरेका-

पुष्पं प्रवालोपहितं यदि स्या-
न्मुक्ताफलं वा स्फुटविद्रुमस्थम्।
ततोऽनुकुर्य्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य ॥ ४४ ॥

स्वरेण तस्याममृतस्रुतेव
प्रजल्पितायामभिजातवाचि।

लङ्कारः। तदुक्तम्—"भेदप्राधान्येनोपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेकः" इति ॥ ४३ ॥

पुष्पमिति। [पुष्पम्] पुण्डरीकादिकम् [प्रवाले] बालपल्लवे [उपहितम्] निहितम् [स्याद्यदि]। "प्रवालो वल्लकीदण्डे विद्रुमे बालपल्लवे" इति विश्वः। [मुक्ताफलम् वा] स्फुटे निर्मले विद्रुमे तिष्ठतीति [स्फुटविद्रुमस्थम्] स्याद्यदि [ततः] तर्हि [विशदस्य] शुभ्रस्य [ताम्रे] अरुणे [ओष्ठे] [पर्य्यस्ता] प्रसृता [रुक्] कान्तिर्यस्य। तथोक्तस्य [तस्याः] पार्वत्याः [स्मितस्य] अनुकुर्य्यात् स्मितमनुकुर्य्यादित्यर्थः। अत्र "माषाणामश्नीयात्" इतिवत् सम्बन्धमात्रविवक्षया षष्ठी। अत्र पुष्पप्रवालयोर्मुक्ताविद्रुमयोश्च असम्बन्धेऽपि सम्बन्धोक्त्या अतिशयोक्तिः। सा च सम्भावना इत्यलङ्कारसर्वस्वकारः। विशेषतस्तु पुष्पमुक्ताफलयोरुपमानयोः प्रकृतोत्कर्षार्थमुपमेयताकल्पनात् प्रतीपालङ्कारः तदुक्तम्—"उपमानस्याक्षेप उपमेयताकल्पनं वा, प्रतीपः" इति लक्षणात्। स च पूर्वोक्तातिशयोक्त्यनुप्राणित इति ॥४४

स्वरेणेति। [अभिजातवाचि] मधुरभाषिण्याम् [तस्याम्] पार्वत्याम् [अमृतस्रुता] अमृतस्राविणा [इव] क्विप्। [स्वरे

अप्यन्यपुष्टा प्रतिकूलशब्दा
श्रोतुर्वितन्त्रीरिव ताड्यमाना ॥ ४५ ॥

प्रवातनीलोत्पल निर्विशेष-
मधीरविप्रेक्षितमायताक्ष्या ।
तया गृहीतं नु मृगाङ्गनाभ्य-
स्ततो गृहीतं नु मृगाङ्गनाभिः ॥ ४६ ॥

ादेन [प्रजल्पितायाम्] आलपन्त्याम् । कर्त्तरि क्तः । अन्यैः ाकादिभिः पुष्टा [अन्यपुष्टा] कोकिलापि । मुख्यया वृत्त्या ातिवचनत्वाभावात् ङीबभावः । [ताड्यमाना] वाद्यमाना षमवद्या तन्त्रीः [वितन्त्रीः] इव । अवितृस्तृतन्त्रिभ्य (३,१५८, ०) तन्त्रिधातोरौणादिक ईप्रत्ययः । ङीबभावाच्च हल्ङ्या- भ्य इति (६,१,६८ पा०) सुलोपः । तदुक्तम् । "अवी-लक्ष्मी- री तन्त्री-ह्रीधी-श्रीणामुणादितः । स्त्रीलिङ्गानाममीषान्तु सुलोपः कदाचन" इति । एते ङीबन्ता न भवन्तीत्यर्थः । ोतुः] जनस्य [प्रतिकूलशब्दा] कर्णकठोरनादा भवतीति थः ॥ ४५ ॥

प्रवातेति । प्रवाते प्रभूतवातस्थले [यन्नीलोत्पलम्] ततः र्विशेषम्] निर्भेदं तत्सदृशमित्यर्थः । [अधीरविप्रेक्षितम्] कितविलोकितम् [आयताक्ष्या] विशालनेत्रया पार्वत्या गाङ्गनाभ्यः] हरिणीभ्यः [गृहीतम्] अभ्यस्तम् [नु ?] अथवा गाङ्गनाभिः [ततः] तस्याः पार्वत्याः । पञ्चम्यास्तसिल् । ीतं [नु ?] अत्र विवक्षितस्य परस्परग्रहणयोर्निश्चयादुत्-

तस्याः शलाकाञ्जननिर्मितेव
कान्तिर्भ्रुवोरायतलेखयोर्या ।
तां वीक्ष्य लीलाचतुरामनङ्गः
स्वचापसौन्दर्य्यमदं मुमोच ॥ ४७ ॥

लज्जा तिरश्चां यदि चेतसि स्या-
दसंशयं पर्वतराजपुत्र्याः ।
तं केशपाशं प्रसमीक्ष्य कुर्यु-
र्बालप्रियत्वं शिथिलं चमर्यः ॥४८॥

प्रेक्षा इति केचित् । तदुपजीविसन्देहालङ्कार इत्यन्ये । उभयं
सङ्कर इत्यपरे ॥ ४६ ॥

तस्या इति । [आयतलेखयोः] दीर्घरेखयोः [तस्याः] पा
र्वत्याः [भ्रुवोः] सम्बन्धिनी [शलाकया] अञ्जनेन [निर्मितेव
स्थिता या [कान्तिः] [लीलाचतुराम्] विलाससुभगाम् [ताम्
कान्तिम् [वीक्ष्य] [अनङ्गः] [स्वचापसौन्दर्य्येण] यो [मदः] त
[मुमोच] इह सौन्दर्य्यातिशयोक्तिः ॥ ४७ ॥

लज्जेति । [तरश्चाम्] तिर्य्यग्जातीनाम् [चेतसि] लज्ज
[स्याद्यदि] संशयाभावः [असंशयम्] सन्देहो नास्तीत्यर्थः
[पर्वतराजपुत्र्याः ।] शार्ङ्गरवाद्यञो ङीन् (४,१,७३पा०) इ
ङीन् । [तम्] प्रसिद्धम् [केशपाशम्] केशकलापम् । "पाश
पक्षश्च हस्तश्च कलापार्थाः कचात् परे" इत्यमरः । [प्रसमीक्ष्य
दृष्ट्वा [चमर्य्यः] मृगीविशेषाः बालाः प्रिया यासामिति वि
बालप्रियास्तासां भावः [बालप्रियत्वम्] प्रियबालत्वमित्यर्थः

सर्वोपमाद्रव्यसमुच्चयेन
यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्ना-
देकस्थसौन्दर्यदिदृक्षयेव ॥ ४९ ॥

तां नारदः कामचरः कदाचित्
कन्यां किल प्रेक्ष्य पितुः समीपे ।
समादिदेशैकवधूं भवित्रीं
प्रेम्णा शरीरार्द्धहरां हरस्य ॥ ५० ॥

ाहिताग्न्यादिपाठात् वा परनिपातः । त्वतलोर्गुणवचन-
ेति (६,३,३५ पा० वा०) (१) पुंवद्भावः । [शिथिलं
र्युः ।] निर्लज्जत्वात् शिथिलयन्तीत्यर्थः । अतएवात्र निर्लज्ज-
करणहेतोराद्यपादे वाक्यार्थत्वेनोक्त्या काव्यलिङ्गाख्याल-
ारः । तदुक्तम्,—"हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृ-
म्" इति ॥ ४८ ॥

सर्वेति । किम्बहुना [सा] पार्वती [विश्वसृजा] विधात्रा
त्र तिष्ठतीति [एकस्थम्] तस्य [सौन्दर्यस्य] सर्ववस्तुगत-
त्यर्थः । [दिदृक्षयेव] [प्रयत्नात् यथाप्रदेशम्] क्रमात् [वि-
निवेशितेन] स्थापितेन [सर्वेषामुपमाद्रव्याणाम्] चन्द्रारविन्दा-
पमानवस्तूनाम् [समुच्चयेन] समाहारेण [निर्मिता ।]
दृक्षयेवेति फलोत्प्रेक्षा दर्शनार्थित्वाद्विश्वसृज इति ॥४९॥

तामिति । कामेनेच्छया चरतीति [कामचरो नारदः
दाचित् पितुः] हिमवतः [समीपे कन्यां ताम्] पार्वतीम्

(१) गुणवाचकस्य पुंवद्रूपं स्यात्तलोः परयोरिति वार्तिकार्थः ।

गुरुः प्रगल्भेऽपि वयस्यतोऽस्या-
स्तस्थौ निवृत्तान्यवराभिलाषः।
ऋते कृशानोर्न हि मन्त्रपूत-
मर्हन्ति तेजांस्यपराणि हव्यम्॥ ५१॥

[प्रेक्ष्य किल] [प्रेम्णा] न त्वन्यथा [हरस्य] शिवस्य अर्धं हरतीति अर्धहरा। हरतेरनुद्यमनेऽच् (३,२,९ पा०) इत्यच्प्रत्ययः। शरीरस्यार्धहराम् [शरीरार्धहराम्।] कुलधुरन्धरादिवदवयवद्वारा समुदायविशेषकत्वात् समासः अन्यथा त्वर्धस्य(१ समप्रविभागवचनत्वादर्धशरीरेति स्यात् [एकवधूम्] असपत्नीकां भार्याम्। पूर्वकालेत्यादिना (२,१,४९ पा०) समासः [भवित्रीम्] भाविनीम् [समादिदेश।] हरस्यार्धाङ्गहारिण्येका पत्नी भविष्यतीत्यादिष्टवानित्यर्थः॥ ५०॥

गुरुरिति। [गुरुः] पिता "गुरू गीष्पतिपित्राद्यौ" इत्यमरः। [अतः] नारदवचनाद्धेतोः [अस्याः] पार्वत्याः [प्रगल्भे वयस्यपि] यौवने सत्यपि [निवृत्तोऽन्यस्मिन् वरे] जामातरि [अभिलाषः] यस्य स तथोक्तः सन्। "वरो ना रूपजामात्रोः" इति वैजयन्ती। [तस्थौ] वरान्तरं नान्विष्टवानित्यर्थः। ननु कुतोऽसौ निर्बन्धः? इत्यत आह,—ऋत इति। तथा हि [मन्त्रैः पूतम्] संस्कृतम्, हूयत इति [हव्यम्] आज्यादिकम् [कृशानोः,] पावकात् [ऋते] कृशानुं विना। अन्यारादि-

---

(१) अर्धं नपुंसकम् (२,२,२पा०) समांशवाचिनोऽर्धशब्दः षष्ठ्यन्तेन सह समस्यते इति षष्ठीसमासापवादकसूत्रे अर्धशब्दस्य प्राङ्निपातेनार्धशरीरेति स्यात् तथाच धुरन्धर इति समासानन्तरं यथा कुलशब्दस्य योग एवमिहाप्यर्धहरेति समासानन्तरं शरीरस्य योगः।

अयाचितारं न हि देवदेव-
मद्रिः सुतां ग्राहयितुं शशाक ।
अभ्यर्थनाभङ्गभयेन साधु-
र्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे ॥ ५२ ॥

यदैव पूर्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज ।

त्यादिना (२,३,२८ पा०) पञ्चमी । [अपराणि तेजांसि] सूर्यादीनि [नार्हन्ति] न भजन्तीत्यर्थः । ईश्वरादन्यस्य योग्यस्याभावादुपेक्षेति भावः ॥ ५१ ॥

तर्हि तस्मा एव दीयताम्, इत्याशङ्क्याह,—

अयाचितारमिति । [अद्रिः] हिमवान् [अयाचितारम्] अयाचमानम् [देवदेवम्] महादेवम् [सुताम्] पार्वतीम् [ग्राहयितुम्] स्वयमाहूय(१) परिग्राहयितुम् [न शशाक] नोत्सेहे । तथा हि, [साधुः] सज्जनः । "साधुर्वार्धुषिके चारौ सज्जने ऽभिधेयवत्" इति विश्वः । [अभ्यर्थनाभङ्गभयेन] याच्ञा-भङ्गभीत्या [इष्टेऽप्यर्थे] विषये [माध्यस्थ्यम् औदासीन्यम्] अवलम्बते] ॥ ५२॥

न च तथैव स्थितः, किन्तु उपायान्तरं चिन्तितवानिति तु प्रतीति,—

यदेति । शोभना दन्ता यस्याः सा [सुदती ।] वयसि दन्तस्य दतृ (५,४,१४१ पा०) इति दत्रादेशः । स्त्रियाम्

(१) [illegible] ग्राह- [illegible] ।

तदा प्रभृत्येव विमुक्तसङ्गः
पतिः पशूनामपरिग्रहोऽभूत् ॥ ५३ ॥

स कृत्तिवासास्तपसे यतात्मा
गङ्गाप्रवाहोक्षितदेवदारु ।
प्रस्थं हिमाद्रेर्मृगनाभिगन्धि
किञ्चित् क्वणत्किन्नरमध्युवास ॥ ५४ ॥

(४,१,६पा०) इति ङीप्। [सा] पार्वती [पूर्वे जनने] पूर्वस्मि
जन्मनि । पूर्वादिभ्यो नवभ्यो वेति (७,१,१६ पा०) स्मिन्नादे
शविकल्पः। "पूर्वं ज्वलने" इति पाठे पूर्वं दाक्षायणीत
ज्वलने योगाग्नौ । [यदा] काले [दक्षरोषाच्छरीरम्] देह
[ससर्ज] तत्याज । [तदाप्रभृत्येव] तदाद्येव यथा तथा [पशू
नाम् पतिः] शिवः [विमुक्तसङ्गः] त्यक्तविषयासङ्गः सन् [अप
रिग्रहः] अपत्नीकः [अभूत्] दारान्तरं न परिजग्राहेत्यर्थः
"पत्नीपरिजनादानमूलशापाः परिग्रहाः" इत्यमरः ॥ ५३

स इति। [कृत्तिवासाः] चर्माम्बरः। "अजिनं चर्म कृत्ति
स्त्री" इत्यमरः। [यतात्मा] नियतचित्तः [सः] पशुपतिः [त
पसे] तपोऽर्थम् [गङ्गाप्रवाहेणोक्षिताः] सिक्ताः [देवदारव
यस्मिन् तत्तथोक्तम्। [मृगनाभिगन्धि] कस्तूरीगन्धवत् कस्
तूरीमृगसञ्चारादिति भावः। "मृगनाभिर्मृगमदः कस्तूरी च
कोलकम्" इत्यमरः। [क्वणन्तः] गायन्तः [किन्नराः] यस्मि
तत्तथोक्तम्। [किञ्चित्] किमपि [हिमाद्रेः प्रस्थम्] सानु
[अध्युवास] कुत्रचिद् प्रस्थे न्यवात्सीदित्यर्थः। उपान्वध्याङ्व

---

(१) क्वणादिपूर्वकक्वणतीत्याचारः कर्तव्यः स्यात् ।

गणा नमेरुप्रसवावतंसा
भूर्जत्वचः स्पर्शवतीर्दधानाः ।
मनःशिलाविच्छुरिता निषेदुः
शैलेयनद्धेषु शिलातलेषु ॥ ५५ ॥

तुषारसङ्घातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान् ।
दृष्टः कथञ्चिद्गवयैर्विविग्नै-
रसोढसिंहध्वनिरुन्ननाद ॥ ५६ ॥

ति (१,४,४८ पा०) आधारस्य कर्मत्वम् । "प्रस्थोऽस्त्री सा-
मानयोः इत्यमरः ॥ ॥ ५४ ॥

गणा इति । [गणाः] प्रमथगणाः । "गणाः प्रमथसंख्यौ-
घाः" इति वैजयन्ती । [नमेरुप्रसवावतंसाः] सुरपुन्नागकुसु-
मशेखराः । "नमेरुः सुरपुन्नागः" इति विश्वः । [स्पर्शवतीः]
सुखस्पर्शाः मृदीरित्यर्थः । प्रशंसायां मतुप् । भूर्जत्वचः भूर्ज-
वल्कलानि [दधानाः] वसाना इत्यर्थः । [मनःशिलाभिः]
धातुविशेषैः [विच्छुरिताः] अनुलिप्ताः सन्तः । शिलायां
भवम् [शैलेयम्] गन्धौषधिविशेषः । शिलायाः, स्त्रीभ्यो ढक्
१) (४,१,१२० पा०) इति भवार्थे ढक् । "शिलाजतु च
शैलेयम्" इति यादवः । तेन [नद्धेषु] व्याप्तेषु [शिलातलेषु]
[निषेदुः] उपविविशुरित्यर्थः ॥ ५५ ॥

तुषारेति । [तुषारसङ्घाताः] हिमघनाः त एव [शिलाः]
ताः [खुराग्रैः समुल्लिखन्] विदारयन् दर्पेण कली मधुरध्वनि-

१) [illegible]भ्यो ढक् स्यात् । [illegible] ।

तत्राग्निमाधाय समित्समिद्धं
स्वमेव मूर्त्यन्तरमष्टमूर्त्तिः ।
स्वयं विधाता तपसः फलानां
केनापि कामेन तपश्चचार ॥ ५७ ॥
अनर्घ्यमर्घ्येण तमद्रिनाथः

र्यस्य सः [दर्पकलः] [विविग्नैः] भीतैः [गवयैः] गोसदृशमृग-विशेषैः [कथञ्चित्] कृच्छ्रेण [दृष्टः] ककुदमस्यास्तीति [ककुद्मान्] वृषभः [असोढः सिंहानां ध्वनिः] येन सः सिंहध्वनि-मसहमानः सन् [उन्ननाद] उच्चैर्ननाद जगर्ज्जेत्यर्थः । स्वभावोक्तिरलङ्कारः । तदुक्तम्,—"स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्" इति ॥ ५६ ॥

तत्रेति । [तपसः फलानाम्] इन्द्रत्वादीनाम् [स्वयं विधाता] जनयिता दातेत्यर्थः । अष्टौ मूर्त्तयो यस्य सः [अष्टमूर्त्तिः] ईश्वरः । "भूता (१) र्कचन्द्रयज्वानो मूर्त्तयोऽष्टौ प्रकीर्त्तिताः" इति । [तत्र] प्रस्थे [स्वम्] स्वकीयमेव [मूर्त्यन्तरम्] मूर्त्तिभेदम् [समिद्भिः समिद्धम्] दीपितम् [अग्निमाधाय] प्रतिष्ठाप्य [केनापि कामेन] कयापि फलकामनया [तपश्चचार] चक्रे । प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इति न्यायात्कामेनेत्युक्तम् । तस्यावाप्तसमस्तकामत्वात्केनापीत्युक्तम् ॥ ५७ ॥

अनर्घ्यमिति । अद्रीणां नाथः [अद्रिनाथः] हिमवान् अर्घं मूल्यमर्हतीत्यर्घ्यः । "मूल्ये पूजाविधावर्घः" इत्यमरः

(१) भूतानि पञ्च पृथिव्यादीनि ।

स्वर्गौकसामर्चितमर्चयित्वा ।
आराधनायास्य सखीसमेतां
समादिदेश प्रयतां तनूजाम् ॥ ५८ ॥
प्रत्यर्थिभूतामपि तां समाधेः
शुश्रूषमाणां गिरिशोऽनुमेने ।
विकारहेतौ सति विक्रियन्ते
येषां न चेतांसि तएव धीराः ॥ ५९ ॥

ण्डादिभ्यो यः (५,१,६६ पा०) इति यप्रत्ययः । [अर्घ्यः] न
र्हतीति [अनर्घ्यः] तमनर्घ्यममूल्यमित्यर्थः । स्वर्गः ओकः
स्थानं येषां तेषाम् [स्वर्गौकसाम्] देवानाम् [अर्चितम्] देवैः
ज्यमानमित्यर्थः । मतिबुद्धिपूजार्थेभ्यश्च (३,२,१८८पा०) इति
र्त्तमाने क्तः । क्तस्य च वर्त्तमाने (२,३,६७ पा०) इति षष्ठी
म्] ईश्वरम् [अर्घ्येण] पूजार्थोदकेन । पादार्घाभ्याञ्चेति
४,२५ पा०) यत्प्रत्ययः । "षट् तु त्रिष्वर्घ्यमर्घार्थे पाद्यं
य वारिणि" इत्यमरः । [अर्चयित्वा] पूजयित्वा [अस्य]
रस्य [आराधनाय] [सखीभ्याम्] । जयाविजयाभ्याम्
ताम्] [प्रयताम्] नियताम् [तनूजाम्] सुताम् [समादि-
] आज्ञापयामास ॥ ५८ ॥

[प्रत्यर्थीति ।] गिरिशः । शिवः [समाधेः प्रत्यर्थिभूताम्]
पचभूतामपि । सुप्सुपेति समासः । श्रोतुमिच्छन्तीम्
शुश्रूषमाणाम्] सेवमानाम् । सेवका हि सेव्ये दत्तकर्णा भव-
। इच्छार्थे सन्प्रत्ययः । ज्ञा-श्रु-स्मृ-दृशां सनः (१,३,५७
) इत्यात्मनेपदम् [ताम्] पार्वतीम् [अनुमेने] अङ्गीच-

अवचितबलिपुष्पा वेदिसम्मार्गदक्षा
नियमविधिजलानां बर्हिषाञ्चोपनेत्री ।
गिरिशमुपचचार प्रत्यहं सा सुकेशी
नियमितपरिखेदा तच्छिरश्चन्द्रपादैः ॥६०

कार न प्रतिविम्बवानित्यभिप्रायः। न चैतावता धीर कश्चिद्विकार इत्याशयः। धीरत्वमेवार्थान्तरन्यासेनाह,- विकारेति। [विकारहेतौ] प्रकृतेरन्यथात्वस्य [हेतौ] स्त्रीसं धानादिकारणे [सति] विद्यमानेऽपि [येषां चेतांसि विक्रियन्ते] न विकृतं नीयन्ते [तएव धीराः।] विक्रिय इति कर्मणि लट्। ॥ ५९॥

शुश्रूषाप्रकारमेवाह,—

अवचितेति। [सुकेशी] शोभनमूर्द्धजा। स्वाङ्गाच्चोपसर्जना संयोगोपधादिति (१) (४,१,५४ पा०) ङीप्। [सा] पार्व [अवचितानि] लूनानि [बलिपुष्पाणि] पूजाकुसुमानि य सा [वेदेः] नियमवेदिकायाः [सम्मार्गे] सम्मार्ज्जने [द [नियमविधेः] नित्यकर्मानुष्ठानस्य यानि [जलानि] तेष [बर्हिषाम्] कुशानाम् [च] [उपनेत्री] आनेत्री सती [त गिरिशस्य [शिरसि] [चन्द्रस्य पादैः] रश्मिभिः। "पा रश्मयङ्घ्रितुर्य्यांशाः" इत्यमरः। [नियमितपरिखेदा] निवर्ति परिश्रमा सती अहन्यहनि [प्रत्यहम्]। अव्ययं विभ समीपसमृद्धीत्यादिना (२,१,६, पा०) नित्यतार्थेऽव्ययीभाव

(१) उपसर्जनमूतात् (इतरांगे विशेषणभूतात्) स्वाङ्गवाचकात् ... स्वाङ्ग न तु संयोगोपधात्। यथा चमालिनः।

त श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमोत्पत्तिर्नाम प्रथमः सर्गः॥ १॥

द्वितीयः सर्गः।

स्मिन् विप्रकृताः काले तारकेण दिवौकसः।
राषाहं पुरोधाय धाम स्वायम्भुवं ययुः॥ १॥

सकादन्यतरस्याम् (५,४,१०८ पा०) इति षच्प्रत्ययः।
रियमुपचचार] शुश्रूषाञ्चक्रे॥ ६०॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनी-
समाख्यायां प्रथमः सर्गः॥ १॥

तस्मिन्निति। [तस्मिन् काले] पार्वतीशुश्रूषाकाले [तार-
तारकनाम्ना वज्राङ्गपुत्रेण केनचिदसुरेण [विप्रकृताः]
ताः दिवमोकः स्थानं येषां ते [दिवौकसः] देवाः। "दिवं
ऽन्तरीक्षे च" इति विश्वः। द्यौः ओक इति पक्षे पृषोद-
त्वात्साधुः। तुरं त्वरितं साहयत्यभिभवतीति तुराषाट्।
यतेश्चौरादिकात् क्विप्। नहि वृति-वृषीत्यादिना (६,३,
पा०) पूर्वपदस्य दीर्घः प्रकृतिग्रहणे (१) प्रातिपदिक-

नहिवृतिवृषीत्यादिसूत्रे नह्यादीनां धातूनामेव ग्रहणेऽपि धातूनां

तेषामाविरभूद्ब्रह्मा परिम्लानमुखश्रियाम् ।
सरसां सुप्तपद्मानां प्रातर्दीधितिमानिव ॥ २ ॥
अथ सर्वस्य धातारं ते सर्वे सर्वतोमुखम् ।

स्यापि ग्रहणात् । मुग्धबोधकारस्तु तुराषाडष्टावन्त इत्याचष्टे
तम् [तुरासाहम्] देवेन्द्रम् । अजादिषु साड्रूपत्वाभावा
सहेः साड़ः सः (१) (८,३,५६ पा०) इति षत्वं न भवा
[पुरोधाय] पुरस्कृत्य । स्वयम्भुवो ब्रह्मण इदम् [स्वायम्भुवं
संज्ञापूर्वकविधेरनित्यत्वात् ओर्गुणः (६,४,१४६ पा०) (२
इति गुणो न । [धाम] स्थानं [ययुः] ब्रह्मलोकं जग्मुरित्यर्थः॥
तेषामिति । [परिम्लाना] परिक्षीणा [मुखश्रीः] मुख
कान्तिर्येषां तथोक्तानाम् [तेषाम्] देवानाम् [ब्रह्मा] [सुप्तपद्मा
नाम्] मुकुलितारविन्दानाम् [सरसाम्] [प्रातर्दीधितिमान्
सूर्य्य इव [आविरभूत्] प्रकाशोऽभूदित्यर्थः । "प्रकाशे प्रा
राविः स्यात्" इत्यमरः । सूर्य्योपमानेन तेषां ग्लानिहरत्वं सू
तम् । श्रौतोपमालङ्कारः । तल्लक्षणन्तु—"स्वतःसिद्धेन भिन्ने
सम्मतेन च धर्मतः । साम्यमन्येन वर्ण्यस्य वाच्यञ्चेकपदोपमा
इति ॥ २ ॥
अथेति । [अथ] आविर्भावानन्तरम् [सर्वे ते] देवाः [सर्वं

केचन्द्रमोमायातयात् क्वाथायनया प्रायिपरिम्लापि पद्मश्रियि ।
एवाम् चूर्ण कायितुम् ।
(१) साड्इति सलखकारस्थैव निर्देशात्तत्त्वादेव मत्ये एवमतं नास्ति
(२) ओरोदिति वरचैनैव रूपसिद्धेः अदेङ्गुण इति गुणव्रात
अत्रत्रा निर्देशोऽनित्यतां ज्ञापयति तेनात्र न गुणःअपित्रकारेण ।

गीर्थं वाग्भिरर्थ्याभिः प्रणिपत्योपतस्थिरे ॥३॥
म त्रिमूर्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।
यत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ ४ ॥

स्ततः मुखानि यस्य तम् [सर्वतोमुखम्] चतुर्मुखमित्यर्थः ।
चाम्] विद्यानाम् [ईशम्] [सर्वस्य] जगतः [धातारम्]
ारम् ब्रह्माणम् [प्रणिपत्य] नमस्कृत्य अर्थादनपेताभिः
र्थाभिः] अर्थयुक्ताभिरित्यर्थः । धर्मपथ्यर्थन्यायादनपेते (४,
२ पा०) इति यत्प्रत्ययः । [वाग्भिरुपतस्थिरे] तुष्टुवुरि-
: । उपाद्देवपूजासङ्गतिकरणमित्रपथिष्विति वक्तव्यम्
३,२५ पा० वा०) इत्यात्मनेपदम् ॥ ३ ॥

स्तुतिप्रकारमाह, नम इत्यादिभिर्द्वादशभिः श्लोकैः—
नम इति । हे भगवन्नित्यध्याहार्य्य व्याख्येयम् । [सृष्टेः
।] अन्यारादित्यादिना (२,३,२९ पा०) अञ्चूत्तरपद-
पञ्चमी । [केवलात्मने एकरूपाय "आत्मा वा इदमेक
आसीत्" इति श्रुतेः । "निर्णीते केवलमिति त्रिलिङ्गं
त्वयोः" इत्यमरः । [पश्चात्] सृष्टिप्रवृत्तिकाले । विभ-
अनेनेति [विभागः] [गुणानाम्] सत्वादीनाम् [त्रयम्]
विभागो यस्य तस्मै । "गुणाः सत्वं रजस्तम" इत्यमरः ।
म्] उपाधिं स्रष्टृत्वादिकमित्यर्थः [उपेयुषे] प्राप्तवते ।
यवानन्नाश्चानमूचानश्चेति (३,२,१०९ पा०) निपातः ।
व [त्रिमूर्तये] ब्रह्मविष्णुरुद्ररूपिणे [तुभ्यम् नमः] नमः
त्यादिना (२,३,१६ पा०) । चतुर्थी । उक्तञ्च । "नमो

मुखाधर्षे वर्ते आगाद् विभ्रतेरुपतूर्थीरात्मनेपदं स्याद् ।

यदमोघमपामन्तरुप्तं बीजमज ! त्वया ।
अतश्चराचरं विश्वं प्रभवस्तस्य गीयसे ॥ ५ ॥
तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन् ।
प्रलयस्थितिसर्गाणामेकः कारणतां गतः ॥ ६

रजोजुषे सृष्टौ स्थितौ सत्त्वमयाय च । तमोरूपाय संह
त्रिरूपाय स्वयम्भुवे,, इति ॥ १ ॥

यदिति । न जायत इत्यजः हे [अज !] [अपाम्] जल
नाम् [अन्तः] त्वया यदमोघम् अवन्ध्यम् [बीजम्] वीर्य
[उप्तम्] निक्षिप्तम् । "सृष्टम्,, इति पाठे विसृष्टमित्यर्थ
शुक्रं तेजोरेतसी च बीजवीर्य्येन्द्रियाणि च,, इत्यमरः । [अ
ते बीजात् [चराचरम्] स्थावरजङ्गमात्मकम् । समाहारे द्व
कवद्भावः । [विश्वम्] जगत् उत्पन्नमिति शेषः । तस्य विश्व
प्रभवत्यस्मादिति [प्रभवः] कारणं [गीयसे] अत्र मनुः "अ
एव ससर्ज्जादौ तासु बीजमवासृजत् । तदण्डमभवद्धैमं स
स्रांशुसमप्रभम्,, इति । (१,अ०८,९, श्लो०) "अदश्चरा
विश्वं प्रसवस्तस्य गीयते,, इति पाठे अद इदं चराचरं वि
तस्य बीजस्य प्रसवो गीयते लोके इति शेषः ॥ ५ ॥

तिसृभिरिति । [एकः] सृष्टेः प्राक् केवलः त्वं [तिसृभि
वस्थाभिः] त्रिगुणमयीभिः हरिहरब्रह्मस्वरूपाभिः महि
मम्] त्रिजगत्शक्तिम् [उदीरयन्] विजृम्भयन् [प्रलयस्थितिस
णाम्] अन्तस्थित्युत्पत्तीनां [कारणताम् गतः ।] इदं "पश्चा
दमुपेयुषे" इत्यस्य विवरणम् अतो न गतार्थत्वदोषः ॥

…तिसाम …नौ …तावेव…प्रकृते …तौ ॥७॥
…कालेन …रात्रिन्दिवस्य ते
…प्रावबोधौ तौ भूतानां प्रलयोदयौ ॥ ८ ॥

…तसृष्टिकर्तृत्वमुक्ता मिथुनसृष्ट्यर्थं मूर्त्तिमतो ब्रह्मणो
…ह,—
…ीपुंसाविति। स्त्री च पुमांश्च [स्त्रीपुंसौ।] अचतुरेत्या-
(५,४,७७ पा०) अच्प्रत्ययान्तो निपातः। [सिसृक्षया]
…च्छया [भिन्नमूर्त्तेः] द्विधाकृतविग्रहस्य [ते] तव आत्मनो
भागौ [आत्मभागौ।] "आत्मा जीवे धृतौ देहे स्वभावे
…त्मनि" इति विश्वः। [तावेव] भागौ [प्रसूतिभाजः] उत्-
…ाजः। सृज्यत इति [सर्गः] तस्य निजसृष्टेरित्यर्थः।
च पिता च [पितरौ।] पिता मात्रेति (१,२,७०पा०)
…। [स्मृतौ] वृद्धैरिति शेषः। अत्र मनुः। "द्विधा कृत्वा-
…हमर्द्धेन पुरुषोऽभवत्। अर्द्धेन नारी तस्यां स विराज-
…भुः" इति (१अ०,३२श्लो०) ॥ ७ ॥
…कालेति। [स्वकालस्य परिमाणेन।] "चतुर्युगसह-
ब्रह्मणो दिनमुच्यते" इत्युक्तरूपेण [व्यस्तम्] विभक्तम्
…न्दिवम्] रात्रावहनी यस्य तस्य। यद्यप्यचतुरेतिसूत्रे च
…७ पा०) रात्रौ च दिवा च रात्रिन्दिवमिति समस्यर्थे
… …त्युक्तं तथापि दोषामन्य (१) महर्दिवामन्या रात्रि-

…मन्य… …ति … … … …भावप्रधा… … … … …भाजकृता
…महरिति दिवामन्या रात्रिरिति प्रयुक्तं दोषा रात्रि मन्यते इति

जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ।
जगदादिरनादिस्त्वं जगदीशो निरीश्वरः ॥९
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।

रित्यादौ कर्मत्वस्यापि प्रातिपदिकार्थत्वमभिमतं तथान्निमव बलादाश्रयणीयम्। [ते] तव [यौ तु स्वप्नावबोधौ] तावेव [तानाम् प्रलयोदयौ] संहारसृष्टी। यदाहुः। "यदा स दे जागर्त्ति तदैव चेष्टते जगत्। यदा स्वपिति शान्तात्मा त सर्वं प्रलीयते,, (म० १अ०,५२श्लो०) इति। एतच्च दैनन्दि सृष्टिप्रलयाभिप्रायकं महाप्रलयस्य ब्रह्मणो वर्षशतान्ते भा त्वात् ॥ ८ ॥

जगदिति। हे भगवन्! [त्वम् जगद्योनिः] जगत्का रणम् स्वयम् [अयोनिः] अनादित्वादकारणकः। [त्वम्।] अ यतीत्यन्तः पचाद्यच्। [जगतः अन्तः] जगत्संहर्त्ता स्वयम् [नि न्तकः] नित्यत्वादन्तरहितः। त्वं जगतामादिः [जगदादि सृष्टेः प्रागपि सन्नित्यर्थः अतएव त्वम् [अनादिः] आ रहितः। [त्वम् जगतामीशः] नियन्ता स्वयम् [निरीश्व अनियम्य इत्यर्थः। "यतो वा इमानि भूतानि जायन्ते,, इत्या दि श्रुतिरेवात्र प्रमाणम्। अत्रायोनिरित्यादौ नञ्तत्पुरु षत्वे विरोधः बहुव्रीहिणा तु तत्परिहार इति विरोधाभ सालङ्कारः। यथाहुः "विरोधाभासत्वे विरोधः इति ॥ ९

तव तु न प्रपञ्चस्येव जन्मतिरोधानमात्रेषु परापेक्षेत्याह,

दोषामन्यमहः, दिवा दिनं मन्यते इति दिवामन्या रात्रिरित्यादौ म दिवाशब्दस्य [illegible] प्रातिपदिकार्थपरत्वम्।

[illegible]
: [illegible] स्थूलः सूक्ष्मो [illegible] ।
[illegible] ते [illegible] ॥११॥
[illegible]तः [illegible] ।

आत्मानमिति । हे भगवन् ! [त्वम् आत्मानम्] स्वोत्पादयिषितं स्वस्वरूपम् [आत्मना] एव [जानासि] सर्वापि क्रिया [illegible]पूर्विकेति । तथा [आत्मानम्] [आत्मनैव] आत्मन्येवेत्यत्रापि सम्ब-[illegible] स्वस्मिन्नेव [सृजसि] अधिष्ठानमपि स्वयमेवेत्यर्थः । "स्वे [illegible] प्रतिष्ठितम्,, इति श्रुतेः । [कृतिना] समर्थेन इदं [illegible] सम्बध्यते । आत्मना] स्वेनैव [आत्मन्येव प्रलीयसे] स्वस्मि-[illegible]लीनो भवसि । लीयतेर्दैवादिकात् कर्त्तरि लट् । प्रकृ-[illegible] उपसंख्यानमिति (२,३,१८ पा॰सूत्रस्थात्) वार्त्ति-[illegible]मात्मनेति तृतीया । न हि ते प्रपञ्चस्येव प्रागोत्पत्ति-[illegible] परापेक्षेति फलितार्थः ॥ १० ॥

[illegible] इति । त्वमित्यनुषज्यते । हे भगवन् ! त्वम् [द्रवः] [illegible] । [सङ्घातः] [illegible] महीधरादिवत् । [स्थूलः] इन्द्रियग्राह्यो घटा-[illegible] । [सूक्ष्मः] अतीन्द्रियः परमाण्वादिवत् । [लघुः] [illegible] । [गुरुः] हैमाद्रिवत् [illegible] । [illegible] [illegible] [illegible] । एवं [illegible] [illegible] [ते] [illegible] [illegible] ॥ ११ ॥

कर्म यज्ञः फलं स्वर्गस्तासां त्वं प्रभवो गिराम्॥

उद्घात इति । हे भगवन्! [यासाम्] [गिराम्] वे [illegible]
[उद्घातः] उपक्रमः [प्रणवः] ओङ्कारः [illegible] "[illegible]
सम्मौ", इति "[illegible]" इति [illegible]
इदमुपसंहारस्याप्युपलक्षणम् । "ब्राह्मणः प्रणवं कुर्य्याद
वन्ते च सर्वतः दहत्येनः क्षतम्पूर्वम्परस्ताच्च विशेषतः"
निरुक्तपरिशिष्टयोर्यास्कः । नीयन्ते एभिरर्थविशेषा इति
याः] स्वराः । उक्तञ्च,—स्वरविशेषादर्थप्रतिपत्तिः । (१)
भ्रंशः स्वरतोऽपराधादिति । [यासां गिरां त्रिभिन
उदात्तानुदात्तस्वरितैः (२) स्वरैः [उदीरणम्] उच्चार
यासाम् [कर्म] प्रतिपाद्यमित्यर्थः [यज्ञः] ज्योतिष्टोमा
तु चैत्यवन्दनादिरिति भावः । [फलम् स्वर्गः] कर्मद्वारेति
कर्मस्वर्गौ ब्रह्मापवर्गयोरप्युपलक्षणे । [त्वम् तासाम् गि
वेदानामित्यर्थः । प्रभवत्यस्मादिति [प्रभवः] कारणम् ।
ता (३) स्मर्त्ता वा मतभेदेन ॥ १२ ॥

---

(१) "दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थ
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" इति महाभाष्यधृता श्रुतिः [illegible]
इति [illegible] प्रयुक्तस्ततोऽन्यो नर्थ प्रतिपादयन् [illegible]
[illegible] हिनस्ति यथा इन्द्रशत्रुः शब्दः स्वरतो
[illegible] [illegible] यत्र [illegible] प्रतिपाद्योऽन्तोदात्ते प्रयो
[illegible] आद्युदात्तः प्रयुक्तस्तेन इन्द्र एव [illegible] [illegible] [illegible]

(२) ताल्वादिषु [illegible] उदात्तः नीचैः, अनुदात्तः, मध्यमः [illegible]
[illegible]

(३) [illegible] [illegible] [illegible] [illegible]
वेदश्चेति श्रुतेः ईश्वरस्य वेदप्रणेतृत्वम् "न च वेदस्य कर्त्ताद्[illegible]

त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्तिनीम् ।
तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ १३ ॥
त्वं पितृणामपि पिता देवानामपि देवता ।
परतोऽपि परश्चासि विधाता वेधसामपि ॥ १४ ॥

साङ्ख्यमतेन स्तुवन्ति,—

त्वामिति । हे भगवन् ! [त्वाम्] पुरुषस्यार्थौ भोगापवर्गौ तदर्थं प्रवर्त्तत इति [पुरुषार्थप्रवर्त्तिनीम्] ताम् [प्रकृतिम्] त्रिगुणात्मकं मूलकारणम् । "प्रकृतिः पञ्चभूतेषु प्रधाने मूलकारणे" इति यादवः । [आमनन्ति] कथयन्ति । म्ना अभ्यास इति धातोर्लट् । पाघ्राध्मास्थाम्नेत्यादिना (७,३,७८ पा०) मनादेशः । प्रकृतिपुरुषभेदाग्रहणात् प्रकृतिपुरुषाभेदव्यपदेशः (१) । [त्वामेव ।] तां प्रकृतिं साक्षित्वेन पश्यतीति [तद्दर्शिनम्] उदासीनम् कूटस्थम् [पुरुषं विदुः] विदन्ति । विदो लटो वेति (३,४,८३ पा०) झेर्जुसादेशः । "अजामेकां लोहितशुक्लकृष्णाम्" इति श्रुतिरत्र प्रमाणम् ॥ १३ ॥

त्वमिति । भगवन् ! [त्वं पितृणाम्] अग्निष्वात्तादीनामपि [पिता] तेषामपि तर्पणीय इत्यर्थः । [देवानाम्] इन्द्रादीनामपि [देवता] तेषामपि यजनीय इत्यर्थः । [परतोऽपि परश्चासि] सर्वोत्कृष्टोऽसीत्यर्थः । "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च

[illegible] भोगापवर्गौ [illegible] पूर्वोक्तयोः [illegible]
[illegible] इत्यर्थः । [illegible]

(१) प्रकृतिपुरुषयोरभेदेन व्यपदेशः [illegible] इति शेषः
[illegible] "प्रकृतिं [illegible]" इति
[illegible] च पाठितम् ।

त्वमेव हव्यं होता च भोज्यं भोक्ता च शाश्वत
वेद्यं च वेदिता चासि ध्याता ध्येयं च यत्परम्॥
इति तेभ्यः स्तुतीः श्रुत्वा यथार्था हृदयङ्गमाः।
प्रसादाभिमुखो वेधाः प्रत्युवाच दिवौकसः॥

परं मनः। मनसश्च परा बुद्धिर्बुद्धेरात्मा महांस्ततः। मह
परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित्
काष्ठा सा परा गतिः" इति सर्वोत्तरत्वाभिधानात्। [वे
साम्] दक्षादीनामपि [विधाता] स्रष्टासि॥ १४॥

त्वमेवेति। शश्वत्सिद्धः शाश्वतः। शैषिकोऽण्प्रत्ययः यद्यपि क
लाट्ठञिति ठञ् अपवादः अतएव सूत्रकारस्यापि प्रयोगः
येषाञ्च विरोधः शाश्वतिकः। (२,४,९पा०) इति तथापि प्रयं
गवशात्साधुरिति वामन इति शाश्वतः प्रयुक्तः [शाश्वतस्त्वमेव
हूयत इति [हव्यम्] हविराज्यादिकम्। जुहोतीति [होता
यजमानश्चासि। [भोज्यम्] अभ्यवहार्य्यमन्नम्। भोज्यं भक्ष्ये
(७,३,६९ पा०) इति निपातनात् कुत्वाभावः। [भोक्ता] अन्न
दश्चासि। [वेद्यम्] साक्षात्कार्य्यं वस्तु [वेदिता] साक्षात्कर्त्ता
[चासि।] [ध्याता] स्मर्त्ता [यत्परम्] वस्तु [ध्येयम्] तच्चासि
साक्षात्कारसाधनभूतप्रत्ययविशेषप्रवाहो ध्यानम्॥ १५॥

इतीति। [वेधाः] ब्रह्मा [इति तेभ्य] देवेभ्यः। आख्या
तोपयोगे (१,४,२९पा०) इत्यपादानत्वात् (१) पञ्चमी
[यथार्थाः] सत्याः अतएव हृदयं गच्छन्तीति [हृदयङ्गमाः

(१) नियमपूर्वकविद्यास्वीकार उपयोगः तदर्थे आख्यातरि
ताऽपादानसंज्ञः स्यात्।

...मवक्त्रमुखस्सारताम्
...गताभिरुद्भामा चरितार्था चतुष्टयी ॥१७॥
...गतं वाविशीयासान् प्रभाविरधिकारिणः ।
...युगवाड्यः प्रातिभ्यः प्राज्यविक्रमाः ॥१८॥

...हराः। खच्प्रकरणे गमेः सुप्युपसंख्यानम् (३,२,३८ ... वा०) इति खच्प्रत्ययः। अरुर्द्विषदजन्तस्य मुमिति ...,६७ पा०) मुमागमः। [स्तुतीः] स्तोत्राणि [श्रुत्वा] [प्रत्या-भिमुखः] अनुग्रहप्रवणः सन् [दिवौकसः] देवान् [प्रत्यु-...] ॥ १६ ॥

अथ कविराह—पुराणस्येति। द्रव्यगुणक्रियाजातिभेदेन ...वारोऽवयवा यस्या इति [चतुष्टयी] चतुर्विधा। संख्याया ...यवे तयप् (५,२,४२पा०) इति तयप्। टिड्ढाणञ्द्वय-...त्यादिना (४,१,१५पा०) ङीप्। [शब्दानाम् प्रवृत्तिः] ...रीप्रमुखा वाग्वृत्तिः। उक्तञ्च,—“वैखरी शब्दनिष्पत्तिर्म-...ा श्रुतिगोचरा। द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपा-...ी” इति [पुराणस्य] पुरातनस्य पृषोदरादित्वात्साधुः। ...ः] कवयितुः [तस्य] ब्रह्मणः [चतुर्भिर्मुखैः] [समीरिता] ...ी। तद्धितार्थेत्यादिना (२,१,५१,पा०) उत्तरपदसमासः। ...ाहारे चतुर्मुखी स्यात् चतुर्मुखोच्चारणाच्चातुर्विध्यं सफल-...ीदित्यर्थः ॥ १७ ॥

भगवानाह। स्वागतमिति। हे [प्राज्यविक्रमाः।] प्रभू-...क्रमाः। देवाः।। “प्राज्यं भूरि प्रभूतञ्च” इति यादवः। ...न्] अधीयान् [अधीकारान्] नियोगान्। उपसर्गस्य घ-

किमिदं द्युतिमात्मीयां न बिभ्रति यथा पुरा
हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः ॥
प्रशमादर्चिषामेतदनुद्गीर्णसुरायुधम् ।
वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते ॥

पीति (६,३,१२२पा०) वा दीर्घः। प्रभावैः] सामर्थ्यैः [प्र
लम्ब्य] आस्थाय। यथाधिकारं स्थित्वापीत्यर्थः। [युगप
समकालम् [प्राप्तैभ्यः] युगपत् प्राप्त्या महत्कार्यमनुमीयत इ
भावः। [युगबाहुभ्यः] दीर्घबाहुभ्य इत्यर्थः। आजानुबा
भाग्यलक्षणम्। [वः] युष्मभ्यम्। बहुवचनस्य वस्नसावि
(८,१,२१पा०) वसादेशः कर्मणा यमभिप्रैतीत्यत्र (१,४,
पा०) (१) कर्मपदेन क्रियाग्रहणात् सम्प्रदानत्वम्। [स्वा
तम्?] शोभमानमागमनम्? काकुस्वानुसन्धेया ॥ १८
किमिति। वत्सा इत्युत्तरश्लोकीयं सम्बोधनमत्राप्यनुष
नीयम्। हे वत्साः!। पुत्रकाः! [हिमेन] नीहारेण [क्लि
काशानि] मन्दप्रभाणि [ज्योतींषि] नक्षत्राणि [इव] "दीप्ति
राहुताशेषु ज्योतिः" इति शाश्वतः। [वः] युष्माकम् [मुखा
[पुरा यथा] पूर्वम् [इव] [आत्मीयां द्युतिं न बिभ्रति]
किम्? किंनिबन्धनमित्यर्थः किमिदमित्यनेन वाक्या
परामृश्यते ॥ १९ ॥

उक्तमेव प्रपञ्चयति सप्तभिः श्लोकैः प्रशमादित्यादिभि
प्रशमादिति। [अर्चिषाम्] तेजसाम् [प्रशमात्] निर्वा

(१) कर्मणा क्रिया[illegible] कर्मणाभिप्रैति च [illegible] हि
[illegible] कर्मपदं क्रियापरमपि "कर्मणि[illegible] यततो" [illegible]

किञ्चायमरिदुर्वारः पाणौ पाशः प्रचेतसः ।
मन्त्रेण हतवीर्यस्य फणिनो दैन्यमाश्रितः ॥ २१ ॥

कुबेरस्य मनःशल्यं शंसतीव पराभवम् ।
अपविद्धगदो बाहुर्भग्नशाख इव द्रुमः ॥ २२ ॥

यमोऽपि विलिखन् भूमिं दण्डेनास्तमितत्विषा ।

अनुदीर्णसुरायुधम् (१) अनुदितचित्रप्रभमित्यर्थः । एतत् द्व-
स्य. हन्तुः] इन्द्रस्य [कुलिशम्] वज्रः कुण्ठिता अश्रयो यस्य
त् [कुण्ठिताश्रि] कुण्ठितकोटि [इव लक्ष्यते] दृश्यते ॥ २० ॥

किञ्चेति । [किञ्चायम् अरिदुर्वारः] रिपुदुष्प्रधर्षः प्रचे-
सः] वरुणस्य । "प्रचेता वरुणः पाशी" इत्यमरः । [पाणौ
पाशः] रज्ज्वायुधविशेषः । [मन्त्रेण] गारुडेन [हतवीर्यस्य]
तिबद्धशक्तेः [फणिनः] सर्पस्य [दैन्यम्] शोच्यत्वम् [आश्रितः]
त फणिनिष्ठदैन्यस्य पाशे असम्भवात् दैन्यमिव दैन्यमिति
पनादसम्भवद्वस्तुसम्बन्धो निदर्शनालङ्कारः ॥ २१ ॥

कुबेरस्येति [अपविद्धा] त्यक्ता [गदा] येन सः [अपविद्ध-
:] अतएव [भग्नशाखो] [द्रुम इव] स्थितः [कुबेरस्य बाहुः]
मनःशल्यम्] दुःखहेतुत्वान्मनसः शल्यप्रायमित्यर्थः । [परा-
भवम्] शत्रुजातमिति शेषः । [शंसतीव] कथयतीव लक्षणया
सूचयतीत्यर्थः । बाहोर्मुख्यकथनस्यासम्भवात् इवशब्दो-
यत एव ॥ २२ ॥

यमोऽपीति । अस्तं नाशम् इताः प्राप्ताः अस्तमिति मकार-

(१) सुरायुधानां हि चित्रप्रभा सतःसिद्धा यत्र च अनुदीर्णसुरायुधम्
दीर्णसुरायुधत्वं चित्रप्रभाननिर्देशात् तदीयत्वाभाविवक्षितचित्रप्रभराहि-
त्येन विवक्षितमित्यभिप्रायेण अनुदितचित्रप्रभमिति व्याख्यातम् ।

कुरुतेऽस्मिन्नमोघेऽपि निर्वाणालातलाघवम् ॥२३॥
अमी च कथमादित्याः प्रतापक्षतिशीतलाः ।
चित्रन्यस्ता इव गताः प्रकामालोकनीयताम् ॥२४॥
पर्य्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते ।
अम्भसामोघसंरोधः प्रतीपगमनादिव ॥ २५ ॥

रान्तमव्ययम् । तस्य द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति (२,१,२४ पा०) समासः । [अस्तमितास्त्विषः] यस्य तेन निस्तेजस्केन [दण्डेन यमोऽपि भूमिं विलिखन्] [अमोघेऽपि] प्रागिति भावः । [अस्मिन् दण्डे] [निर्वाणालातस्य] प्रशान्तोल्मुकस्य । अलातं नाम भूलेखनशलाका तस्य यत् [लाघवम्] क्लैब्यं तत् [कुरुते] । "अलातमुल्मुकं प्रोक्तम्" इति हलायुधः । निर्वाणोऽवात इति (८,२,५० पा०) निपातनान्निष्ठानत्वम् । अत्रापि लाघवमिव लाघवमिति वाक्यार्थनिदर्शनालङ्कारः ॥ २३ ॥

अमी इति । [प्रतापक्षत्या] तेजसां क्षयेण [शीतलाः] अमी [आदित्याश्च] द्वादशेति शेषः । [कथम् ?] केन ? हेतुनेत्यर्थः । [चित्रन्यस्ताः] चित्रलिखिताः [इव] [प्रकामम्] अत्यन्तम् [आलोकनीयताम्] द्रष्टव्यताम् [गताः] प्राप्ताः ॥ २४ ॥

पर्य्याकुलत्वादिति । [मरुताम्] वायूनां सप्तसप्तानामिति शेषः । [पर्य्याकुलत्वात्] स्खलितगतित्वाद्धेतोः [वेगस्य भङ्गः] [अम्भसाम्] जलानाम् [प्रतीपगमनात्] उत्तानावरोहादित्यर्थः । [ओघस्य संरोधः] प्रवाहप्रतिबन्धः [इव] [अनुमीयते] ॥ २५ ॥

आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः ॥ २६ ॥

लब्धप्रतिष्ठाः प्रथमं यूयं किं बलवत्तरैः ।
अपवादैरिवोत्सर्गाः कृतव्यावृत्तयः परैः ॥ २७ ॥

तद्ब्रूत वत्साः किमितः प्रार्थयध्वं समागताः ।
मयि सृष्टिर्हि लोकानां रक्षा युष्मास्ववस्थिता ॥ २८ ॥

आवर्जितेति [आवर्जितेषु] परिभवदुःखावनम्रेषु [जटानां मौलिषु] जटाजूटेषु [विलम्बिन्यः] स्रंसिन्यः [शशिकोटयः] इन्दुरेखा येषां ते तथोक्ताः [रुद्राणामपि] एकादशानामिति शेषः । [मूर्द्धानः] [क्षतं हुङ्कारं शंसन्ति] इति तथोक्ताः हुङ्कार-शून्यतानुमापका इत्यर्थः । हुङ्कारयन्तो हि रुद्रा इति भावः ॥ २६ ॥

लब्धेति । [प्रथमम्] पूर्वम् [लब्धप्रतिष्ठाः] लब्धस्थितयः लब्धावकाशा इत्यन्वयः [यूयं बलवत्तरैः] पौरुषातिरेकात् प्रबल-तरैः । निरवकाशैरित्यपरत्र [परैः] शत्रुभिः [उत्सर्गाः] सामान्य-शास्त्राणि "मा हिंस्यात्" इत्येवमादीनि । अपोद्यन्ते इभि-रिति [अपवादैः] "मामालभेत" इत्यादिभिर्विधिशास्त्रैः [इव] [कृतव्यावृत्तयः] कृतप्रतिष्ठाभङ्गाः कृतविषयसङ्कोचा इत्यन्वयः । विषयसङ्कोच एव बाध इत्याचार्याः । निरव-काशं वैदिकहिंसापरिहारेण लौकिकमात्रे व्यवस्थाप-नं विषयसङ्कोच इत्यकृतविषयस्वातन्त्र्यकथनेन ॥ २७ ॥

तदिति । [तत्] तस्मात्कारणात् हे [वत्साः] पुत्रकाः । "वत्सौ तर्णकवर्षौ द्वौ वत्सं वक्षसि" इति विश्वः । सर्वं समस्ताइरताः । इत्यामन्त्र्यते । सम्भूय आगताः [समा-

ततो मन्दानिलोद्धूतकमलाकरशोभिना।
गुरुं नेत्रसहस्रेण नोदयामास वासवः॥ २९॥
स द्विनेत्रं हरेश्चक्षुः सहस्रनयनाधिकम्।
वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्॥ ३०॥

गताः] [इतः] मत्तः [किं ? प्रार्थयध्वम्] किमिच्छतेत्यर्थः। [ब्रूत]। लोकरक्षणे यूयमेव कर्त्तार इत्याह,—[मयि] लोकानां सृष्टिः, [रक्षा युष्मासु अवस्थिता]। अतस्तदर्थमपि नास्ति मदपेक्षेत्यर्थः॥ २८॥

तत इति [ततः] भगवत्प्रश्नानन्तरम् वासवः इन्द्रः [गुरुम्] बृहस्पतिम् "गुरू गीष्पतिपित्राद्यौ" इत्यमरः। [मन्दानिलोद्धूतः] यः [कमलाकरः] स इव [शोभते] इति तेन तथोक्तेन [नेत्राणां सहस्रेण] [नोदयामास] प्रेरयामास। सहस्रग्रहणमास्यातिशयार्थम्। अनिमेषाणामपि प्रयत्नवशाद‌क्षिसन्दो न विरुध्यते॥ २९॥

स इति। [हरेः] इन्द्रस्य। इन्द्रो दुश्च्यवनो हरिः" इति हलायुधः। सहस्रनयनेभ्योऽधिकम् [सहस्रनयनाधिकम्] तद्गोचरदर्शित्वादिति भावः। द्वे नेत्रे यस्य तत् [द्विनेत्रम्] प्रसिद्धाच्चक्षुषोऽयं विशेष इत्यर्थः। [चक्षुः] चक्षुर्भूतः। चक्षुरारोपस्य प्रकृतोपयोगात्परिणामालङ्कारः। [स वाचस्पतिः]। कस्कादित्वात् (८,३,२८ पा०) अलुक्सत्वे। षष्ठ्याः पतिपुत्रेत्यादिना (८,३,५३पा०) सत्वमिति स्वामी तच्च छन्दोविषयत्वात्। [प्राञ्जलिः सन् जलजासनम्] ब्रह्माणम् [इदम् उवाच]॥ ३०॥

...कारं भगवन्नास्त्यपि नः परैः पदम् ।
...कं विभिन्नमात्मानं कथं न ज्ञास्यसि प्रभो ! ॥३१॥
...श्च वरोदीर्णस्तारकाख्यो महासुरः ।
...प्लवाय लोकानां धूमकेतुरिवोत्थितः ॥ ३२ ॥
...तावन्तमेवास्य तनोति रविरातपम् ।

एवमिति । हे [भगवन् !] षड्गुणैश्वर्यसम्पन्न ! [यदात्थ] ...स्त्याहृतस्य परैरिति" यद्ब्रवीषि । ब्रुवः पञ्चानाम् (३,४, पा०) इत्यादिनाहादेशः । वर्त्तमानसामीप्ये वर्त्तमान... ति (३,३,१३१ पा०) वर्त्तमानप्रयोगः । वामनस्तु भ्रान्तो... योग इत्याह । आहेति भूते णलन्तभ्रमवदिति । आहेत्यु... स्थम् । तदेव सत्यम् [नः] अस्माकम् [पदम्] अधिकारः] शत्रुभिः [आसृष्टम्] आचितम् । हे [प्रभो !] [प्रत्ये... प्रतिपुरुषम् [विभिन्नमात्मानं] प्रवेशितस्वरूपः सर्वान्त... इत्यर्थः । [कथम् ? न ज्ञास्यसि] न वेत्सि । वर्त्तमानेऽपि ...ज्ञया भविष्यन्निर्देशः प्रसिद्धः । अपह्नवे ज्ञः अकर्म... ...या (१,३,४४,४५ पा०) तनेपदविकल्पः ॥ ३१ ॥

...मेव प्रपञ्चयति,—

...वरेति । [भवतः] त्वत्तः [लब्धेन वरेणोदीर्णः] उ... । तारक इत्याख्या नामधेयं यस्य सः [तारकाख्यः ।] ...सुरः [महासुरः ।] सन्महत्परमोत्तमोत्कृष्टाः पूज्यमाने... (२,१,६१ पा०) तत्पुरुषः । [धूमकेतुः] उत्पातविशेष ...लोकानामुपप्लवाय] उपद्रवाय [उत्थितः] उत्पन्नः ॥३२॥

...इति । [अस्य] तारकस्य [पुरि] [रविः] सूर्यः [तावन्तम्]

दीर्घिकाकमलोन्मेषो यावन्मात्रेण साध्यते ॥३३॥
सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते ।
नादत्ते केवलां लेखां हरचूडामणीकृताम् ॥३४॥
व्यावृत्तगतिरुद्याने कुसुमस्तेयसाध्वसात् ।
न वाति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम् ॥

तावन्मात्रम् [एव] [आतपम् तनोति ।] [यावन्मात्रेण] याव तैव यावती मात्रा मितिर्यस्य यावन्मात्रं तेन वा । अल्पपरि माणेनेत्यर्थः । "मात्रा परिच्छेदे अल्पे च परिमाणे । मात्रं कार्त्स्न्येऽवधारणे" इत्यमरः । [दीर्घिकासु] क्रीड़ावापीषु [कमलानामुन्मेषः] विकाशः [साध्यते] निष्पाद्यते । कठोर किरणोऽपि मन्दोष्णः सन्नेव तद्भीत्या पुरे प्रकाशते इत्यभि प्रायः ॥ ३३ ॥

सर्वाभिरिति । [चन्द्रस्तम्] तारकम् [सर्वदा] कृष्णपक्षे ऽपीत्यर्थः । [सर्वाभिः कलाभिः निषेवते ।] "कला तु षोडशो भागः" इत्यमरः । [केवलाम् हरचूड़ामणीकृताम्] शिवशि रोमणीकृताम् [लेखाम् नादत्ते] न गृह्णाति ॥३४॥

व्यावृत्तेति । [वायुः] स्तेनस्य भावः कर्म वा [स्तेयम्] चौर्य्यम् । स्तेनाद्यन्नलोपश्चेति (५,१,१२५ पा०) यत्प्रत्ययो नलोपश्च । [कुसुमानाम् स्तेयम्] तस्मात् स्तेयाभियोगा द्भयाद्वा [साध्वसम्] भयं तस्माद्धेतोः [उद्याने व्यावृत्तगतिः] निवृत्तोद्यानसञ्चारः सन्नित्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । [तत्पार्श्वे] तत्समीपे । तालस्य वृन्तमिव वृन्तमस्य ख्येव वृन्तमस्येति वा [तालवृन्तम्] तस्य [अनिलात्] अधिक

[illegible]ायसेवा[illegible] [illegible] ।
[illegible]सुपा[illegible] । [illegible]
[illegible] [illegible]ानि [illegible] [illegible]ि: ।
[illegible]नतरा[illegible] [illegible] ॥ २७ ॥
[illegible]र्यि[illegible]ं [illegible] [illegible]ि ।
[illegible]र प्रदीप[illegible] [illegible] [illegible]पायते ॥ २८ ॥

[illegible]रंपवनात् [अधिकम्] यथा तथा [न वाति ।] "व्यजनं [illegible]न्तकम्" इत्यमरः ॥ २५ ॥

पर्यायेति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इत्यर्थः । "तत्परे प्रसितासक्तौ" इत्यमरः । [illegible] [illegible] [illegible] [illegible] यथा [illegible] तथा [illegible] [illegible] [उपासते] [illegible] [illegible]आदि[illegible] [illegible] [illegible]रापास्तमित्यर्थः ॥ २६ ॥

[illegible]ेति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] "[illegible] [illegible]" इत्यमरः । [illegible] [illegible] [illegible] परिपाकपर्यन्तम् । विकल्पादसमासः । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ॥ २७ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सर्पाः [illegible] [illegible] । "भुजङ्गः [illegible]"

तत्कृतानुग्रहापेक्षी तं मुहुर्दूतहारितैः ।
अनुकूलयतीन्द्रोऽपि कल्पद्रुमविभूषणैः ॥ ३९ ॥
इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥ ४० ॥
तेनामरवधूहस्तैः सदयालूनपल्लवाः ।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः ॥ ४१ ॥
वीज्यते स हि संसुप्तः श्वाससाधारणानिलैः ।

इत्यमरः । [निशि] स्थिरप्रदीपताम् अनिर्वाणदीपत्वम् [एत
[एनम्] तारकम् [पर्युपासते] परिवृत्य सेवन्ते ॥ ३८ ॥

तत्कृतेति । [इन्द्रोऽपि] तेन तारकेण कृतम् [तत्कृतम
ग्रहम्] प्रसादम् [अपेक्षते] इति तथोक्तः सन् [मुहुर्दू तहारि
तैः] दूतप्रापितैः [कल्पद्रुमाणां विभूषणैः] तत्प्रसूनैरित्यर्थः
[तम्] तारकम् [अनुकूलयति] अनुकूलं करोति ॥ ३९ ॥

इत्थमिति । [इत्थम्] उक्तप्रकारेण रविशशिपवनोदधिमु
न्द्रैः । [आराध्यमानोऽपि] [भुवनत्रयम् क्लिश्नाति] पीड
यति । तथाहि, [दुर्जनः प्रत्यपकारेण] प्रतीकारेणैव [शाम्ये
शान्तो भवेत् [उपकारेण तु न] शाम्येत् प्रत्युत प्रकुप्यती
भावः ॥ ४० ॥

तेनेति । [तेन] तारकेण [अमरवधूहस्तैः] सकरुणैरि
भावः । तैरपि [सदयम्] [आलूनाः] अवतंसार्थं छिन्नाः [
लवाः] येषां ते [नन्दनद्रुमाः ।] छेदांश्च पातांश्च [छेदपाता
तेषाम्, अभिजानन्तीति [अभिज्ञाः] ज्ञातारः कर्तरि षष्ठी
[क्रियन्ते] ॥ ४१ ॥

रै: सुरबन्दीनां चामरैर्वीज्यते ॥४२॥
ाम मेरुशृङ्गाणि क्षुण्णानि हरितां सुतैः ।
ीडपर्वतास्ते न कल्पिताः स्वेषु वेश्मसु ॥४३॥
ाकिन्याः पयःशेषं दिग्वारणमदाविलम् ।
भोरुहयस्थानां तद्गाध्यो धाम साम्प्रतम् ॥४४॥

ज्यत इति । [हि] यस्मात् कारणात् [सः] तारकः [सं-
सन् [श्वाससाधारणः] निःश्वाससमानः [अनिलः] येषां
तोऽप्याधिक्ये निद्राभङ्गभयादिति भावः । [वाष्पशीक-
भिः ।] तासां स्त्रीणां रोदनस्यायमवसर इति भावः ।
न्दीनाम्] सुरप्रग्रहस्त्रीणां सम्बन्धिभिः । "प्रग्रहोपग्रहौ
म्" इत्यमरः । [चामरैर्वीज्यते] ॥ ४२ ॥
त्पाट्येति । [तेन] तारकेण [हरिताम्] सूर्याश्वानाम् ।
त् सूर्ये च सूर्याश्वे वर्णे च हरिते दिशि" इति विश्वः ।
शफैः [क्षुण्णानि] चूर्णितानि । एतेन तेषामत्यौन्नत्यं
म् । [मेरुशृङ्गाण्युत्पाट्य] [स्वेषु वेश्मसु ।] वेश्मस्विति
नेनास्य भुवनत्रयनिवासः सूचितः । आक्रीडन्ते ए-
[आक्रीडाः] ते च ते [पर्वताः] [कल्पिताः] कृताः ॥४३
मन्दाकिन्या इति । [साम्प्रतम्] सम्प्रति [मन्दाकिन्याः]
रण्याः [दिग्वारणानाम्] दिग्गजानाम् [मदैराविलम्]
म् [पयः] जलमेव शिष्यत इति [शेषम्] शिष्टम् । कर्मणि
त्ययः । त्रिष्वन्यत्रोपयुज्यत इति (१) नपुंसकत्वम् ।
कनककमलानि च गतानीत्याह,—हैमेति । [हैमाम्भो-

(१) शोनपुंसकयो। येन इत्यनेन क्लीबत्वविशेषरमाह। ।

भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात् पथि ॥४५॥
यज्वभिः सम्भृतं हव्यं विततेष्वध्वरेषु सः ।
जातवेदोमुखान्मायी मिषतामाच्छिनत्ति नः ॥४६॥
उच्चैरुच्चैःश्रवास्तेन हयरत्नमहारि च ।

रत्नानि] एव [प्रस्थानि] तेषान्तु, तस्य वाप्यः [तद्वाप्यः ए
धाम] स्थानम् । सर्वाण्यप्युत्पाट्य स्वदीर्घिकास्वेव प्रतिं
पितवानित्यर्थः ॥ ४४ ॥

भुवनेति । [तस्य] तारकस्य [आपातात्] समापत्तेः [
यात्] [विमानानां पथि खिलीभूते] अप्रहतीभूते सति । '
खिलाप्रहते समे" इत्यमरः । [स्वर्गिभिः] देवैः [भुवनानाम
लोकने] प्रीतिर्नानुभूयते ॥ ४५ ॥

यज्वभिरिति । [यज्वभिः] विधिवदिष्टवद्भिः "यज्वा
विधिनेष्टवान्" इत्यमरः । सुयजोर्ङ्वनिप् (३,२,१०३ पा
इति ङ्वनिप्प्रत्ययः । [विततेष्वध्वरेषु] यज्ञेषु [सम्भृत
हृतम् [हव्यम्] हविः [मायी] मायावी । (५,२,११६ पा
व्रीह्यादित्वादिनिप्रत्ययः । [सः] तारकः [नः] अस्माक
[मिषताम्] पश्यतां पश्यत्सु सत्स्वित्यर्थः । षष्ठी (१) चानाद
२,३,३ पा०) इति षष्ठी । जातवेदाः वह्निरेव मुखम् तस्मा
[जातवेदोमुखात्] [आच्छिनत्ति] आच्छिद्य गृह्णातीत्यर्थः ।

उच्चैरिति । किञ्चेति चार्थः । [तेन] तारकेण [उच्चैः] '
मानः [उच्चैःश्रवाः] नाम हयो रत्नमिव [हयरत्नम्] अप

(१) अनादरे गम्ये [illegible] षष्ठी चाद् सप्तमी [illegible]

बद्धमिवेन्द्रस्य चिरकालार्जितं यशः ॥४७॥
न्नुपायाः सर्वे नः क्रूरे प्रतिहतक्रियाः ।
वन्त्यौषधानीव विकारे सांनिपातिके ॥४८॥
शा यत्र चास्माकं प्रतिघातोत्थितार्चिषा ।
चक्रेण तेनास्य कण्ठे निष्कमिवार्पितम् ॥४९

। "रत्नं श्रेष्ठे मणावपि" इति विश्वः । अस्य शृङ्खला-
बते,—[देहबद्धम्] बद्धदेहम् मूर्त्तिमदित्यर्थः । (२,२,
ा०) आहिताग्न्यादित्वान्निष्ठायाः परनिपातः । [चिर-
ार्जितम्] [इन्द्रस्य यश इव अहारि] अपहृतम् ॥ ४७ ॥

तर्हि सामाद्युपायास्तत्र कथं न प्रयुक्ताः ? इत्यत्राह,—
तस्मिन्निति । [क्रूरे] घातुके । "नृशंसो घातुकः क्रूरः"
रः । [तस्मिन्] असुरे [नः] अस्माकम् [सर्वे उपायाः]
ातदोषत्रयस्य प्रकोपजे [सांनिपातिके विकारे] ज्वरा-
सन्निपाताच्चेति (५,३१ पा० वा०) वक्तव्यात् ठक् ।
न्ति] सारवन्ति [औषधानीव] [प्रतिहतक्रियाः] विफल-
ाः भवन्ति ॥ ४८ ॥

देव प्रतिहतक्रियत्वमाह,—
जयेति । किञ्चेति चार्थः । नूनमनेन हरिचक्रेण कथं
म इति [यत्र] हरिचक्रे [अस्माकं जयाशा] विजयाकांक्षा
दिति शेषः । [प्रतिघातेन] प्रतिहत्या [उत्थितार्चिषा]
तेजसा [तेन हरिचक्रेण] विष्णोः सुदर्शनेन [अस्य] तार-
[कण्ठे] [निष्कम्] उरोभूषणम् [अर्पितमिव] इत्युत्-
। कण्ठमेव निष्कमिव कृतम् इत्यर्थः । तारकमिदं कण्ठे-

तदीयास्तोयदेष्वद्य पुष्करावर्तकादिषु ।
अभ्यस्यन्ति तटाघातं निर्जितैरावता गजाः ॥५०॥

तदिच्छामो विभो ! स्रष्टुं सेनान्यं तस्य शान्तये ।
कर्मबन्धच्छिदं धर्मं भवस्येव मुमुक्षवः ॥ ५१ ॥

गोप्तारं सुरसैन्यानां यं पुरस्कृत्य गोत्रभित् ।
प्रत्यानेष्यति शत्रुभ्यो बन्दीमिव जयश्रियम् ॥५२

दाय हरिणा चक्रं त्यक्तं, तदपि नष्टशक्ति जातमिति भाव
"साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले । दीनारेऽपि
निष्कोऽस्त्री" इत्यमरः ॥ ४९ ॥

तदीया इति । [अद्य] सम्प्रति [निर्जित ऐरावतः] ये
तथोक्ताः तस्य तारकस्य इमे [तदीयाः गजाः ।] [पुष्करा
आवर्तकाश्च] नाम [आदयः] येषां तेषु [तोयदेषु] मेघे
[तटाघातम्] वप्रक्रीडाम् [अभ्यस्यन्ति ॥ ५० ॥

तदिति । [तत्] तस्मात् कारणात् हे [विभो !] स्वामिन्
मोक्तुं भवं त्यक्तुम् इच्छवो [मुमुक्षवः] विरक्ताः [भवस्य] संस
रस्य [शान्तये] निवृत्तये कर्मैव बन्धः तं छिनत्तीति [कर्म
बन्धच्छिद्] तम् [धर्ममिव] आत्मज्ञानहेतुभूतमिति शेषः
"तमेव विदित्वातिमृत्युमेति" इति ज्ञानादेव मुक्तिः । तस्
तारकस्य [शान्तये] नाशाय । सेनां नयतीति सेनानीः चमू
पतिः । सत्सूद्विषेत्यादिना (३,२,६१ पा०) क्विप् । तम् [सेन
न्यम्] कञ्चित् [स्रष्टुमिच्छामः] वयमिति शेषः ॥ ५१ ॥

सेनानीस्रष्टेः फलमाह,—

गोप्तारमिति । [सुरसैन्यानाम्] देवतासेनानाम् [गो

...वसिते तस्मिन् ससर्ज गिरमात्मभूः।
...ताननन्तरां वृष्टिं सौभाग्येन जिगाय सा ॥५३॥
...पत्स्यते वः कामोऽयं कालः कश्चित् प्रतीक्ष्यताम्।
...स्य सिद्धौ यास्यामि सर्गव्यापारमात्मना ॥५४॥

रक्षितारं [यम्] सेनान्यम् [पुरस्कृत्य] पुरोधाय पुरोऽव्य-ति (१,४,६७ पा०) गतित्वात् नमस्पुरसोर्गत्योः (८,३,४० पा०) इति सकारः। गां पृथ्वीं त्रायत इति गोत्रा-भिनत्तीति [गोत्रभित्] इन्द्रः [जयश्रियं बन्दीमिव] ...तां श्रियमिव [शत्रुभ्यः सकाशात्] [प्रत्यानेष्यति] ...हरिष्यति, तं स्रष्टुमिति पूर्वेण सम्बन्धः ॥ ५२ ॥

...वचीति। [तस्मिन्] बार्हस्पत्ये [वचसि अवसिते] परि-...सति [आत्मभूः] ब्रह्मा [गिरम्] वाचम् [ससर्ज] जगा-...। [सा] गीः [सौभाग्येन] मनोहरत्वेन। हृद्भगसि-...पूर्वपदस्य च (७,३,१९ पा०) इत्युभयपदवृद्धिः। [गर्-...] गर्जितस्य वा [अनन्तरम्] प्रवृत्ताम् [वृष्टिम् जिगाय] ...। गर्जितपरत्वाद् वृष्टेरिव तद्विज्ञापनपरत्वाद्गिर-...मिति भावः ॥ ५३ ॥

...पत्स्यत इति। [अयं वः] युष्माकम् [कामः] मनोरथः ...रूपः [सम्पत्स्यते] सिध्यति। [कश्चित्] कियानपि ...प्रतीक्ष्यताम्] [तु] किन्तु [तस्य] सेनान्यः [सिद्धौ] वि-...[आत्मना] स्वयम् [सर्गः] सृष्टिरेव [व्यापारः] तम् [न ...यामि] नाहं करिष्यामीत्यर्थः ॥ ५४ ॥

...इष्ट [illegible] ...।
...[illegible]

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् ॥
वृतं तेनेदमेव प्राक् मया चास्मै प्रतिश्रुतम् ।
वरेण शमितं लोकानलं दग्धुं हि तत्तपः ॥

कुत इत्याशङ्क्याह,—

इत इति । [इतः] मत्त एव [प्राप्तश्रीः] लब्धोदयः [स दै
त्यस्तारकासुरः [इतः] मत्त एव [क्षयं नाशं नार्हति ।] तथा
ह्यसौ [illegible]वध्यः, विषस्य वृक्षः [विषवृक्षोऽपि संव
कुतश्चित्कारणात् [illegible] वर्धयित्वा [स्वयं छेत्तुम् असाम्प्र
तमयुक्तः । असाम्प्रतमित्यव्ययेन निपातेनाभिहितत्वात् [illegible]
द्वितीयात्वं न भवति, अनभिहिते कर्मणि द्वितीया
विधानात् । यथाह वामनः । निपातेनाप्यभिहिते कर्मणि
विभक्तिः परिगणनस्य (१) प्रायिकत्वादिति ॥ ५५ ॥

वृतमिति । [प्राक्] पूर्वम् [तेन] तारकेणासुरेण दैवैरवध
त्वेन [इदम्] प्रार्थितम् । [मया चास्मै] तारकाय [प्रतिश्रु
प्रतिज्ञातम् । प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्तेति (१,४,४०
(२) सम्प्रदानत्वाच्चतुर्थी । कर्त्तव्यमेतदित्यत्र, [लोका
दग्धुम् [illegible] । पर्याप्तिवचनेष्वलमर्थेष्विति (३,४

(१) "उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाम्रे[illegible]
तथान्यतोऽपि दृश्यते" इत्यनेन [illegible]ऽपि द्वितीया[illegible]
[illegible] नेव नेह द्वितीया तत्र प्रायिकत्वादित्यत्र परिगणन[illegible]

(२) प्रत्याङ्पूर्वस्य श्रुवः [illegible]
[illegible] भवति ।

[illegible] लोहितादन्यस्य [illegible]

[illegible]हृते [illegible] लोहितस्य [illegible] ॥५७॥

[illegible] यत् तमसः परि [illegible]

[illegible] विष्णु वा ॥५८॥

[illegible] ते यूयं संयमस्तिमितं मनः ।

तुमुन्प्रत्ययः । तस्य तपः तत्तपः [वरेण वरदानेन

[illegible]हि भवेति शेषः ॥ ५६ ॥

[illegible]युग इति । [संयुगे युद्धे [उद्यन्तम्] व्याप्रियमाणम् ।

साधुम् [सांयुगीनम् ।] प्रतिजनादिभ्यः खञिति (४,

पा०) खञ्प्रत्ययः । [तम्] तारकम् [निषिक्तस्य] क्वचित्

[illegible]रितस्य । "नीलः कण्ठे लोहितश्चकेशेषु" इति नील-

[illegible] इति पुराणमिति स्वामी । तस्य [नीललोहितस्य]

[रेतसः] शुक्रस्य [अंशादृते] अंशं विना [अन्यः कः

[illegible] अभिभवेत् । प्रसह्यनमभिभव इति हस्तिकारः ॥५७॥

[illegible]मसावीदृक्शक्तिः ? इत्याह,—

[illegible]इति । [स देवः] नीललोहितः [तमसः पारे] परतः

[illegible]तस्य] तमोगुणातीतम् [परम् ज्योतिः] परमात्मा हि

[मया परिच्छिन्नप्रभावर्द्धिः] अवगाढमहिमातिशयो

[illegible] तथा [विष्णुना च न,] अतस्तस्यासाध्यं नास्ती-

५८ ॥

[illegible]इति तदंशोत्पत्तावुपायं दर्शयति,—

[illegible]इति । [ते] कार्यार्थिनः यूयम् [संयमस्तिमितम्] स-

[illegible] [मनः] [उमारूपेण] उमासौन्दर्येण ।

[illegible]भावे सौन्दर्ये नारके [illegible] । [illegible]

शम्भोर्यतध्वमाक्रष्टुमयस्कान्तेन लोहवत् ॥
उभे एव क्षमे वोढुमुभयोर्बीजमाहितम् ।
सा वा शम्भोस्तदीया वा मूर्तिर्जलमयी मम ॥
तस्यात्मा शितिकण्ठस्य सैनापत्यमुपेत्य वः ।

कादावाकारस्योकारयोरपि" इति विसर्गः । [अयस्कान्तेन] आ
विशेषेण । कस्कादिषु चेति (८,३,४८पा०) सकारः । [लोह
अयोधातुमिव । तेन तुल्यं क्रिया चेद्वतिरिति (५,१,११५पा
वतिप्रत्ययो मृग्यः (१) । [आक्रष्टुम्] आहर्तुम् [यतध्व
उद्युक्ता भवत ॥ ५९ ॥

न च गत्यन्तरमस्तीत्याह,—

उभे इति । [उभयोः] शम्भोर्मम च [आहितम्] निषि
[बीजम्] तेजः [वोढुम्] सोढुम् [सा वा] उमा शम्भोः, श
मूर्त्तेः तस्य इयम् [तदीया जलमयी मूर्त्तिर्वा] [मम ।] उ
एव क्षमे] न तृतीयेत्यर्थः । वा शब्दो द्वन्द्वार्थे समुच्चये
एतदेवोदाहृत्य इत्थमेव व्याख्यातं गणव्याख्याने । अत्र दी
कालङ्कारः । प्राकरणिकयोरुमामहेश्वरयोरप्राकरणिकयोर
जलमूर्त्योश्च औपम्यस्य गम्यत्वात् । यथाह भोजराजः,—"
सुतानामप्रसुतानाञ्चौपम्यस्य गम्यत्वे दीपकम्" इति ।
चेयं तुल्ययोगिता तस्याः केवलप्रसुतविषयत्वेन केवलाप्र
तत्वेन चोत्थमादिति ॥ ७० ॥

(१) क्रिया हि व्यापाररूपा कर्तृनिष्ठा तथा एव क्रियाश
त्वात् फलपरत्वे कथया रत्यायमेन मृग्य इत्युक्तम् । तथाच क
निष्ठक्रियातुल्य क्रियाबोधने इव कर्मनिष्ठफलतुल्यफलक्रियायो
लेऽपि वतिप्रत्ययः स्यादेवेत्याकरे स्पष्टम् ।

च्छ्यते सुरवन्दीनां वेणीर्वीर्यविभूतिभिः ॥६१॥
न व्याहृत्य विबुधान् विश्वयोनिस्तिरोदधे।
सा हितकर्त्तव्यास्तेऽपि देवा दिवं ययुः ॥६२॥
निश्चित्य कन्दर्पमगमत् पाकशासनः।
मा कार्यसंसिद्धित्वराद्विगुणरंहसा ॥ ६३ ॥
अथ स ललितयोषिद्भ्रूलताचारुशृङ्गं

तस्येति। [तस्य शितिकण्ठस्य] अष्टमूर्त्तेः [आत्मा] पुत्र
ः। "आत्मा वै पुत्रनामासि" इति श्रुतेः। [वः] युष्माकं
पतेर्भावः [सैनापत्यम्।] पत्यन्तपुरोहितादिभ्यो यगि-
(५,१,१२८पा०) यक्प्रत्ययः। [उपेत्य] प्राप्य [वीर्यवि-
भिः] शौर्य्यसम्पत्तिभिः [सुरवन्दीनाम् वेणीर्मोक्ष्यति] विस्रं-
यति तारकासुरं हनिष्यतीति भावः ॥ ६१ ॥
तीति। [विश्वस्य योनिः] कारणम्। "योनिः स्त्रीणां
भेदे कारणे ताम्रिके पणे" इति वैजयन्ती। [विबुधान्]
[इति व्याहृत्य] अभिधाय [तिरोदधे] अन्तर्हितवान्।
ना [अपि] [मनसि आहितम् कर्त्तव्यम्] यैस्ते तथोक्ताः
[दिवम्] स्वर्गम् [ययुः] प्रापुः ॥ ६२ ॥
ते ति। [पाकः] नाम कश्चिदसुरः तस्य [शासनः] इन्द्रः
हरचित्ताकर्षणशक्त्ये [कन्दर्पम् निश्चित्य] साधकत्वेनेति
[कार्यसंसिद्धौ त्वरया] औत्सुक्येन द्वौ गुणौ यस्य तत्
णम्] द्विराहत्तम् [रंहः] वेगो यस्य तेन तथोक्तेन। "गु-
त्तिशब्दादिज्येन्द्रियामुख्यजन्तुषु" इति वैजयन्ती। [म-
अगमत्] सस्मारेत्यर्थः। गमेर्लुङ् पुषादिसूत्रेणाङ् ॥ ६३ ॥

रतिवलयपदाङ्के चापमासज्य कण्ठे ।
सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः
शतमखमुपतस्थे प्राञ्जलिः पुष्पधन्वा ॥६४॥

इति श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये ब्रह्मसाक्षात्कारोनाम द्वितीयः सर्गः ॥ २ ॥

अथेति । [अथ] स्मरणानन्तरं स स्मृत इत्यर्थः । पुष्पं धनुर्यस्य सः [पुष्पधन्वा] कामः । वा संज्ञायाम् (१) (५,४,१३३ पा०) इत्यनङ् । "ललितं त्रिषु सुन्दरम्" इत्यमरः । [ललितायाः] सुन्दर्य्याः [योषितः भ्रुवौ लते] इव [चारुणी शृङ्गे] कोटी यस्य तत्तथोक्तम् [चापम् ।] [रतिः] स्मरप्रिया । "रतिः स्मरप्रिया" इत्यमरः । तस्याः [वलयपदानि] कङ्कणस्थानानि [अङ्कः] चिह्नं यस्य स तथोक्ते [कण्ठे आसज्य] लगयित्वा । चापकण्ठविशेषणाभ्यां शृङ्गारैकनिधेः त्रिभुवनैकवीरस्य शृङ्गारवीरोपकरणेषु तुल्यरसत्वं व्यज्यते । [सहचरस्य] सख्युः [मधोः] वसन्तस्य [हस्ते न्यस्तम् चूताङ्कुरम्] एव [अस्त्रम्] यस्य स तथोक्तः । [प्राञ्जलिः] कृताञ्जलिः सन् [शतमखम्] इन्द्रम् [उपतस्थे] सङ्गतवान् । (१,३,२५पा० वा०) सङ्गतिकरणार्थादात्मनेपदम् । अत्र स्वभावोक्तिः "स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनम्" इति । मालिनीवृत्तमेतत् । "न न म य य युतेयं मालिनी भोगिलोकैः,, इति तल्लक्षणात् ॥६४॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनी-
समाख्यायां द्वितीयः सर्गः ।

---

(१) चतुरन्ताद्बहुव्रीहेरनङ् स्याद्वा संज्ञायाम् ।

तृतीयः सर्गः ।

तस्मिन् मघोनस्त्रिदशान् विहाय
सहस्रमक्ष्णां युगपत् पपात ।
प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥ १ ॥

तस्मिन्निति । [मघोनः] इन्द्रस्य [अक्ष्णां सहस्रम्] त्रिरा-
दश परिमाणमेषामिति [त्रिदशान्] देवान् । संख्यया-
ासन्नादूराधिकसंख्याः संख्येये (२,२,२५पा०) इति बहु-
हिः । बहुव्रीहौ संख्येये (५,४,७३ पा०) इति (२) डच्-
यः । डजर्थत्वात् सुचो निवृत्तिः (३) । [विहाय] त्यक्त्वा
मन्] कामे [युगपत् पपात] । सहस्रेणाक्षिभिरद्राक्षी-
ादरातिशयोक्तिः । ननु सुचिरपरिचितानेकसुरपरित्या-
गवतो महेन्द्रस्य कथम् अकाण्डे तस्मिन्नेकस्मिन् पक्ष-
? इत्याशङ्क्यार्थान्तरं न्यस्यति,—[प्रायः] भूम्ना [प्रभूणा-
तेषु] सेवकेषु विषये [गौरवम्] आदरः [प्रयोजनापेक्षि-
कार्य्यार्थित्वेन हेतुना [चलम्] चञ्चलम् । फलतन्त्राः
ी न तु गणतन्त्रा इति भावः ॥ १ ॥

---

(१) संख्येयेऽर्थे वर्त्तमानया संख्यया सह अव्ययादयः समस्यन्ते स
)हिः ।

) संख्येयेऽर्थे वर्त्तमानात् संख्यान्तबहुव्रीहेर्डच् स्यात् ।

(३) डजर्थेनैव बहुत्वाभिधानात् डजर्थानामप्रयोग इत्युक्तेः
निवृत्तिः ।

स वासवेनासनसन्निकृष्ट-
मितोनिषीदेति विसृष्टभूमिः ।
भर्त्तुः प्रसादं प्रतिनन्द्य मूर्ध्ना
वक्तुं मिथः प्राक्रमतैवमेनम् ॥ २ ॥

आज्ञापय ज्ञातविशेष ! पुंसां
लोकेषु यत् ते करणीयमस्ति ।
अनुग्रहं संस्मरणप्रवृत्त-
मिच्छामि संवर्द्धितमाज्ञया ते ॥ ३ ॥

स इति । [सः] कामः [वासवेन] इन्द्रेण आसनस्य सि[ं] समस्य सन्निकृष्टं सन्निहितम् [आसनसन्निकृष्टम्] यथा तथ[ा] शेषषष्ठ्यायं समासः कृद्योगलक्षणया न, न लोकाव्ययनि[ष्ठा] खलर्थतृनामिति (२,३,६९ पा०) षष्ठीनिषेधात् । [इतो नि]षीद] इह उपविश [इति विसृष्टभूमिः] दत्तावकाशः स[न्] [भर्त्तुः] स्वामिनः [प्रसादम्] अनुग्रहम् [मूर्ध्ना प्रतिनन्द्य] सम्भाव्य [मिथः] रहसि । "मिथोऽन्योऽन्यं रहस्यपि" इ[त्य]मरः । [एनम्] इन्द्रम् [एवम्] वक्ष्यमाणप्रकारेण [वक्तुं प्राक्र]मत] उपक्रान्तवान् । प्रोपाभ्यां समर्थाभ्याम् (१,३,४२ पा[०]) इत्यात्मनेपदम् ॥ २ ॥

आज्ञापयेति । हे [पुंसां ज्ञातविशेष !] ज्ञाततार ! ज्ञा[त]पुंविशेषेत्यर्थः । सापेक्षत्वेऽपि गमकत्वात् समासः । [आज्ञा]पय] तदिति शेषः । उत्तरवाक्ये यच्छब्दप्रयोगात् पूर्ववा[क्ये] तच्छब्दप्रयोगनिर्बन्धः । किन्तदित्याह,—[लोकेषु ते] त[व] [यत्करणीयम्] कर्त्तव्यम् [अस्ति] । [संस्मरणेन प्रवृत्तम्] अ[नु]

केनाभ्यसूया पदकाङ्क्षिणा ते
नितान्तदीर्घैर्जनिता तपोभिः।
यावद्भवत्याहितसायकस्य
मत्कार्मुकस्यास्य निदेशवर्ती ॥ ४ ॥

अथवात: कस्तव मुक्तिमार्गं
पुनर्भवक्लेशभयात् प्रपन्नः।

[ते] तव [अनुग्रहम्] प्रसादम् [आज्ञया] नियोगेन
[म्]वितम्] वृद्धिं गमितम् [इच्छामि] संस्मरणजातमनुग्रहं
नियोगेन वर्धय कचित्कर्मणि नियुङ्क्ष्वेत्यर्थः। अन्यथा
[ना]स्ति परितोष इति भावः। तुमुन्नन्तपाठे णिजर्थे (२)
कार्यः ॥ ३ ॥

[कि]ं च मे किञ्चिदसाध्यमस्तीत्याह,—

[के]नेति। [पदकाङ्क्षिणा] स्वाराज्यकामेन [केन] पुंसा
[नितान्]तदीर्घैः] अतिप्रभूतैः [तपोभिः] [ते] तव [अभ्यसूया]
[ज]निता] तं ब्रूहीति शेषः किमर्थम् [यावत्] यतः स
[द्भवत्]याहितसायकस्य] संहितबाणस्य [अस्य मत्कार्मुकस्य]
[निदेशे] वर्तते इति [निदेशवर्ती] आज्ञावशो [भवति] भवि-
[ष्यत्ये]व भविष्यतीत्यर्थः। वर्तमानसामीप्ये वर्तमानवद्वा
(३।३।१३१ पा०) इति लट् ॥ ४ ॥

[सम्प्र]त्यति चतुर्वर्गे मोक्षमधिकृत्याह,—

[अथव]आत इति। [तव मतपत्नः कः] [पुनर्भवः] पुनरुत्-

---

(२) णिजन्ते वर्धं विवक्षितेन चाद् तत्र णिजोर्थे ... ...भावात् यत्नः
...दिः कार्यः।

वल्गुस्थिरं तिष्ठतु सुन्दरीणा-
मारेचितभ्रूचतुरैः कटाक्षैः ॥ ५ ॥
अध्यापितस्योशनसापि नीतिं
प्रयुक्तरागप्रणिधिर्द्विषस्ते ।
कस्यार्थधर्मौ वद पीडयामि
सिन्धोस्तटावोघ इव प्रवृद्धः ॥ ६ ॥

पत्तिः संसार इति यावत् तत्र ये [क्लेशाः] जन्मजरामरण
दयस्तेभ्यः [भयात्] [मुक्तिमार्गं प्रपन्नः] तं वद । यतः सोऽ
[आरेचिताभिः] एकैकशो विवर्त्तिताभिः [भ्रूभिश्चतुरै
[सुन्दरीणां कटाक्षैः वल्गुस्थिरं तिष्ठतु ।] आरेचितलक्षणम्,
"स्याद्भ्रुवोर्ललितान्तेपादेकस्या एव रेचितम् । तयोर्मू
समुत्क्षेपं कौटिल्याद्भ्रूकुटिं विदुः" इति ॥ ५ ॥

धर्मार्थावधिकृत्याह,—

[अध्यापितस्येति । [उशनसा] शुक्रेण [नीतिम्] नीति
शास्त्रम् [अध्यापितस्यापि ।] अपिशब्दाच्छुक्रशिष्याणा
प्राधान्यत्वं गम्यते । गतिबुद्धीत्यादिना (१,४,५२पा०) द्विक
कादिङ्धातोर्ण्यन्तात्प्रधाने कर्मणि क्तः "अप्रधाने दुहादी
ण्यन्ते कर्तुश्च कर्मणः" इति वचनात् । [ते द्विषः] तव शत्रो
[कस्य अर्थधर्मौ] [प्रयुक्तः] प्रहितः [रागः] विषयाभिला
एव [प्रणिधिः] दूतो येन सोऽहम् । "प्रणिधिः प्रार्थने च
इति यादवः । [प्रवृद्धः ओघः] प्रवाहः [सिन्धोः] नद्या
[तटाविव पीडयामि ?] [वद] ॥ ६ ॥

काममधिकृत्याह—

कामेकपत्नीव्रतदुःखशीलां
लोलं मनश्चारुतया प्रविष्टाम् ।
नितम्बिनीमिच्छसि मुक्तलज्जां
कण्ठे स्वयंग्राहनिषक्तबाहुम् ॥ ७ ॥

कयासि कामिन्सुरतापराधात्
पादानतः कोपनयावधूतः ।

कामिति । एकः पतिर्यस्याः सा [एकपत्नीः] पतिव्रता । सपत्न्यादिष्विति (४,१२५पा०) ङीप् । तस्याः [व्रतम्] व्रतत्वं तेन [दुःखशीलाम्] दुःखस्वभावां दृढव्रतामित्यर्थः । "शीलं स्वभावे सद्वृत्ते" इत्यमरः । [चारुतया] सुन्दरत्वेन ...ा [लोलं मनः] त्वच्चित्तम् [प्रविष्टां कां नितम्बिनीम्] ...म् [मुक्तलज्जाम्] सतीम् [कण्ठे] [स्वयंग्राहनिषक्तबा-] ...स्वयं गृह्णातीति स्वयंग्राहाः । विभाषा ग्रह इति (३, ...पा०) णप्रत्ययः । न च जलचर एव ग्राह इति नियमः ... ग्राह एवेति नियमादिति । स्वयंग्राहा च सा निषक्त-... तां तथाभूताम् [इच्छसि ।] त्वदर्थं पतिव्रतामपि भ्रंशयिष्यामीत्यर्थः । एतच्चेन्द्रस्य पारदारिकत्वादुक्तम् । ...च श्रुतिः । "अहल्यायै जार" इति ॥ ७ ॥

त्रिविधा नायिका, स्वकीया परकीया साधारणी चेति, ...कीयां [प्रयुक्ता] इतरं प्रस्तौति,—

...येति । हे [कामिन् ।] कामुक । [सुरतापराधात्] ...प्रादिरर्थः । [पादानतः] पादयोः नतः सन् [कोपनया] कोपनशीलया [कया] स्त्रिया [अवधूतः] तिरस्कृतोऽसि ।

तस्याः करिष्यामि दृढानुतापं
प्रवालशय्याशरणं शरीरम् ॥ ८ ॥

प्रसीद विश्राम्यतु वीर! वज्रं
शरैर्मदीयैः कतमः ? सुरारिः ।
बिभेतु मोघीकृतबाहुवीर्यः
स्त्रीभ्योऽपि कोपस्फुरिताधराभ्यः ॥ ९

तव प्रसादात् कुसुमायुधोऽपि
सहायमेकं मधुमेव लब्ध्वा ।

[तस्याः शरीरं दृढानुतापम्] गाढपश्चात्तापम् श
[प्रवालशय्याशरणं करिष्यामि] इति ॥ ८ ॥

प्रसीदेति । हे [वीर! प्रसीद] प्रसन्नो भव [वज्रम्] कु
शम् [विश्राम्यतु] उदास्तामित्यर्थः । [मदीयैः शरैर्मोघी
बाहुवीर्यः] विफलीकृतभुजशक्तिः [कतमः ?] दैत्यदान
दिषु यः कश्चन [सुरारिः]। वा बहूनां जातिपरिप्रश्ने ।
मच् (५,३,९३,पा०) इति डतमच्प्रत्ययः । [कोपेन स्फुरि
धराभ्यः स्त्रीभ्योऽपि बिभेतु] किमु वक्तव्यं पुंभ्य इत्यर्थः ।
भीतः सर्वतो बिभेतीति भावः । भीत्रार्थानां भयहेतुः (१
२५पा०) इत्यपादानत्वात् पञ्चमी ॥ ९ ॥

तवेति । किं बहुना, [तव प्रसादात्] अनुग्रहात् [कु
मायुधोऽपि अतिदुर्बलास्त्रोऽप्यहम् [एकं मधुम्] वसन्त
[सहायं लब्ध्वा] पिनाकः पाणौ यस्य सः [पिनाकपाणिः
प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ (२,२,३६ वा० वा०) त
[हरस्यापि] हरः पिनाकी [illegible] इति भावः । [

कुर्य्यां हरस्यापि पिनाकपाणे-

र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥ १० ॥

अथोरुदेशादवतार्य्य पाद-

माक्रान्तिसम्भावितपादपीठम्।

सङ्कल्पितार्थे विवृतात्मशक्ति-

माखण्डलः काममिदं बभाषे ॥ ११ ॥

सर्वं सखे! त्वय्युपपन्नमेत-

दुभे ममास्त्रे कुलिशं भवांश्च।

वज्रं तपोवीर्य्यमहत्सु कुण्ठं

म्] धैर्य्यहानिम् [कुर्य्याम्] कर्तुं शक्नुयामित्यर्थः। शकि लिङ्चेति (३,३,१७२पा०) शक्यार्थे लिङ्। [अन्ये धन्विनः] ; [मम के] न केऽपि इत्यर्थः। किंशब्दः कुत्सायाम्। प्रश्नवितर्केषु किंशब्दः इष्यते" इति शाश्वतः ॥ १० ॥

अथेति। अथ अस्त्रवाक्यश्रवणानन्तरम् [आखण्डलः] ः [ऊरुदेशात् पादम्] [आक्रान्त्या] आक्रमणेन तं पादपीठम्] यस्मिन् तद्यथा तथा [अवतार्य्य] ल्पितार्थे] हरचित्ताकर्षणरूपे विषये [विवृतात्मशक्तिम्] "हरस्यापि" इत्यादिना प्रकटीकृतस्वसामर्थ्यम् कामम् [इदम्] वक्ष्यमाणम् बभाषे ॥ ११ ॥

सर्वमिति। हे [सखे !] सखे इति सम्बोधनं गौरवार्थम् [एतत् त्वय्युपपन्नम्] सिद्धम् [मम कुलिशम्] वज्रम् [उभे अस्त्रे] तत्र [वज्रं तपोवीर्य्येषु] तपोबलेन

त्वं सर्वतोगामि च सायकञ्च ॥ १२ ॥
अवैमि ते सारमतः खलु त्वां
कार्य्ये गुरुण्यात्मसमं नियोक्ष्ये ।
व्यादिश्यते भूधरतामवेक्ष्य
कृष्णेन देहोद्वहनाय शेषः ॥ १३ ॥
आशंसता बाणगतिं वृषाङ्के
कार्य्यं त्वया नः प्रतिपन्नकल्पम् ।

[महत्तु] प्रबलेषु [कुण्ठम्] प्रतिबद्धप्रसरम् [त्वम्] च [सर्वतोगामि च सायकञ्च] तापसेष्वप्यकुण्ठमित्यर्थः ॥

अवैमीति । हे सखे ! [ते सारम् ।] बलम् [अवै... वेद्मि [अतः खलु] अतएव [आत्मसमम्] मत्तुल्यम् [त... [गुरुणि] महति [कार्य्ये] "तस्मै हिमाद्रेरिति" वक्ष... [नियोक्ष्ये ।] स्वराद्यन्तोपसृष्टादिति वक्तव्यमिति (१,३... पा० सूत्रस्थात्) वार्त्तिकादात्मनेपदनियमः । तथा... सारपरीक्षापूर्वक एव सर्वत्र नियोग इत्याह,—[कृष्णेन]... विष्णुना । धरतीति धरः पचाद्यच् । भुवो धरः [भूधरः]... भावस्तत्तां भूधरशक्तिमित्यर्थः । [अवेक्ष्य] ज्ञात्वा [... सर्पराजः [देहोद्वहनाय] स्वदेहमुद्वोढुम् । क्रियार्थोपप... त्यादिना (२,३,१४ पा०) चतुर्थी । [व्यादिश्यते] नियु... शेषशायी हि भगवान् ॥ १२ ॥

नियोगाङ्गीकारं शिववत् कर्तुमाह,—

आशंसतेति । [वृषाङ्के] हरे [बाणगतिम्] बाणप्रसरम् [आशं... सता] कथयता "कुर्य्यां हरस्यापि पिनाकपाणेः" इत्यादि...

निबोध यज्ञांशभुजामिदानी-
मुच्चैर्द्विषामीप्सितमेतदेव ॥ १४ ॥
अमी हि वीर्य्यप्रभवं भवस्य
जयाय सेनान्यमुशन्ति देवाः ।
स च त्वदेकेषुनिपातसाध्यो
ब्रह्माङ्गभूर्ब्रह्मणि योजितात्मा ॥ १५ ॥

त्वया] [नः] अस्माकम् [कार्य्यं प्रतिपन्नकल्पम्] अङ्गीकृत-
ईषदसमाप्तौ (५,३,६७ पा०) कल्पप्प्रत्ययः । कथमेत-
ाह,—[इदानीम्] उच्चैरुन्नता द्विषो येषां तेषाम् [उच्चै-
यज्ञांशभुजाम्] देवानाम् । एतेन द्विषत्सुखयज्ञभागत्वं
[ईप्सितम्] आप्तुमिष्टम् [एतदेव] हरे बाणप्रयोगरूप-
निबोध] हरायत्तं बुध्यस्वेत्यर्थः । बुध बोधने इति
ट् । भवाशंसता प्रार्थयमानेनेति नायव्याख्यान-
ाख्यानम् आङ् पूर्वयोः शासिशंसत्योरिच्छार्थत्वे
रनियमात् । याच्ञार्थत्वस्याप्रामाणिकत्वात् । कु-
ापीत्यत्रानयोरभावादयोगाच्चेति ॥ १४ ॥

तत्कार्य्यं, कथं वा, तस्य हरायत्तत्वं कुतो वा मद-
त्यत्राह,—

ी इति । [हि] यस्मात् [अमी] देवाः [जयाय] अन्-
[भवस्य] हरस्य [वीर्य्यप्रभवम्] तेजःसम्भूतम् [सेना-
ेनापतिम् [उशन्ति] कामयन्ते वश कान्ताविति
ट् । अनुवां सखीजातादिमन्वाणाम् (१) अङ्गानां

ौ हो यथोजाताय नम इत्यादि मन्त्राणाम् ।

तस्मै हिमाद्रेः प्रयतां तनूजां
यतात्मने रोचयितुं यतस्व।
योषित्सु तद्वीर्य्यनिषेकभूमिः
सैव क्षमेत्यात्मभुवोपदिष्टम् ॥ १६ ॥
गुरोर्न्नियोगाच्च नगेन्द्रकन्या
स्थाणुं तपस्यन्तमधित्यकायाम्।

हृदयादिमन्त्राणां भूः (२) स्थानम् [ब्रह्माङ्गभूः] कृतमन्त्रन्यास इत्यर्थः। [ब्रह्मणि] निजतत्त्वे। "वेदस्तत्त्वं तपोब्रह्म" इत्युभयत्राप्यमरः। [योजितात्मा] नियमितचित्तः मन्त्रन्यासपूर्वकं ब्रह्म ध्यायन्नित्यर्थः। [सः] भवः [च] [त्वदेकेषोः] तवैकबाणस्य [निपातेन साध्यः] अनन्यसाध्योऽयमस्मिन्नवसर इति भावः ॥ १५ ॥

तस्मा इति। [यतात्मने] नियतचित्ताय [तस्मै] भवाय। रुच्यर्थानां प्रीयमाण इति (१,४,३३पा०) सम्प्रदानत्वाच्चतुर्थी। [प्रयतां हिमाद्रेस्तनूजाम्] पार्वतीम् [रोचयितुं यतस्व भवितव्यञ्चात्र पार्वत्यैवेत्याह,—[योषित्सु] स्त्रीषु मध्ये। यतश्च निर्द्धारणमिति (२,३,४१पा०) सप्तमी। [क्षमा] शक्ता [तस्य] हरस्य [वीर्यम्] रेतस्तस्य [निषेकः] क्षरणं तस्य [भूमिः] सैव सा पार्वत्येव, [इति आत्मभुवा] ब्रह्मणा [उपदिष्टम्] "उमेव क्षमे वोढुमित्यादिना,, उक्तमित्यर्थः ॥ १६ ॥

सापीदानीं सन्निकृष्टैव तस्येत्याह,—

गुरोरिति। [नगेन्द्रकन्या] पार्वती [च गुरोः] पितुः [नियो-

(२) ओं हृदयाय नमः ओं शिरसे स्वाहेत्यादीनां मन्त्राणाम्

अन्वास्त इत्यप्सरसां मुखेभ्यः
श्रुतं मया मत्प्रणिधिः स वर्गः ॥ १७ ॥
तद्गच्छ सिद्ध्यै कुरु देवकार्य्य-
मर्थोऽयमर्थान्तरभाव्य एव ।
अपेक्षते प्रत्ययमुत्तमं त्वां
बीजाङ्कुरः प्रागुदयादिवाम्भः ॥ १८ ॥

[त्] आसनात् [अधित्यकायाम्] (१) हिमाद्रेरूर्द्ध्वभूमौ भूमिरूर्द्ध्वमधित्यका" इत्यमरः। उपाधिभ्यां त्यकन्नासन्ना-ढयोरिति (५,२,३४पा०) त्यकन्प्रत्ययः। [तपस्यन्तम्] पश्चरन्तम्। कर्मणोरोमन्थतपोभ्यां वर्त्तिचरोरिति (३,१,१५ पा०) क्यङ्प्रत्ययः। ततः शतृप्रत्ययः [स्थाणुम्] रुद्रम् [अन्वा-स्त] उपास्त इत्यर्थः। [इति] इदम् [मया अप्सरसां मुखेभ्यः श्रुतम्] न चैतदैतिह्यमात्रमित्याह,—[स वर्गः] ; सोऽप्सरसां गणः [मत्प्रणिधिः] मम गूढचरः। "प्रणिधिः प्रार्थने चरे" इति यादवः ॥ १७ ॥

तदिति। [तत्] तस्मात् [सिद्ध्यै] कार्य्यसिद्ध्यर्थम् [गच्छ, देवकार्य्यं कुरु।] आशिषि लोट्। [अयमर्थः] प्रयोजनम् [अर्थान्तरभाव्यः] कारणान्तरसाध्य एव। तच्च कारणान्तरं पार्वतीसन्निधानमिति भावः। "अर्थः प्रकारे विषये वित्त-कारणवस्तुषु। अभिधेये च शब्दानां हत्तौ चापि प्रयोजने" इति विश्वः। तथापि बीजसाध्योऽङ्कुरः [बीजाङ्कुरः] [उद-

(१) यतः ब्रह्मरावात् जातिगुणक्रियाभिरेकदेशस्य पृथक्करणं तद्वाचक-पदात् पञ्चमी स्यात् षष्ठी स्यात्।

तस्मिन् सुराणां विजयाभ्युपाये
तवैव नामास्त्रगतिः कृती त्वम्।
अप्रसिद्धं यशसे हि पुंसा-
मनन्यसाधारणमेव कर्म॥ १९॥

सुराः समभ्यर्थयितार एते
कार्यं त्रयाणामपि विष्टपानाम्।
चापेन ते कर्म नचातिहिंस्र-
महो बतासि स्पृहणीयवीर्यः॥ २०॥

यात्] उत्पत्तेः [प्राक् अम्भ इव] [त्वामुत्तमं प्रत्ययम्] कारणम् [अपेक्षते।] "प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमरः। तस्मादस्मिन्नर्थे तव चरमसहकारित्वादनन्यसाध्योऽयमर्थ इति भावः॥ १८॥

तस्मिन्निति। [सुराणां विजयाभ्युपाये] जयस्योपायभूते [तस्मिन्] हरे [अस्त्रगतिः] अस्त्रप्रसरः [तवैव नाम।] नामेति सम्भावनायाम्। अन्येषान्तु सम्भावनापि नास्तीति भावः। अतः [त्वं कृती] कृतमस्यास्तीति कृती कृतार्थः। तथाहि, [अप्रसिद्धमपि अनन्यसाधारणमेव कर्म पुंसां यशसे हि] इदन्तु प्रसिद्धमसाधारणञ्चेति अतियशस्करमिति भावः॥ १९॥

प्रोत्साहनार्थं स्तौति,—

सुरा इति। [एते सुराः समभ्यर्थयितारः] याचितारः [कार्यम्] प्रयोजनम् [त्रयाणां विष्टपानामपि] सम्बन्धि सर्वलोकार्थमित्यर्थः। [कर्म ते] तव [चापेन] न तु अन्येनेति भावः। [अतिहिंस्रम्] अतिघातुकञ्च [न।] [अहो बत] इति सम्बो-

मधुश्च ते मन्मथ ! साहचर्या-
दसावनुक्तोऽपि सहाय एव ।
समीरणो नोदयिता भवेति
व्यादिश्यते केन हुताशनस्य ॥ २१ ॥
तथेति शेषामिव भर्त्तुराज्ञा-
मादाय मूर्ध्ना मदनः प्रतस्थे ।

धने।" "अहोवतानुकम्पायां खेदे सम्बोधनेऽपि च" इति "वतामन्त्रणे सन्तोषे च" इति "वतामन्त्रणसन्तोषखेदानुक्रोशविस्मये" इति विश्वः। [स्पृहणीयवीर्य्योऽसि] आश्चर्यविक्रमोऽसि। "आश्चर्यं स्पृहणीयञ्च" इति नानार्थकोषः ॥२०॥

मधुश्चेति । हे [मन्मथ !] [असौ मधुश्च] वसन्तोऽपि [ते साहचर्य्यात्] सहचरत्वादेव [अनुक्तोऽपि] अप्रेरितोऽपि [सहायः] सहकार्य्येव । तथा हि, [समीरणः] वायुः [हुताशनस्य] अग्नेः [नोदयिता] प्रेरको भवेति [केन व्यादिश्यते ?] अत्र मधुसमीरणयोरुक्तिमन्तरेण सहायताकरणं सामान्यधर्मः स च वाक्यद्वये वस्तुप्रतिवस्तुभावेन पृथग्निर्दिष्ट इति प्रतिवस्तूपमालङ्कारोऽयम् । तदुक्तम्, "यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि । गम्यौपम्याश्रिता सा स्यात् प्रतिवस्तूपमा मता" इति ॥ २१ ॥

तथेति । [तथा] अस्त्विति [भर्त्तुः] स्वामिनः [शेषामिव] प्रसाददत्तां मालामिव । "प्रसादान्निजनिर्माल्यदाने शेषेति कीर्त्तिता" इति विश्वः । "माल्याक्षतादिदाने स्त्री शेषा" इति वैजयन्तीकोषः । [आज्ञां मूर्ध्ना आदाय] शिरसा गृहीत्वा

ऐरावतास्फालनकर्कशेन
हस्तेन पस्पर्श तदङ्गमिन्द्रः ॥ २२ ॥

स माधवेनाभिमतेन सख्या
रत्या च साशङ्कमनुप्रयातः ।
अङ्गव्ययप्रार्थितकार्य्यसिद्धिः
स्थाण्वाश्रमं हैमवतं जगाम ॥ २३ ॥

तस्मिन् वने संयमिनां मुनीनां

[मदनः प्रतस्थे ।] समवप्रविभ्यः स्थः (१,३,२२पा०) इत्यात्मनेपदम् । इन्द्रः [ऐरावतास्फालनेन] प्रोत्साहनार्थेन ताड़नेन [कर्कशेन] परुषेण [हस्तेन तदङ्गम्] मदनदेहम् [पस्पर्श] हस्तस्पर्शेन सम्भावयामासेत्यर्थः । शेषामिवाज्ञामित्यत्र साधकबाधकप्रमाणाभावादुपमोत्प्रेक्षयोः सन्देहसङ्कर इति । यदि भर्त्रा शेषापि दत्ता तदा तामाज्ञामिवेत्युपमा । अथ न दत्ता तर्हि शेषत्वेनोत्प्रेक्षिता । शेषादानन्तु सन्दिग्धमिति ॥ २२ ॥

स इति । [सः] मदनः [अभिमतेन] प्रियेण [सख्या] सुहृदा [माधवेन] वसन्तेन [रत्या] स्वदेव्या [च साशङ्कम्] सङ्कटमापतितमिति सभयम् [अनुप्रयातः] सन् तथा [अङ्गस्य व्ययेनापि प्रार्थिता कार्य्यसिद्धिः ।] येन स तथोक्तः । शरीरं त्यक्त्वापि सर्वथा देवकार्य्यं साधयिष्यामीति कृतनिश्चयः सन्नित्यर्थः । [हैमवतम्] हिमवति भवम् [स्थाणोः] रुद्रस्य [आश्रमं जगाम] ॥ २३ ॥

तस्मिन्निति । [तस्मिन् वने] स्थाण्वाश्रमे [संयमिनाम्]

तपः समाधेः प्रतिकूलवर्त्ती
सङ्कल्पयोनेरभिमानभूत-
मात्मानमाधाय मधुर्जजृम्भे ॥ २४ ॥

कुबेरगुप्तां दिशमुष्णरश्मौ
गन्तुं प्रवृत्ते समयं विलङ्घ्य ।
दिग्दक्षिणा गन्धवहं मुखेन
व्यलीकनिश्वासमिवोत्ससर्ज ॥ २५ ॥

समाधिमताम् [मुनीनाम् समाधेः] एकाग्रतायाः प्रतिकूलं वर्त्तत इति [प्रतिकूलवर्त्ती] विरोधी [मधुः] वसन्तः [सङ्कल्पयोनेः] मनोभवस्य [अभिमानभूतम्] गर्वहेतुभूतमित्यर्थः । कार्यकारणयोरभेदोपचारः । [आत्मानम्] निजस्वरूपम् [आधाय] सन्निधाप्य [अजृम्भे] प्रादुर्बभूव वसन्तधर्मान् प्रवर्त्तयामासेत्यर्थः ॥ २४ ॥

वसन्तधर्मानाह,—

कुबेरेति । [उष्णरश्मौ] सूर्य्ये साहसिके च नायके [समयम्] दक्षिणायनकालं सङ्गमकालञ्च [विलङ्घ्य] अकाण्डे व्यतिक्रम्य [कुबेरगुप्ताम्] धनपतिपालितां कुत्सितशरीरेण केनचिद्रक्षिताञ्च उदीचीं स्त्रीलिङ्गात्स्त्रियं काञ्चिन्नायिकाञ्च [गन्तुम्] चलितुं सङ्गन्तुञ्च [प्रवृत्ते] सति [दक्षिणा दिक्] दाक्षिण्यवती नायिका च [मुखेन] अग्रभागेण वक्त्रेण च । वहतीति वहः पचाद्यच् । गन्धस्य वहम् [गन्धवहम्] अनिलम् व्यलीकेन दुःखेन निश्वासस्तम् [व्यलीकनिश्वासमिव ।] दुःखे ममार्थे व्यलीकमप्रियाकार्य्यवस्तुनोः” इति वैजयन्ती ।

असूत सद्यः कुसुमान्यशोकः
स्कन्धात् प्रभृत्येव सपल्लवानि ।
पादेन नापैक्षत सुन्दरीणां
सम्पर्कमाशिञ्जितनूपुरेण ॥ २६ ॥

[उत्ससर्ज] प्रवर्त्तयामास स्वभर्त्तरि समयोल्लङ्घनेन पराङ्गना-सङ्गतिप्रवृत्ते सति स्त्रियो दाक्षिण्यादकिञ्चिद्वदाः दुःखान्निःश्वसन्तीति भावः । उत्तरायणे सति मलयानिलाः प्रवृत्ता इति वाक्यार्थः । अत्रोत्प्रेक्षालङ्कारः । न च समासोक्तिरेवेय-मुत्प्रेक्षानुप्रविष्टेति शङ्कितव्यं केवलविशेषणसामर्थ्यादेवा-प्रस्तुतप्रतीतौ सोक्तिष्ठते अत्र तु दक्षिणेति विशेष्यसामर्थ्या-दपि नायिका प्रतीयते । न च श्लेष एव प्रकृताप्रकृतविषयः उभयश्लेषे श्लिष्टविशेष्यानङ्गीकारात् । तस्माच्छब्दशक्तिमूलो-ऽयं ध्वनिः । स च व्यलीकनिश्वासरूपचेतनधर्मसम्भावनार्थं दक्षिणस्या दिशो नायिकया सहाभेदमासादयन् अभेद-लक्षणातिशयोक्त्युपजीविनीं निश्वासमिवेति वाच्योत्प्रेक्षां निर्वहतीति "वाच्यसिद्ध्यङ्गभूत" इत्युत्पश्यामः ॥ २५ ॥

असूतेति । [अशोकः] वृक्षविशेषः [सद्यः] [स्कन्धात्] प्रका-ण्डात् [प्रभृत्येव] स्कन्धादारभ्येत्यर्थः । भाष्यकारवचनात् प्रभृतियोगे पञ्चमीति कैयटः । भाष्यञ्च "मूलात् प्रभृत्यग्रात् वृक्षांस्तक्ष्णुवन्ति" इति कार्त्तिक्याः प्रभृति आग्रहायणी मासे' इत्यादि । [सपल्लवानि कुसुमानि] [असूत] उभयम-प्युत्पादितवदित्यर्थः । [आशिञ्जितो नूपुरः] यस्य तेन । शिञ्च-धातोरकर्मकाद्गत्यर्थाकर्मकेत्यादिना (३,४,७२पा०) कर्त्तरि

सद्यः प्रवालोद्गमचारुपत्रे
नीते समाप्तिं नवचूतबाणे।
निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥ २७ ॥
वर्णप्रकर्षे सति कर्णिकारं
दुनोति निर्गन्धतया स्म चेतः।

कः। [सुन्दरीणां पादेन सम्पर्कम्] ताड़नम् [नापैक्षत]। "सनूपुररवेण स्त्रीचरणेनाभिताड़नम्। दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्" इति। वकुलो मुखशीधुसिक्तः "आलोकितः कुरुवकः कुरुते विकाशमालोड़ितस्तिलक उत्कलिको विभाति" ॥ २६ ॥

सद्य इति। [मधुः] वसन्त एवेषुकारः [प्रवालोद्गमाः] पल्लवाङ्कुरा एव [चारूणि पत्त्राणि] पत्त्रा यस्य तस्मिन्। "पत्त्रं वाहनपत्त्रयोः" इत्यमरः। नवं चूतं चूतकुसुमं तदेव बाणः तस्मिन् [नवचूतबाणे] [समाप्तिम् नीते] सति [सद्यः] [मनोभवस्य] धन्विनो [नामाक्षराणीव] [द्विरेफान्] भ्रमरान् [निवेशयामास] निदधौ। अत्र प्रवालपत्त्रे इत्याद्येकदेशविवर्त्तिरूपकं मधोरिषुकारत्वं रूपयत् नामाक्षराणीवेत्युत्प्रेक्षायां निमित्तमित्येकदेशविवर्त्तिरूपकोत्थापितेयमुत्प्रेक्षा ॥ २७ ॥

वर्णेति। [कर्णिकारम्] कर्णिकारकुसुमम्। अवयवे च प्राण्योषधिवृक्षेभ्यः (४,३,१३५पा० वा०) इत्युक्तस्य तद्धितस्य पुष्पफलमूलेषु बहुलमिति (४,३,१६६ पा०) लुक् एवमन्य-

प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः ॥ २८ ॥
बालेन्दुवक्राण्यविकाशभावा-
द्बभुः पलाशान्यतिलोहितानि ।
सद्योवसन्तेन समागतानां
नखक्षतानीव वनस्थलीनाम् ॥ २९ ॥

वापि द्रष्टव्यम् । [वर्णप्रकर्षे] वर्णोत्कर्षे सत्यपि [निर्गन्धतया] हेतुना [चेतो दुनोति स्म] पर्यतापयत् । लट् स्मे इति (३,२ ११८पा०) भूतार्थे लट् । तथा हि, [प्रायेण विश्वसृजः] विधातुः [प्रवृत्तिः] [गुणानां सामग्र्यविधौ] साकल्यसम्पाद नविषये [पराङ्मुखी] सर्वत्रापि वस्तुनि किञ्चिद्वैकल्यं सम्पा दयति यथा चन्द्रे कलङ्कः । अतः कर्णिकारेऽपि नैर्गन्ध्य युज्यत इति भावः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तर न्यासोऽलङ्कारः ॥ २८ ॥

बालेन्द्विति । [अविकाशभावात्] निर्विकाशत्वान्मुकुल भावाद्धेतोः [बालेन्दुः] इव [वक्राणि] [अतिलोहितानि] अतिरक्तानि [पलाशानि] किंशुकपुष्पाणि । "पलाशे किंशुकः पर्णः" इत्यमरः । [वसन्तेन] पुंसा [समागतानाम्] सङ्गता नाम् [वनस्थलीनाम्] स्त्रीणाम् [सद्यः] सद्योदत्तानि पुराणे ष्वतिलौहित्याभावादिति भावः । [नखक्षतानीव बभुः ।] अत्र वसन्तस्य वनस्थलीनाञ्च विशेषणसाधारण्यान्नायकव्यव हारप्रतीतेः समासोक्तिस्तावदस्ति । नखक्षतानीवेति जाति स्वरूपोत्प्रेक्षा वक्रत्वलौहित्यगुणनिमित्ता जागर्त्ति । सा च

लग्नद्विरेफाञ्जनभक्तिचित्रं
मुखे मधुश्रीस्तिलकं प्रकाश्य।
रागेण बालारुणकोमलेन
चूतप्रवालोष्ठमलञ्चकार॥ ३०॥

मृगाः पियालद्रुममञ्जरीणां
रजःकणैर्विघ्नितदृष्टिपाताः।
मदोद्धताः प्रत्यनिलं विचेरु-
र्वनस्थलीर्मर्मरपत्रमोक्षाः॥ ३१॥

नायकव्यवहाराश्रितसमासोक्तिगर्भिण्येवोत्तिष्ठत इत्युभयतो-
ऽेककालतैव विशेषणसामर्थ्यादप्रस्तुतस्य गम्यते समासोक्ति-
रिष्यत इति हि लक्षणम्॥ २९॥

लग्नेति। [मधुश्रीः] वसन्तलक्ष्मीः [लग्नद्विरेफाः] एव अ-
ञ्जनभक्तयः कज्जलरचनास्ताभिः [चित्रम्] चित्रवर्णम् [तिल-
कम्] पुष्पविशेषमेव तिलकं विशेषकम्। मुखं प्रारम्भः तस्मि-
न्नेव [मुखे] वक्त्रे [प्रकाश्य] प्रकटय्य [बालारुणकोमलेन] बा-
लार्कसुन्दरेण [रागेण] आरुणिम्ना तेनैव लाक्षारागेण चूतप्र-
वाल एवौष्ठस्तम् [चूतप्रवालोष्ठम् अलञ्चकार] प्रसाधयामास।
अत्र रूपकालङ्कारः॥ ३०॥

मृगा इति। [पियालद्रुमाः] राजादनवृक्षाः। "राजादनं
पियालः स्यात्" इत्यमरः। तेषाम् [मञ्जर्यः] तासाम् [रजःकणैः]
[विघ्निताः] सञ्जातविघ्नाः। दृष्टीनाम् पाताः] प्रभा येषान्ते-
तथोक्ताः [मदोद्धताः] मृगाः [प्रत्यनिलम्] अनिलाभिमुखम्
[मर्मराः] मर्मरशब्दवन्तः [पत्रमोक्षाः] जीर्णपर्णपाताः यासु

चूताङ्कुरास्वादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं
तदेव जातं वचनं स्मरस्य ॥ ३२ ॥

हिमव्यपायाद्विशदाधराणा-
मापाण्डरीभूतमुखच्छवीनाम् ।
स्वेदोद्गमः किम्पुरुषाङ्गनानां
चक्रे पदं पत्त्रविशेषकेषु ॥ ३३ ॥

ताः [वनस्थलीर्विचेरुः] वनप्रदेशेषु चरन्ति स्म । "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" इति (हरिकारिकोक्तेः) चरतेः सकर्मकत्वम् ॥ ३१ ॥

चूतेति । [चूताङ्कुराणामास्वादेन] [कषायकण्ठः] रक्तकण्ठः । सुरभावपथे रक्ते कषाय इति केशवः । पुमान् कोकिलः [पुंस्कोकिलः] पुंग्रहणं प्रागल्भ्यद्योतनार्थम् । [मधुरम् चुकूज] इति [यत्] [तत्] कूजनम् [एव] [मनस्विनीनाम् मानविघाते] रोषनिरासे [दक्षम्] [स्मरस्य वचनम्] मानं त्यजतेत्याज्ञावचनम् [जातम् ।] कोकिलकूजितश्रवणानन्तरं स्मराज्ञया इव मानं जहुरित्यर्थः ॥ ३२ ॥

हिमेति । [हिमस्य व्यपायात्] अपगमात् [विशदाः] नीरुजाः [अधराः] ओष्ठाः यासां तासाम् [आपाण्डरीभूतमुखच्छवीनाम्] कुङ्कुमपरिहारादिति भावः । [किम्पुरुषाङ्गनानाम्] [पत्त्रविशेषकेषु] पत्त्ररचनासु [स्वेदोद्गमः पदम् चक्रे]

तपस्विनः स्थाणुवनौकसस्ता-
माकालिकीं वीक्ष्य मधुप्रवृत्तिम्।
प्रयत्नसंस्तम्भितविक्रियाणां
कथञ्चिदीशा मनसां बभूवुः ॥ ३४ ॥

तं देशमारोपितपुष्पचापे
रतिद्वितीये मदने प्रपन्ने।
काष्ठागतस्नेहरसानुविद्धं
द्वन्द्वानि भावं क्रियया विवव्रुः ॥ ३५ ॥

घर्मोदयात् स्वेदोदयोऽभूदित्यर्थः। विशदाधरत्वं मधूच्छिष्ट-राहित्यादिति भावः। हेमन्तेषु नार्यो बिम्बोष्ठेषु मधूच्छिष्टं शीतभयाद्दधतीति प्रसिद्धम् ॥ ३३ ॥

तपस्विन इति। [स्थाणोर्वनमोकः] येषां ते [तपस्विनः] तत्रत्या मुनयः। समानकालः आद्यन्तावस्थाः [आकालिकीम्] अकालभवत्वात् उत्पत्त्यनन्तरविनाशिनीमित्यर्थः। आकालिकडाद्यन्तवचन इति (५,१,११४पा०) समानकालादिकट्-प्रत्ययः प्रकृतेराकाल आदेशश्च निपातितः। टिड्ढाणञित्यादिना ङीप् (४,१,१५पा०)। केचिदकालाद्दाध्यआदित्वा-द्भवार्थे ठगित्याहुः। तामाकालिकीम् [मधुप्रवृत्तिम्] [वीक्ष्य] [प्रयत्नेन संस्तम्भितविक्रियाणाम्] निरुद्धविकाराणाम् [मनसाम्] [कथञ्चिदीशाः] नियन्तारः [बभूवुः] ॥ ३४ ॥

तस्मिन्निति। [आरोपितम्] अधिज्यं कृतम् [पुष्पचापम्] येन तस्मिन् [रतिर्द्वितीया] यस्य तस्मिन् रतिसहाये [मदने तं देशम्] स्थाणुवनम् [प्रपन्ने] प्राप्ते सति [द्वन्द्वानि] स्थावराणि

मधु द्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्त्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं
मृगीमकण्डूयत कृष्णसारः ॥ ३६ ॥

जङ्गमानि च मिथुनानि [काष्ठा] उत्कर्षः। "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः। ताम् [गतः] यः [स्नेहः] इष्टसाधननिबन्धनः प्रेमापरनामा ममताभिमानः। "प्रेमा ना प्रियता हार्द्दं प्रेम स्नेह" इत्यमरः। स एव [रसः] तेन [अनुविद्धम्] सम्पृक्तम्। भावम् [रत्याख्यम्] शृङ्गारभावम् [क्रियया] कार्य्यभूतया चेष्टया [विवव्रुः] प्रकटीचक्रुः शृङ्गारचेष्टाः प्रावर्त्तन्तेत्यर्थः ॥ ३५ ॥

ताश्चेष्टा आह मध्वित्यादिभिश्चतुर्भिः—

मध्विति। द्वौ रेफौ वर्णविशेषौ यस्य सः [द्विरेफः] भ्रमरः। उपचारात्तदर्थोऽपि द्विरेफ उच्यते। यथाह कैयटः,—"शब्दधर्मेणाप्यर्थस्य व्यपदेशो दृश्यते यथा भ्रमरशब्दस्य द्विरेफत्वात् द्विरेफो भ्रमरः। [कुसुमम्] एव [एकम्] साधारणम् [पात्रम्] तस्मिन् [मधु] मकरन्दम्। "मधु मद्ये पुष्परसे" इति विश्वः। [स्वां प्रियाम्] भृङ्गीम् [अनुवर्त्तमानः] अनुसरन् [पपौ] तत्पीतशेषम् पपावित्यर्थः। कृष्णश्चासौ शारः शबलश्च [कृष्णशारः] कृष्णमृगः। वर्णो वर्णेनेति (२,१,६९ पा०) समासः[1] [स्पर्शेन] स्पर्शसुखेन [निमीलिताक्षीम्] [मृगीम्] [शृङ्गेण अक-

---

(१) वर्णवाचकेन सह वर्णवाचकः समस्यते स तत्पुरुषः।

ददौ रसात् पङ्कजरेणुगन्धि
गजाय गण्डूषजलं करेणुः ।
अर्द्धोपभुक्तेन बिसेन जायां
सम्भावयामास रथाङ्गनामा ॥ ३७ ॥
गीतान्तरेषु श्रमवारिलेशैः
किञ्चित्समुच्छ्वासितपत्त्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि
प्रियामुखं किम्पुरुषश्चुचुम्बे (म्ब) ॥ ३८ ॥

डूयत] ऋर्षितवान् । कण्ड्वादिभ्यो यगिति (३,१,२७ पा०)
यक् ततः कर्त्तरि लङ् ॥ ३६ ॥

ददाविति । [रसात्] अतिरागात् [करेणुः] करिणी । "करेणुरिभ्यां स्त्री नेभ" इत्यमरः । पङ्काज्जायत इति पङ्कजं तस्य रेणुः पङ्कजरेणुः तस्य गन्धोऽस्यास्तीति [पङ्कजरेणुगन्धि] गण्डूषजलम् मुखान्तर्धृतजलम् गजाय ददौ] । [रथाङ्गनामा] चक्रवाकः [अर्द्धम्] यथा तथा [उपभुक्तेन] अर्द्धजग्धेन [बिसेन जायां सम्भावयामास] स्वजग्धशेषं ददावित्यर्थः ॥ ३७ ॥

गीतेति । [किम्पुरुषः] किन्नरः [श्रमवारिलेशैः] स्वेदोदविन्दुभिः [किञ्चित्] ईषत् [समुच्छ्वासिताः] विश्लेषिताः [पत्त्रलेखाः] यस्य तत् पुष्पाणामासवः मद्यम् [पुष्पासवः] पुष्पोद्भवमद्यमित्यर्थः वसन्ते मधूकस्य सम्भवात् । पुष्पवासितमिति केचित् । तेन [आघूर्णिताभ्याम्] उद्भ्रान्ताभ्याम् [नेत्राभ्याम्] [शोभते] इति तथोक्तम् [प्रियामुखम्] [गीतान्तरेषु] गीतमध्येषु [चुचुम्बे (म्ब)] ॥ ३८ ॥

पर्य्याप्तपुष्पस्तवकस्तनाभ्यः
स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लतावधूभ्यस्तरवोऽप्यवापु-
र्विनम्रशाखाभुजबन्धनानि ॥ ३९ ॥
श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥ ४० ॥

पर्य्याप्तेति । [पर्य्याप्ताः] समग्राः [पुष्पस्तवकाः] ए
[स्तनाः] यासाम् [ताभ्यः] स्वाङ्गाच्चोपसर्जनादसंयोगोपधा
दिति (४,१,५४पा०) विकल्पात् न ङीप् । [स्फुरन्तः प्रवाला
पल्लवा एव [ओष्ठाः] तैः [मनोहराभ्यः] [लताः] एव [वध्वः
ताभ्यः सकाशात् [तरवोऽपि] लिङ्गादेव पुंस्त्वं गम्यते । [वि
नम्राः शाखाः] एव [भुजाः] तैः [बन्धनान्यवापुः] ताभिरा
लिङ्गिता इत्यर्थः । स्थावराणामपि मदनविकारोऽभू
किमुतान्येषामिति भावः । एतच्च तरुलतानामपि चेतनत्वा
दुक्तम् । यथाह मनुः—"अन्तःसंज्ञा भवन्त्येते सुखदुःखसम
न्विता" इति (१अ० ४९श्लो०) । अत्र रूपकालङ्कारः ॥३९॥

श्रुतेति । [तस्मिन् क्षणे] वसन्ताविर्भावकाले भगवा
[हरः] [श्रुताप्सरोगीतिरपि] दिव्याङ्गनागानमाकर्णयन्नपि
त्यर्थः । [प्रसंख्यानपरः] आत्मानुसन्धानपरः [बभूव] [ति
तथा हि [आत्मनः] चित्तस्य [ईश्वराणाम्] नियन्तॄणां व

लतागृहद्वारगतोऽथ नन्दी
वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव
मा चापलायेति गणान् व्यनैषीत् ॥ ४१ ॥
निष्कम्पवृक्षं निभृतद्विरेफं
मूकाण्डजं शान्तमृगप्रचारम् ।

ामित्यर्थः । विहन्यन्ते एभिरिति [विघ्नाः] प्रत्यूहाः ।
अर्थे कप्रत्ययः । [जातु] कदाचिदपि [समाधिभेदे] समाधि-
ञ्जने [प्रभवः] समर्था न [भवन्ति] ॥ ४० ॥

लतेति । [अथ] [लतागृहद्वारम्] [गतः] [वामे प्रकोष्ठे]
र्पितहेमवेत्रः] धारितहेमदण्डः [नन्दी] नन्दिकेश्वरः ।
'नन्दी भृङ्गिरिटिस्तण्डुनन्दिनौ नन्दिकेश्वर" इति कोषः ।
मुखे अर्पितायाः] सरोषविस्मयस्मितावलोकं निहितायाः
एकस्या अङ्गुलेः] तर्जन्याः [संज्ञया] सूचनया [एव ।]"संज्ञा
ाच्चेतना नाम हस्ताद्यैरर्थसूचना" इत्यमरः । [गणान्]
मथान् [चापलाय] चापलम् कर्त्तुम् । मा भवतेति । क्रिया-
र्थोपपदस्येत्यादिना चतुर्थी । [व्यनैषीत्] शिक्षितवान् ॥ ४१ ॥

न केवलं गणा एव विनीताः, किन्तु जरायुजादिचतु-
र्विधं प्राणिजातमपीत्याह,—

निष्कम्पेति । [निष्कम्पवृक्षम्] इदमुद्भिज्जोपलक्षणम् ।
निभृत द्विरेफम्] निश्चलभृङ्गं स्वेदजोपलक्षणमेतत् । [मूका-
ण्डजम्] निःशब्दपक्षिसरीसृपादिकम् एतेन अण्डजजाति-

तच्छासनात् काननमेव सर्वं
चित्रार्पितारम्भमिवावतस्थे ॥ ४२ ॥

दृष्टिप्रपातं परिहृत्य तस्य
कामः पुरःशुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं
ध्यानास्पदं भूतपतेर्विवेश ॥ ४३ ॥

स देवदारुद्रुमवेदिकायां
शार्दूलचर्मव्यवधानवत्याम् ।

रुता । [शान्तमृगप्रचारम्] जरायुजोपलक्षणमेतत् । [सर्वं
एव काननम्] [तच्छासनात्] नन्दीश्वराज्ञया [चित्रार्पित
मारम्भम्] चित्रलिखितारम्भम् [इवावतस्थे ।] "नृ-गवाद्य
जरायुजाः । स्वेदजाः क्रिमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः
उद्भिदस्तरुगुल्माद्याः" इत्यमरः ॥ ४२ ॥

दृष्टीति । [कामः] [प्रयाणे] यात्रायां पुरोगतः शुक्र
यस्मिन् देशे तम् [पुरःशुक्रम्] देशम् [इव ।] "प्रतिशुक्रं प्रति
बुधं प्रत्यङ्गारकमेव च । अपि शक्रसमो राजा हतसैन्
निवर्त्तते" इति प्रतिषेधात् । [तस्य दृष्टिप्रपातम्] दृग्वि
यम् [परिहृत्य] [प्रान्तेषु] पार्श्वदेशेषु [संसक्ताः] अन्योऽन
संसृष्टाः [नमेरूणाम्] सुरपुन्नागानाम् [शाखाः] यस्य तत्
तिरोधानयोग्यमिति भावः । [भूतपतेः] शिवस्य [ध्यान
स्पदम्] समाधिस्थानम् । आस्पदं प्रतिष्ठायामिति (६,
१४६पा०) निपातः । [विवेश] ॥ ४३ ॥

आसीनमासन्नशरीरपात-
स्त्रियम्बकं संयमिनं ददर्श ॥ ४४

पर्य्यङ्कबन्धस्थिरपूर्व्वकाय-
मृज्वायतं सन्नमितोभयांसम् ।
उत्तानपाणिद्वयसन्निवेशात्
प्रफुल्लराजीवमिवाङ्कमध्ये ॥ ४५ ॥

स इति । [आसन्नशरीरपातः] आसन्नमृत्युः [सः] कामः [शार्दूलचर्मणा व्यवधानवत्याम्] व्याघ्रचर्मास्तृतायामित्यर्थः । "मोक्षश्रीर्व्याघ्रचर्मणि" इति प्राशस्त्यादिति भावः । [देवदारुद्रुमवेदिकायामासीनम्] उपविष्टम् [संयमिनम्] समाधिनिष्ठम् [त्रियम्बकम्] त्रिनेत्रम् [ददर्श ।] त्र्यम्बकमित्युक्तेः पादपूरणव्यत्यासात्त्रियम्बकमिति पादपूरणार्थोऽयमियङादेशश्छान्दसः, महाकविप्रयोगादभियुक्तैरङ्गीकृतः । केचित्साहसिकाः त्रिलोचनमिति पेठुः ॥ ४४ ॥

तमेव देवं षड्भिः श्लोकैर्वर्णयति,—

पर्य्यङ्केति । [पर्य्यङ्कबन्धेन] वीरासनेन [स्थिरपूर्व्वकायम्] निश्चलोत्तरार्द्धम् ऋजुरायतश्च [ऋज्वायतः] तम् [सन्नमितौ] उभौ [अंसौ] यस्य तं तथोक्तम् । वृत्तिविषये उभशब्दस्थाने उभयशब्दप्रयोग इत्युक्तं कैयटेन । [उत्तानः] ऊर्द्ध्वतलो यः [पाणिद्वयस्य सन्निवेशः] संस्थानं तस्मात् [अङ्कमध्ये प्रफुल्लम्] (१) [राजीवं] पङ्कजं यस्य तम् [इव] स्थितम् । वीरासने व-

(१) प्रपूर्व्वात् फुल्लविकासे इत्यस्मात् पचाद्यच् ।

भुजङ्गमोन्नद्धजटाकलापं
कर्णावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां
कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥ ४६ ॥

किञ्चित्प्रकाशस्तिमितोग्रतारै-
र्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालै-
र्लक्ष्यीकृतघ्राणमधोमयूखैः ॥ ४७ ॥

शिष्ठः,—"एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितम् । इतरस्मिन् तथैवोरुं वीरासनमुदाहृतम्" इति । तथा योगसारे,—"उत्तानिते करतले करमुत्तानितं परम् । आदायाङ्कगतं कृत्वा ध्यायेद्यस्तस्य सोऽन्तरम्" इति ॥४५॥

भुजङ्गमेति । [भुजङ्गमेन उन्नद्धः] उन्नमय्य बद्धः [जटाकलापः] येन तं तथोक्तम् [कर्णावसक्तम्] कर्णावलम्बीत्यर्थः । अतएव [द्विगुणम्] द्विरावृत्तम् [अक्षसूत्रम्] अक्षमाला यस्य तम् [कण्ठप्रभाणाम्] [सङ्गेन] मिश्रणेन [विशेषनीलाम्] अतिनीलाम् [ग्रन्थिमतीम्] बन्धनयुक्ताम् [कृष्णत्वचम्] कृष्णमृगाजिनम् [दधानम्] ॥ ४६ ॥

किञ्चिदिति । [किञ्चित्प्रकाशाः] ईषत्प्रकाशाः [स्तिमिताः] निश्चलाः [उग्राः] च [ताराः] कनीनिका येषां तैः । "तारकाक्ष्णः कनीनिका" इत्यमरः । [भ्रूविक्रियायाम्] भ्रूविक्षेपे [विरतप्रसङ्गैः] प्रसक्तिरहितैः [अविस्पन्दितपक्ष्ममालैः] अच-

अवृष्टिसंरम्भमिवाम्बुवाह-
मपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधा-
न्निवातनिष्कम्पमिव प्रदीपम्॥ ४८॥

कपालनेत्रान्तरलब्धमार्गै-
र्ज्योतिःप्ररोहैरुदितैः शिरस्तः।
मृणालसूत्राधिकसौकुमार्यां
बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः॥ ४९॥

लिनपक्ष्मपङ्क्तिभिः अधःप्रसृता मयूखा येषान्तैः अधोमयू-
खैर्नेत्रैः विनेत्रत्वाद् बहुवचनम् [लक्ष्यीकृतघ्राणम्] नासाग्र-
निविष्टदृष्टिमित्यर्थः। "करणान्यवहिष्कृत्य स्थाणुवन्निश्चला-
त्मकः। आत्मानं हृदये ध्यायेन्नासाग्रन्यस्तलोचनः" इति
योगसारे॥ ४७॥

अवृष्टीति। अन्तश्चरन्तीति [अन्तश्चराः] तेषाम् [मरुताम्]
प्राणादीनां [निरोधात्] हेतोः [अवृष्टिसंरम्भम्] अविद्य-
मानवर्षसम्भ्रमम् [अम्बुवाहमिव] स्थितम् एतेन प्राणनिरोधः
सूचितः। [अनुत्तरङ्गम्] अनुद्गततरङ्गम् [अपामाधारम्]
ह्रदमिव स्थितम् एतेन अपाननिरोधः सूचितः। तथा [नि-
वाते] निर्वातदेशे [निष्कम्पम् निश्चलम् [प्रदीपमिव] स्थि-
तम् एतेन शेषवायुनिरोधः सूचितः। "निवातावाश्रया-
घातौ" इत्यमरः॥ ४८॥

कपालेति। [कपालनेत्रान्तरेण] ब्रह्मकरोटिमेकविवरेण

मनो नवद्वारनिषिद्धवृत्ति
हृदि व्यवस्थाप्य समाधिवश्यम्।
यमक्षरं क्षेत्रविदो विदुस्त-
मात्मानमात्मन्यवलोकयन्तम्॥ ५० ॥

स्मरस्तथाभूतमयुग्मनेत्रं
पश्यन्नदूरान्मनसाप्यधृष्यम्।

[लब्धमार्गैः] शिरस्तो ब्रह्मरन्ध्रात्। पञ्चम्यास्तसिल्। [उदितै उद्भूतैः [ज्योतिःप्ररोहैः] तेजोऽङ्कुरैः [मृणालसूत्राधिक सौकुमार्य्यम्] मार्दवं यस्यास्ताम् [बालस्येन्दोः] शिरश्चन्द्र [लक्ष्मीम् ग्लपयन्तम्] ॥ ४९ ॥

मन इति। [नवभ्यो द्वारेभ्यो निषिद्धा] निवर्त्तिता [वृत्तिः सञ्चारो यस्य तत्तथोक्तम्]समाधिना] प्रणिधानेन [वश्यम् वशङ्गतम् यत्प्रत्ययः। "प्रणिधानं समाधानं समाधि समाश्रये" इति हलायुधः। [मनः हृदि] हृदयाख्ये अधिष्ठा [व्यवस्थाप्य।] तथाच वशिष्ठः–"यतोनिर्याति विषयान् यस्मि स्रैव प्रलीयते। हृदयं तद्विजानीयात् मनसः स्थितिकार णम्" इति। [क्षेत्रविदः] क्षेत्रज्ञाः पुरुषाः। [यम्] न क्षर तीति [अक्षरम्] अविनाशिनम् [विदुः] विदन्ति। विद लटोवेति (३,४,८३पा०) झेर्जुस्। तम् [आत्मानम् आत्मनि स्वस्मिन् [अवलोकयन्तम्] साक्षात्कुर्वन्तम् स्वातिरेकेण प मात्मनोऽभावादिति भावः ॥ ॥ ५० ॥

स्मर इति। [स्मरः] कामः [तथाभूतम्] पूर्वोक्तरू [मनसाप्यधृष्यमयुग्मनेत्रम्] विषमाक्षम् [अदूरात्मनः] [

नालक्षयत् साध्वससन्नहस्तः
स्रस्तं शरं चापमपि स्वहस्तात् ॥ ५१ ॥

निर्वाणभूयिष्ठमथास्य वीर्य्यं
सन्धुक्षयन्तीव वपुर्गुणेन।
अनुप्रयाता वनदेवताभ्या-
मदृश्यत स्थावरराजकन्या ॥ ५२ ॥

अशोकनिर्भर्त्सितपद्मराग-
माकृष्टहेमद्युतिकर्णिकारम्।
मुक्ताकलापीकृतसिन्धुवारं
वसन्तपुष्पाभरणं वहन्ती ॥ ५३ ॥

ध्वसेन सन्नहस्तः] विस्रस्तपाणिः सन् [स्वहस्तात् स्रस्तं शरम् चापमपि] चापञ्च [नालक्षयत्] न विवेद भीतो मुह्यतीति भावः ॥ ५१ ॥

निर्वाणेति। [अथ निर्वाणेन] नाशेन [भूयिष्ठम्] [निर्वाण-भूयिष्ठम्] नष्टप्रायमित्यर्थः [अस्य] स्मरस्य [वीर्य्यम्] बलम् [वपुर्गुणेन] सौन्दर्य्येण [सन्धुक्षयन्तीव] पुनरुज्जीवयन्तीव स्थिता [वनदेवताभ्याम्] सखीभूताभ्याम् [अनुप्रयाता] अनुगता [स्थावरराजकन्या] पार्वती [अदृश्यत] दृष्टा ॥ ५२ ॥

तामेवाह चतुर्भिः,—

अशोकेति। [अशोकपुष्पेण निर्भर्त्सिताः] तिरस्कृताः [पद्मरागाः] येन तथोक्तम् [आकृष्टहेमद्युतीनि] आहृतस्वर्णाभरण-वर्णानि [कर्णिकाराणि] यस्मिन् तत्तथोक्तम् [मुक्ताकलापी-

आवर्जिता किञ्चिदिव स्तनाभ्यां
वासो वसाना तरुणार्करागम् ।
पर्य्याप्तपुष्पस्तवकावनम्रा
सञ्चारिणी पल्लविनी लतेव ॥ ५४ ॥

स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण
मौर्वीं द्वितीयामिव कार्मुकस्य ॥ ५५ ॥

कृतानि सिन्धुवाराणि] निर्गुण्डीकुसुमानि यस्मिन् तत् । "सिन्धुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि" इत्यमरः । [वसन्तपुष्पाण्येवाभरणं वहन्ती ॥ ५३ ॥

आवर्जितेति । [स्तनाभ्यां किञ्चिदावर्जिता] ईषदानमितवपुः [तरुणार्कस्य रागः] इव रागो यस्य तत् बालार्कारुणमित्यर्थः । उपमानपूर्वपदो बहुव्रीहिरुत्तरपदलोपश्च (२, २,२४पा०वा०) । [वासो वसाना] आच्छादयन्ती । अतएव [पर्य्याप्तपुष्पस्तवकावनम्रा पल्लविनी] किशलयवती [सञ्चारिणी लतेव] स्थितेति शेषः ॥ ५४ ॥

स्रस्तामिति । [स्थानविदा] निक्षेपयोग्यस्थानवेदिना [स्मरेण न्यासीकृताम्] निक्षेपीकृताम् । कर्मणि प्रभवतीति कार्मुकम्] धनुः । कर्मण उकञ् (५,१,१०३पा०) इत्युकञ्-प्रत्ययः । तस्य [द्वितीयां मौर्वीमिव] स्थिताम् । अत्र हि न्यस्ता मौर्वी उत्तरत्र हरवैरनिर्यातनाय उपयुज्यत इति भावः ।

सुगन्धिनिश्वासविवृद्धतृष्णं
विम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं संभ्रमलोलदृष्टि-
र्लीलारविन्देन निवारयन्ती ॥ ५६ ॥
तां वीक्ष्य सर्वावयवानवद्यां
रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः
स्वकार्य्यसिद्धिं पुनराशशंसे (स) ॥ ५७ ॥

[नितम्बात् स्रस्ताम्] चलिताम् [केशरदाम वकुलमाला सैव [काञ्ची] ताम् [पुनःपुनरवलम्बमाना] हस्तेन धारयन्ती ॥५५॥

सुगन्धीति। [सुगन्धिभि र्निश्वासैर्विवृद्धतृष्णाम्] विम्बतुल्योऽधरः [विम्बाधरः ।] वृत्तौ मध्यपदलोपः स्यात् इति वामनः । तस्य [आसन्नचरम्] सन्निकृष्टचरम् [द्विरेफम्] भृङ्गम् [प्रतिक्षणम्] [सम्भ्रमेण लोलदृष्टिः] चञ्चलाक्षी सती [लीलारविन्देन निवारयन्ती] ॥ ५६ ॥

तामिति। [सर्वावयवेष्वनवद्याम्] अगर्ह्याम् । अवद्यपण्येति (३,१,१०१ पा०) निपातः । रतेः कामकलत्रस्यापि [ह्रीपदम्] लज्जानिमित्तम् [आदधानाम्] न्यूनतामावहन्तीमित्यर्थः । [ताम्] पार्वतीम् [वीक्ष्य] [पुष्पचापः] कामः [जितेन्द्रिये] दुर्ज्जयेऽपीत्यर्थः । [शूलिनि] शिवेविषये [स्वकार्य्यसिद्धिम्] [पुनराशशंसे (स)] चकमे । पूर्वं साध्वसम्नन्नहस्त-इत्यादिना कार्य्यसिद्धेरनुकूलितत्वाभिधानादिह पुनरित्युक्तम् ॥ ५७ ॥

भविष्यतः पत्युरुमा च शम्भोः
समाससाद प्रतिहारभूमिम् ।
योगात् स चान्तः परमात्मसंज्ञं
दृष्ट्वा परं ज्योतिरुपारराम ॥ ५८ ॥

ततो भुजङ्गाधिपतेः फणाग्रै-
रधः कथञ्चिद्धृतभूमिभागः ।
शनैःकृतप्राणविमुक्तिरीशः
पर्यङ्कबन्धं निबिड़ं बिभेद ॥ ५९ ॥

भविष्यत इति । [उमा च भविष्यतः पत्युः] शम्भोः [प्रतिहारभूमिम्] द्वारदेशम् [समाससाद ।] "स्त्री द्वार्द्वारं प्रतिहारे" इत्यमरः । [स] शम्भुः [च] [अन्तः] [परमात्मा] इति [संज्ञा] यस्य तत् [परम्] मुख्यम् । "परं दूरान्यमुख्येषु" इति यादवः । [ज्योतिर्दृष्ट्वा] साक्षात्-कृत्य [योगात्] ध्यानात् । "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः । [उपारराम] उपारतः । व्याङ्परिभ्यो रमः (१,३,८३पा०) इति परस्मैपदम् ॥ ५८ ॥

तत इति । [ततो भुजङ्गाधिपतेः] शेषस्य [फणाग्रैः] [अधः] भूमेरधः [कथञ्चित्] अतियत्नेन [धृतो भूमिभागः] स्वोपवेशनभूभागो यस्य सः तथोक्तः । वायुधारणाहितलाघव निवृत्त्या भगवतो गुरुत्वादिति भावः । [शनैः] कृता प्राणानां प्राङ्निरुद्धानां विमुक्तिः पुनःसञ्चारो येन सः [कृत

तस्मै शशंस प्रणिपत्य नन्दी
शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्त्तुरेनां
भ्रूक्षेपमात्रानुमतप्रवेशाम् ॥ ६० ॥
तस्याः सखीभ्यां प्रणिपातपूर्वं
स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले
पुष्पोच्चयः पल्लवभङ्गभिन्नः ॥ ६१ ॥

प्राणविमुक्तिः] [ईश्यो निविड़म्] दृढ़म् [पर्य्यङ्कबन्धम्] वीरासनम् [बिभेद] शिथिलीचकार ॥ ५९ ॥

तस्मा इति । अथ [नन्दी तस्मै] भगवते । क्रियाग्रहणात् (१) चतुर्थी । [प्रणिपत्य] नमस्कृत्य [शुश्रूषया] सेवया निमित्तेन [उपेताम्] सेवार्थमागतामित्यर्थः । [शैलसुताम् शशंस] निवेदयामास । [भर्तुः] स्वामिनः [भ्रूक्षेपमात्रेण] भ्रूसंज्ञयैव [अनुमतप्रवेशाम्] अङ्गीकृतप्रवेशाम् [एनां] शैलसुताम् प्रवेशयामास च] ॥ ६० ॥

तस्या इति । [तस्याः] पार्वत्याः [सखीभ्याम्] पूर्वोक्ताभ्याम् [स्वहस्तेन लूनः] उपचितः [पल्लवभङ्गभिन्नः] किशलयशकलमिश्रः [शिशिरात्ययस्य] वसन्तस्य सम्बन्धी [पुष्पोच्चयः] पुष्पनिकरः । हस्तादाने चेरस्तेय इति (३,३,४० पा०) घञ्

(१) कर्मणा यमभिप्रैतीति (१,४,३२पा०) सूत्रे कर्मपदेन क्रियया अपि यमभिप्रैति स सम्प्रदानम् इति वार्त्तिककृतोक्तत्वात् क्रियोद्देश्यतया संप्रदानत्वम् ।

उमापि नीलालकमध्यशोभि
विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन
मूर्ध्ना प्रणामं वृषभध्वजाय ॥ ६२ ॥

अनन्यभाजं पतिमाप्नुहीति
सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित्
पुष्णन्ति लोके विपरीतमर्थम् ॥ ६३ ॥

विषयत्वात् कवीनामयं प्रामादिकः प्रयोग इति वल्लभः । [त्र्यम्बकपादमूले] प्रणतिपूर्वकं [व्यकीर्य्यत] विच्छिन्नः ॥ ६१ ॥

उमापीति । [उमापि नीलालकानां मध्ये शोभते] इति तथोक्तम् अलकन्यस्तमित्यर्थः । [नवकर्णिकारं विस्रंसयन्ती] [कर्णाच्युतः पल्लवः] यस्य तेन [मूर्ध्ना वृषभध्वजाय प्रणामं चकार ।] क्रियाग्रहणात् सम्प्रदानत्वम् ॥ ६२ ॥

अनन्येति । [सा] कृतप्रणामा देवी [भवेन] हरेण अन्यां न भजतीति तम् [अनन्यभाजम् ।] भजो ण्विरिति (३,२, ६२पा०) ण्विप्रत्ययः । सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः । [पतिमाप्नुहीति तथ्यम्] सत्यम् [एवाभिहिता] उक्ता उत्तरत्र तथैव सम्भवादिति भावः अभिदधातेर्ब्रुवर्थस्य दुहादित्वादप्रधाने कर्मणि क्तः । तथाहि [ईश्वरव्याहृतयः] महापुरुषोक्तयः [कदाचित्] अपि [लोके] भुवने । "लोकस्तु भुवने

कामस्तु वाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः
शरासनज्यां मुहुराममर्श ॥ ६४ ॥

अथोपनिन्ये गिरिशाय गौरी
तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखै-
र्मन्दाकिनीपुष्करवीजमालाम् ॥ ६५ ॥

जने" इत्यमरः । [विपरीतम्] विसंवादिनम् [अर्थम्] अभिधेयम् [न पुष्णन्ति] न बोधयन्तीत्यर्थः ॥ ६३ ॥

कामस्त्विति । [कामस्तु वाणावसरं प्रतीक्ष्य] उमासन्निधानादयमेव वाणप्रयोगसमय इति ज्ञात्वा पतङ्गेन तुल्यम् [पतङ्गवत्] शलभवत् । "समौ पतङ्गशलभौ" इत्यमरः । तेन तुल्यं क्रिया चेद्वतिरिति (५,१,११५पा०) वतिप्रत्ययः । [वह्निमुखं विविक्षुः] प्रवेष्टुमिच्छुः । विशतेः सनन्तादुप्रत्ययः । उमायाः समक्षम् [उमासमक्षम् ।] अक्ष्णः समीपम् अव्ययीभावे शरत्प्रभृतिभ्य इति (५,४,१०७पा०) समासान्तोऽच्प्रत्ययः । [हरे बद्धलक्ष्यः] सन् [शरासनस्य ज्याम्] मौर्वीम् [मुहुराममर्श] परामृष्टवान् ॥ ६४ ॥

अथोपेति । [अथ गौरी] तपोऽस्यास्तीति तपस्वी । अस्मायामेधास्रजो विनिरिति (५,२,१२१पा०) विनिप्रत्ययः । तस्मै [तपस्विने] [गिरिशाय ताम्ररुचा] रक्तवर्णेन [करेण]

प्रतिग्रहीतुं प्रणयिप्रियत्वात्
त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा
धनुष्यमोघं समधत्त बाणम् ॥ ६६ ॥

हरस्तु किञ्चित् परिलुप्तधैर्य-
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥ ६७ ॥

[भानु मतः] अंशुमतः [मयूखैर्विशोषिताम्] मन्दाकिन्याः [पुष्कराणि] पद्मानि तेषाम् [बीजानि] तेषाम् [मालाम्] जपमालिकाम् [उपनिन्ये] समर्पितवती ॥ ६५ ॥

प्रतिग्रहीतुमिति । [त्रिलोचनस्य प्रणयिप्रियत्वात्] अर्थिप्रियत्वात् [ताम्] अक्षमालाम् [प्रतिग्रहीतुम्] स्वीकर्त्तुम् उपचक्रमे ।] पुष्पं धनुर्यस्य सः [पुष्पधन्वा] कामः [च] । वा संज्ञायाम् (५,४,१३३पा०) इत्यनङादेशः । सम्मोह्यते अनेनेति [सम्मोहनं नाम] । नामेति प्रसिद्धौ । [अमोघं बाणम्] सायकम् [धनुषि समधत्त] संहितवान् ॥ ६६ ॥

हरस्त्विति । [हरस्तु] हरोऽपि [चन्द्रोदयारम्भे अम्बुराशिरिव] [किञ्चित्] ईषत् [परिलुप्तधैर्यः] न तु प्राकृतजनवदत्यन्तलुप्तधैर्य्य इति भावः । [बिम्बफलतुल्यः अधरोष्ठः] यस्य तस्मिन् [उमामुखे] [विलोचनानि व्यापारयामास] त्रिभि-

विवृण्वती शैलसुतापि भाव-
मङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ
मुखेन पर्यस्तविलोचनेन ॥ ६८ ॥

अथेन्द्रियक्षोभमयुग्मनेत्रः
पुनर्वशित्वाद्बलवन्निगृह्य।
हेतुं स्वचेतोविकृतेर्दिदृक्षु-
र्दिशामुपान्तेषु ससर्ज दृष्टिम् ॥ ६९ ॥

रपि लोचनैः साभिलापमद्राक्षीदित्यर्थः। एतेन भगवती रतिभावोदय उक्तः ॥ ६७ ॥

विवृण्वतीति। [शैलसुतापि] [स्फुरद्बालकदम्बकल्पैः] विकसत्कोमलनीपसदृशैः पुलकितैरित्यर्थः। ईषदसमाप्तौ (५,३, ६७पा०) कल्पप्प्रत्ययः। [अङ्गैर्भावम्] रत्याख्यम् [विवृण्वती] प्रकाशयन्ती [चारुतरेण पर्यस्तविलोचनेन] व्रीडाविभ्रान्तनेत्रेण [मुखेन] असाचि साचि सम्पद्यमाना कृता [साचीकृता] तिर्य्यक्कृता। "तिर्य्यगर्थे साचि तिरः" इत्यमरः। [तस्थौ] स्थिता मुखं साचीकृत्य स्थितेत्यर्थः। न केवलं हरस्यैव, देव्या अप्युदितो रतिभाव इति भावः ॥ ६८ ॥

अथेति। [अथ] अयुग्मानि नेत्राणि यस्य सः [अयुग्मनेत्रः] त्रिनेत्रः [वशित्वात्] जितेन्द्रियत्वात् [इन्द्रियक्षोभम्] पूर्वोक्तमिन्द्रियविकारम् [पुनः बलवत्] दृढ़म् [निगृह्य] निवार्य्य [स्वचेतोविकृतेः] स्वचित्तविकारस्य [हेतुम्] कारणम् [दिदृक्षुः]

स दक्षिणापाङ्गनिविष्टमुष्टिं
नतांसमाकुञ्चितसव्यपादम्।
ददर्श चक्रीकृतचारुचापं
प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ ७० ॥

तपःपरामर्शविवृद्धमन्यो-
र्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य।
स्फुरन्नुदर्चिः सहसा तृतीया-
दक्ष्णः कृशानुः किल निष्पपात ॥ ७१ ॥

द्रष्टुमिच्छुः [दिशामुपान्तेषु दृष्टिं ससर्ज] प्रसारयामास ॥६९॥

स इति। [सः] भगवान् [दक्षिणापाङ्गे निविष्टा] स्थिता [मुष्टिः] यस्य तम् [नतांसम्] [आकुञ्चितः सव्यपादः] यस्य तम् आलीढ़ाख्यस्थानके स्थितमित्यर्थः। [चक्रीकृतचारुचापम्] मण्डलीकृतसौम्यकोदण्डम् [प्रहर्तुमभ्युद्यतमात्मयोनिम्] मनोभवम् [ददर्श।] आलीढ़लक्षणमाह यादवः,—"स्थानानि धन्विनां पञ्च तत्र वैशाखमस्त्रियाम्। वितस्त्यन्तरगौ पादौ मण्डलं तोरणाकृती। समानौ स्यात्समपदमालीढ़ं पदमग्रतः। दक्षिणं वाममाकुञ्च्य प्रत्यालीढ़ं विपर्य्यय इति ॥७०॥

तप इति। [तपः परामर्शेन] तपस आस्कन्दनेन [विवृद्धमन्योः] प्रवृद्धकोपस्य [भ्रूभङ्गेण दुष्प्रेक्ष्यम्] दुर्दर्शम् [मुखम्] यस्य [तस्य] हरस्य [तृतीयादक्ष्णः स्फुरन्] उद्दीप्यमानः [उदर्चिः] उद्भूतज्वालः [कृशानुः] अग्निः [सहसा] अतर्कित

क्रोधं प्रभो ! संहर संहरेति
यावद्गिरः खे मरुतां चरन्ति।
तावत् स वह्निर्भवनेत्रजन्मा
भस्मावशेषं मदनं चकार ॥ ७२ ॥

तीव्राभिषङ्गप्रभवेण वृत्तिं
मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्त्तं
कृतोपकारेव रतिर्बभूव ॥ ७३ ॥

मेव। "अतर्कितं तु सहसा" इत्यमरः। [निष्पपात किल] निश्चक्राम खलु ॥ ७१ ॥

क्रोधमिति। हे [प्रभो !] स्वामिन् ! [क्रोधं संहर संहर] निवर्त्तय निवर्त्तय। चापले द्वे भवत इति वक्तव्यमिति (८,१, १२ पा० सू० स्थेन) वार्त्तिकेन द्वित्वम्। "सम्भ्रमेण प्रवृत्तिश्चापलमिति" काशिका। इत्येवम् [मरुतां देवानां गिरः] वाचः [खे] व्योम्नि [यावत् चरन्ति] प्रवर्त्तन्ते [तावत्] तत्कालमेव भवस्य नेत्राज्जन्म यस्य सः [भवनेत्रजन्मा।] अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः। [सः वह्निर्मदनम्] भस्मैवावशेषो यस्य तम् [भस्मावशेषं चकार] ददाहेत्यर्थः ॥ ७२ ॥

तीव्रेति। [तीव्राभिषङ्गप्रभवेण] अतिदुःसहाभिभवसम्भवेन। "अभिषङ्गस्त्वभिभवे सङ्गे आक्रोशनेऽपि च" इति वैजयन्ती। [इन्द्रियाणाम्] चक्षुरादीनाम् [वृत्तिम्] व्यापारम्

तमाशु विघ्नं तपसस्तपस्वी
वनस्पतिं वज्र इवावभज्य ।
स्त्रीसन्निकर्षं परिहर्त्तुमिच्छ-
न्नन्तर्दधे भूतपतिः सभूतः ॥ ७४ ॥

शैलात्मजापि पितुरुच्छिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखी कथञ्चित् ॥७५॥

[संस्तम्भयता] प्रतिबध्नता [मोहेन] मूर्च्छया कर्त्रा [रतिः] मदनभार्य्या [मुहूर्त्तम्] अज्ञातम् भर्तृव्यसनम् भर्तृनाशो यया सा तथोक्ता सती [कृतोपकारेव बभूव] सहसा दुःखोपनिपातान्मूर्च्छेत्यर्थः । मोहेन दुःखसंवेदनाभावात्तस्योपकारकत्वोक्तिः ॥ ७३ ॥

तमिति । [तपस्वी] तपोनिष्ठः [भूतपतिः] शिवः [तपसो विघ्नम्] अन्तरायभूतम् [तम्] कामम् [आशु वज्रः] अशनि [वनस्पतिम्] वृक्षम् [इव] [अवभज्य] भङ्क्त्वा [स्त्रीसन्निकर्षम्] स्त्रीसन्निधानम् [परिहर्त्तुमिच्छन्] तस्यानर्थहेतुत्वादिति भावः । [सभूतः] सगणः सन् [अन्तर्दधे] ॥ ७४ ॥

शैलात्मजेति । [शैलात्मजा] पार्वती [अपि] [उच्छिरसः] उन्नतशिरसो महतः [पितुरभिलाषम्] हरो वरोऽस्त्विति मनोरथम्, [ललितम्] सुन्दरम् [आत्मनो वपुश्च] [व्यर्थम्] निष्फलम् [समर्थ्य] विचार्य्य [सख्योः समक्षम्] पुरः [इति]

सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या
दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नां
प्रतिपथगतिरासीत् वेगदीर्घीकृताङ्गः ॥ ७६ ॥

इति श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये
मदनदहनो नाम तृतीयः सर्गः ॥ ३ ॥

हेतुना [अधिकम् जातलज्जा] समानजनसमक्षमवमानस्याति दुःसहत्वादिति भावः । [शून्या] निरुत्साहा सती [कथञ्चित्] कृच्छ्रेण [भवनस्याभिमुखी] जगाम ॥ ७५ ॥

सपदीति । [सपदि अद्रिः] हिमवान् [रुद्रस्य संरम्भात्] कोपात् [भीत्या] । "संरम्भः सम्भ्रमे कोपे" इति विश्वः । [मुकुलिताक्षीम्] निमीलितनेत्राम् । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (५,४,११३ पा०) इति षच्प्रत्ययः । षिद्गौरादिभ्यश्चेति (४,१,४१ पा०) ङीष् । अनुकम्पितुमर्हाम् [अनुकम्प्याम् ।] ऋहलोर्ण्यदिति (३,१,१२४, पा०) ण्यत्प्रत्ययः । [दुहितरम् दोर्भ्यामादाय] [दन्तयोर्लग्नाम् पद्मिनीम्] नलिनीम् [बिभ्रत्] [सुरगज इव] [वेगेन] रयेण [दीर्घीकृताङ्गः] आयतीकृतशरीरः सन् पन्थानम्प्रतिगता प्रतिपथा मार्गानुसारिणी गतिर्यस्य सः [प्रतिपथगतिरासीत्] पन्थानमनुसृत्य जगामेत्यर्थः ॥ ७६ ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनीसमाख्यायां तृतीयः सर्गः ॥ ३ ॥

चतुर्थः सर्गः।

अथ मोहपरायणा सती
विवशा कामबधूर्विबोधिता।
विधिना प्रतिपादयिष्यता
नववैधव्यमसह्यवेदनम् ॥ १ ॥

मूर्च्छिता रतिरित्युक्तम् सम्प्रति तद् वृत्तान्तमेवाह,
अथेति। [अथ] अनन्तरम् मोहो मूर्च्छा परम् अय
आश्रयो यस्याः सा [मोहपरायणा] मोहैकशरणा [सती
"परायणमभिप्रेते तत्परे परमाश्रय" इति यादवः। [विव
मूढत्वान्निश्चेष्टा [कामबधूः] रतिः। [असह्या] दुःसहा [वेद
यस्मिन् तत्तथोक्तम्। विधवायाः गतभर्तृकायाः भावः वै
नवञ्च तत् वैधव्यञ्चेति [नववैधव्यम्]। नवग्रहणं दुःसहत्व
तनार्थम्। [प्रतिपादयिष्यता] अनुभावयिष्यता क्रिय
क्रियायां लृट् (१)। [विधिना] दैवेन। "विधिर्विधाने
च" इत्यमरः। [विबोधिता] वैधव्यानुफलोऽयं विधि
भावः। अस्मिन् सर्गे वियोगिनीवृत्तानि। विषमे स
गुरुः समे सभरा लोऽथ गुरुर्वियोगिनीति लक्षणात्॥

---

(१) लृट् शेषे चेति ३,३,१३ सूत्रे चकारात् क्रियार्थायां क्रियाय
स्यात्। लृटः सद्वा ३,२,१४पा० इति लृटः शतरि ततः स्यडाग

अवधानपरे चकार सा
प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोरतृप्तयोः
प्रियमत्यन्तविलुप्तदर्शनम् ॥ २ ॥

अयि जीवितनाथ ! जीवसी-
त्यभिधायोत्थितया तया पुरः ।
ददृशे पुरुषाकृति क्षितौ
हरकोपानलभस्म केवलम् ॥ ३ ॥

अवधानेति । [सा] रतिः [प्रलयान्ते] मूर्च्छावसाने । लयो नष्टचेष्टता" इत्यमरः । [उन्मिषिते] उन्मीलिते [विलो- ने] अवधानं परं प्रधानं ययोस्ते अवधानपरे दिदृक्षया अव- ते [चकार ।] द्रष्टव्याभावात्तु न विवेदेत्याह नेति [प्रियम्] मम् [अतृप्तयोः] तृप्तिं न गतयोः नित्यदिदृक्षमाणयोरि- र्थः [तयोः] लोचनयोः दर्शनक्रियापेक्षया सम्बन्धे षष्ठी । यन्तविलुप्तम् दर्शनं स्वलोचनयोः करणयोर्यस्य कर्मभूतस्य म् [अत्यन्तविलुप्तदर्शनम्] सन्तम् [न विवेद] न ज्ञातवती । यनाशापरिज्ञानाद्दिदृक्षाशङ्का इति तात्पर्य्यार्थः ॥ २ ॥

अयीति । अयीति प्रश्ने । "अयि प्रश्नानुनययोः इति रः । [अयि जीवितनाथ ! जीवसि] प्राणिषि कच्चिदिति ? भिधायोत्थितया] [तया] रत्या [पुरः] अग्रे [क्षितौ] पुरुषस्य कृतिरिव आकृतिर्यस्य तत् [पुरुषाकृति] [केवलम्] एकम् रकोपानलभस्म ददृशे] दृष्टं न तु पुरुष इति भावः ॥३॥

अथ सा पुनरेव विह्वला
वसुधालिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्द्धजा
समदुःखामिव कुर्वती स्थलीम् ॥ ४ ॥

उपमानमभूद्विलासिनां
करणं यत्तव कान्तिमत्तया ।
तदिदं गतमीदृशीं दशां
न विदीर्य्ये कठिनाः खलु स्त्रियः ॥ ५ ॥

अथेति। [अथ] भस्मदर्शनानन्तरम् [पुनरेव] [विह्वला] वि-ह्वला [वसुधालिङ्गनधूसरस्तनी] वसुधालिङ्गनेन क्षितिलुण्ठनेन धूसरौ धूसरवर्णौ स्तनौ कुचौ यस्याः सा तथोक्ता। स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति (४,१,५४ पा०) ङीप्। [विकीर्णमूर्द्धजा] विकीर्णा विक्षिप्ताः मूर्द्धजाः केशा यस्याः सा तथोक्ता [सा] रतिः [स्थलीम्] वनभूमिं तत्रत्यान् प्राणिन इत्यर्थः। जानपदकुण्डगोणस्थलेत्यादिना (४,१,४२ पा० ङीष्। [समदुःखाम्] स्वतुल्यशोकाम् [कुर्वतीव] [विललाप] परिदेवितवती। "विलापः परिदेवनम्" इत्यमरः ॥ ४ ॥

उपमानमिति। [तव यत्करणम्] गात्रम्। करणं साधकतमक्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः। [कान्तिमत्तया] सौन्दर्यैहेतुना [विलासिनाम्] विलसनशीलानाम्। वौ कषलसेत्यादिना (३,२,१४पा०) घिनुण् प्रत्ययः। उपमीयते येन तत् [उपमानम्] [अभूत्] [तत्] करणम् [इदमीदृशीं दशाम्] ग

[library stamp]

क नु मां त्वदधीनजीवितां
विनिकीर्य्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो
जलसङ्घात इवासि विद्रुतः॥ ६॥

वस्थां [गतम्] भस्मीभूतमित्यर्थः। तथापि [न विदीर्य्ये] न विदीर्णा भवामि। कर्मकर्त्तरि लट् (१)। तथाहि, [स्त्रियः कठिनाः खलु] कठिनत्वादविदीर्यमाणत्वमित्यर्थः। कारणा-कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः। "धीरसञ्चारिणी दृष्टिर्गति र्गोवृषभाञ्चिता। स्मितपूर्वं तथालापो विलास" इति कीर्त्तितः॥ ५॥

क्वेति। हे प्रिय! [क्षतसेतुबन्धनः] भग्नसेतुबन्धः [जल-सङ्घातः] जलौघः [नलिनीमिव] जलैकायत्तजीवितामिति शेषः। [त्वदधीनजीविताम्] त्वदायत्तप्राणाम् [मां क नु वि-निकीर्य्य] कुत्र वा निक्षिप्य [क्षणभिन्नसौहृदः] क्षणात्यक्त-सौहार्दः सन् [विद्रुतः] पलायितोऽसि। सेतुसौहृदयोः स्थिति-हेतुत्वेन साम्यम्। सुहृदो भावः सौहृदम्। युवादित्वादण्-प्रत्ययः (२)। हृदयस्य हृल्लेखयदण्लासेष्विति (६,३,५०पा०) हृदादेशः अणि हृद्भावात् न हृद्भगसिन्ध्वन्ते पूर्वपदस्य च (७,३,१९पा०) इत्युभयपदवृद्धिः हृद्भूतस्याभिधाने तूभय-पदवृद्धिः स्यात् यथा सुहृदोभावः सौहार्दमिति तदेवाह वामनः सौहृददौर्हृदशब्दौ अनणि हृद्भावादिति॥ ६॥

---

(१) दृविदारणे इत्यस्य सकर्मकतया कर्मणः कर्त्तृत्वविवक्षायां तथात्वम्।
(२) हायनान्तयुवादिभ्योऽण् (५,१,१३० पा०) इत्यनेन भावार्थेऽण्।

कृतवानसि विप्रियं न मे
प्रतिकूलं न च ते मया कृतम् ।
किमकारणमेव दर्शनं
विलपन्त्यै रतये न दीयते ॥ ७ ॥
स्मरसि स्मर ! मेखलागुणै-
रुत गोत्रस्खलितेषु बन्धनम् ।
च्युतकेशरदूषितेक्षणा-
न्यवतंसोत्पलताड़नानि वा ॥ ८ ॥
हृदये वससीति मत्प्रियं

कृतवानिति । हे प्रिय ! त्वम् [मे] मम [विप्रियम्] अप्रिय [कृतवान् नासि] [मया च ते] तव [प्रतिकूलम्] अप्रियम् [कृतम्] [अकारणम्] निष्कारणमेव परस्परापकाररूपकार भावेऽपीत्यर्थः । क्रियाविशेषणमेतत् । [विलपन्त्यै] त्वद्दर्श र्थिन्यै अपीति भावः [रतये] [किम्] कथम् [दर्शनं न दीयते क्रियाग्रहणाच्चतुर्थी ॥ ७ ॥

विप्रियमाशङ्कते,—

स्मरसीति । हे [स्मर ! गोत्रस्खलितेषु] नामव्यत्यासे "गोत्रं नाम्नाचले कुले" इति विश्वः । [मेखलागुणैः ब स्मरस्युत ?] स्मरसि वा । "विकल्पे किं किमुत च" इत्यम [च्युतकेशरैः] भ्रष्टकिञ्जल्कैः [दूषिते ईक्षणे] येषु तानि [तंसोत्पलताड़नानि] सधूलिक्षेपताड़नानीत्यर्थः । [स्म वा अपकारस्मरणादिदमदर्शनमिति भावः ॥ ८ ॥

यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं
त्वमनङ्गः कथमक्षता रतिः॥ ९॥
परलोकनवप्रवासिनः
प्रतिपत्स्ये पदवीमहं तव।
विधिना जन एष वञ्चित-
स्त्वदधीनं खलु देहिनां सुखम्॥ १०॥

हृदय इति। [हृदये वससीति] स्मरवाक्यानुवादः। इत्येवंरूपम् [मत्प्रियं यदवोचः] उक्तवानसि। ब्रुवो लुङि वच उम् (७,४, २०पा०) इत्युमागतः [तत्कैतवमवैमि] मिथ्येति मन्ये [इदम्] वचनम् [उपचारपदम्] परस्य रञ्जनार्थं यदसत्यभाषणं स उपचारस्तस्य पदं स्थानं कैतवस्थानमिति यावत् [न चेत् त्वमनङ्गः] अशरीरः [कथं रतिः अक्षता] अविनष्टा। आश्रयनाशेऽप्याश्रितमविनष्टमिति विरोधादिति भावः॥९॥

न च मे किञ्चिद्विचारः किन्तु लोकः शोच्यत इत्याह,—

परलोकेति। [परलोकम्] प्रति [नवप्रवासिनः] अचिरप्रोषितस्य अनेन अनुगमनकालानतिपातः सूच्यते। [तव पदवीम्] मार्गम् [प्रतिपत्स्ये] त्वामनुगमिष्यामीत्यर्थः। अतो मे नास्ति विचार इति भावः। किन्तु [विधिना] दैवेन [एष जनः] लोकः [वञ्चितः] प्रतारितः [देहिनाम् सुखम् त्वदधीनम्] त्वयि अधीनं खलु। अधिशब्दस्य शौण्डादित्वात् सप्तमी शौण्डैरिति (२,१,४०पा०) समासः। अक्ष्युत्तरपदादिति

रजनीतिमिरावगुण्ठिते
पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय ! कामिनां प्रिया-
स्त्वदृते प्रापयितुं क ईश्वरः ॥ ११ ॥

नयनान्यरुणानि घूर्णयन्
वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः
प्रमदानामधुना विडम्बना ॥ १२ ॥

(५,४,७पा०) स्वप्रत्ययः । एवमन्यत्रापि । सुखप्रदाभावे कुतः सुखमिति भावः ॥ १० ॥

तदेवाह,—रजनीति । हे [प्रिय ! रजनीतिमिरेण] [अवगुण्ठिते] आवृते [पुरमार्गे घनशब्दविक्लवाः] गर्जितभीताः [प्रियाः] कामिनाम् वसतिम् प्रापयितुम् [त्वदृते] त्वां विना। अन्यारादितरर्त्ते इत्यादिना (२,३,२९पा०) पञ्चमी । [क ईश्वरः] शक्तः न कश्चिदित्यर्थः । न हि कामान्धानां भीतिरस्तीति भावः ॥ ११ ॥

नयनानीति । [अरुणानि । नयनानि घूर्णयन्] भ्रमयन् तथा [पदे पदे] प्रतिपदम् । वीप्सायां द्विरुक्तिः (१) [वचनानि स्खलयन्] विपर्य्यासयन् [प्रमदानाम् वारुणीमदः] मद्यमदः [अधुना त्वयि असति विडम्बना] अनुकृतिमात्रम्

(१) सर्वस्य द्वे (८,१,१ पा०) इत्यधिकृत्य नित्यवीप्सयोः (८,१,४ पा०) इति नित्ये च वीप्सायां द्वित्वम् । सर्वस्य सत्रतिपत्तव्यशब्दस्य द्वित्वमित्यर्थः ।

अवगम्य कथीकृतं वपुः
प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेऽपि गते निशाकर-
स्तनुतां दुःखमनङ्ग ! मोक्ष्यति ॥ १३ ॥

हरितारुणचारुबन्धनः
कलपुंस्कोकिलशब्दसूचितः ।
वद सम्प्रति कस्य बाणतां
नवचूतप्रसवो गमिष्यति ॥ १४ ॥

मदनाभावे मदस्य निष्फलत्वादिति भावः । तथा च शिशु-पालवधे "तं मदो दयितसङ्गमभूष" इति ॥ १२ ॥

अवगम्येति । हे [अनङ्ग !] अशरीर ! [प्रियबन्धोः] प्रिय-सखस्य । [तव वपुः] शरीरम् [कथीकृतम्] अकथा कथा सम्प-द्यमानं कृतं शब्दमात्रविशिष्टम् [अवगम्य] ज्ञात्वा [निष्फलो-दयः] उद्दीप्याभावात् उद्दीपनवैफल्यमिति भावः । [निशा-करः] चन्द्रः [बहुले] कृष्णपक्षे [गतेऽपि तनुताम्] कार्श्यम् [दुःखम्] यथा तथा कृच्छ्रात् [मोक्ष्यति] वृथा वृद्धिरिति दुःखायिष्यत इत्यर्थः ॥ १३ ॥

हरितेति । हरितश्च अरुणश्च । वर्णोवर्णेनेति (२, १, ६८ पा०) तत्पुरुषः । [हरितारुणम् चारु बन्धनम्] वृन्तं पुष्पस्य यस्य स तथोक्तः [कलेन] मधुरेण [पुंस्कोकिलशब्देन] पुरुषकोकिलनादेन [सूचितः] अनुमापितः चूतवर्णकार्य्य-त्वात्कलशब्दस्येति भावः । [नवचूतप्रसवः] नवचूतकुसुमम्

अलिपङ्क्तिरनेकशस्त्वया
गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं
गुरुशोकामनुरोदितीव माम् ॥ १५ ॥

प्रतिपद्य मनोहरं वपुः
पुनरप्यादिश तावदुत्थितः ।
रतिदूतिपदेषु कोकिलां
मधुरालापनिसर्गपण्डिताम् ॥ १६ ॥

[सम्प्रति कस्य बाणताम्] शरत्वम् [गमिष्यति वद ।]
अन्यस्य पुष्पबाणस्याभावादिति भावः ॥ १४ ॥

अलीति । [त्वया अनेकशः] बहुशः [धनुषः] कार्मुकस्य [गुणकृत्ये] मौर्वीकार्य्ये गुणवत्कर्मणि च [नियोजिता] अधिकृता [इयम् अलिपङ्क्तिः करुणस्वनैः] दीनस्वनैः [विरुतैः] कूजितैः [गुरुशोकाम्] दुर्भरदुःखाम् । "गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे" इति शब्दार्णवः । [माम् अनुरोदितीव ।] उपसर्गात्सकर्मकत्वम् । रुदादिभ्यः सार्वधातुके (७ २, ७६ पा०) इति इडागमः ॥ १५ ॥

प्रतिपद्येति । [तावत्] पुनरपि [मनोहरम् वपुः] शरीरम् [प्रतिपद्य] प्राप्य [उत्थितः] सन् [मधुरालापेषु] प्रियोक्तिषु [निसर्गपण्डिताम्] स्वभावप्रगल्भाम् [कोकिलाम् रतिदूतिपदेषु] सुरतदूतीस्थानेषु [आदिश] आज्ञापय प्रागात्मनैव दौत्याधिकार इति भावः । जीवन्नप्यादि कुर्व

शिरसा प्रणिपत्य याचिता-
न्युपगूढानि सवेपथूनि च ।
सुरतानि च तानि ते रहः
स्मर ! संस्मृत्य न शान्तिरस्ति मे ॥ १७ ॥

रचितं रतिपण्डित ! त्वया
स्वयमङ्गेषु ममेदमार्त्तवम् ।
ध्रियते कुसुमप्रसाधनं
तव तच्चारु वपुर्न दृश्यते ॥ १८ ॥

शब्दस्य छन्दोभङ्गभयाद्गुरुत्वः । "अपि माषं मषं कुर्याच्छन्दो-
भङ्गं त्यजेद्गिरम्" इति कोशात् । उणादयो बहुलग्रहणात्
ह्रस्व इति वल्लभः ॥ १६ ॥

शिरसेति । हे [स्मर !] [शिरसा प्रणिपत्य याचितानि
सवेपथूनि] सकम्पानि । द्वितोऽथुच् (३,३,८९ पा०) इति
अथुच्प्रत्ययः । सात्त्विकभावोपलक्षणमेतत् । "स्तम्भप्रलय-
रोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रुवैस्वर्य्यमित्यष्टौ सात्त्विकाः
परिकीर्त्तिता" इति । [उपगूढानि] आलिङ्गनानि च ।
नपुंसके भावे क्तः । [तानि] अनुभूतप्रकाराणि [रहः]
एकान्ते [सुरतानि च संस्मृत्य मे शान्तिर्नास्ति ।] अत्र समा-
नकर्तृकत्वं दुर्घटं समानक्रियापेक्षास्तीति केचित् ॥ १७ ॥

रचितमिति । हे [रतिपण्डित !] रतिकुशल ! [त्वया
मम अङ्गेषु] अवयवेषु [स्वयम् रचितम्] ऋतुरस्य प्राप्तः
[आर्त्तवम्] वासन्तम् । ऋतोरण् (५,१,१०५ पा०) इत्यण्-

विबुधैरपि यस्य दारुणै-
रसमाप्ते परिकर्मणि स्मृतः।
तमिमं कुरु दक्षिणेतरं
चरणं निर्मितरागमेहि मे ॥ १९ ॥

अहमेत्य पतङ्गवर्त्मना
पुनरङ्काश्रयिणी भवामि ते।
चतुरैः सुरकामिनीजनैः
प्रिय! यावन्न विलोभ्यसे दिवि ॥ २० ॥

प्रत्ययः। [कुसुमप्रसाधनम्] पुष्पाभरणम् [इदम् ध्रियते] अ
तिष्ठते। धृञ् अवस्थान इति धातोस्तौदादिकात्कर्त्त
लट्। [तव] [तत्] प्रसाधकम् [चारु] सुन्दरम् [वपुस्तु]
दृश्यते] ॥ १८ ॥

विबुधैरिति। [दारुणैः] क्रूरैः प्राणान्तिके कर्मणि नि
गादिति भावः। [विबुधैः] देवैः अनभिज्ञत्वञ्च ध्वन्य
[यस्य] मच्चरणस्य [परिकर्मणि] प्रसाधने। "परिकर्म प्र
धनम्" इत्यमरः। [असमाप्ते] सति [स्मृतोऽसि] [तमि
दक्षिणेतरम्] वामम् [मे चरणम् निर्मितरागम्] रचित
त्तारागम् [कुरु] [एहि] आगच्छ ॥ १९ ॥

अहमिति। [अहम् पतङ्गवर्त्मना] शलभमार्गेण अ
प्रवेशेनेत्यर्थः। "पतङ्गः शलभे चाग्नौ मार्ज्जारेऽर्के शरे ख
इति वैजयन्ती। [एत्य] आगत्य [पुनस्ते अङ्काश्रयिणी] उत्
वर्त्तिनी [भवामि] सम्प्रत्येव भविष्यामि। वर्त्तमानसा

मदनेन विनाकृता रतिः
क्षणमात्रं किल जीवितेति मे ।
वचनीयमिदं व्यवस्थितं
रमण ! त्वामनुयामि यद्यपि ॥२१॥

क्रियतां कथमन्त्यमण्डनं
परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्यतर्किता
गतिमङ्गेन च जीवितेन च ॥ २२ ॥

र्त्तमानवद्वेति (३,३,१३१ पा०) लट् । हे [प्रिय ! दिवि] स्वर्गे [चतुरैः सुरकामिनीजनैः] अप्सरोगणैः [यावन्न विलोभ्यसे] विलोभयिष्यसे । यावत्पुरानिपातयोर्लट् (३, ३, ४ पा०) इति लट् ॥ २० ॥

मदनेनेति । हे [रमण ! त्वाम् अनुयामि यद्यपि] अनुयामिष्याम्येव । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति (३, ३, १३१ पा०) लट् । यद्यपीत्यवधारणे इति केशवः । किन्तु रतिः मदनेन विनाकृता] वियोजिता सतीत्यर्थः । सुप्सुपेति समासः । [क्षणमात्रं जीविता किल] इति [इदम्] वचनीयम्] निन्दा [मे] मम [व्यवस्थितम्] स्थिरमभूत् ॥२१॥

क्रियतामिति । [परलोके अन्तरितस्य] व्यवहितस्य मृतस्येत्यर्थः । [ते] तव [मया अन्त्यमण्डनं कथम् ?] केन प्रकारेण ? [क्रियताम् ।] क्रियतामित्यत्र कामचारे लोट् । दग्धस्य ते यथेच्छमण्डनमपि न सम्भवतीत्यर्थः । कुतः

ऋजुतां नयतः स्मरामि ते
शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां
नयनोपान्तविलोकितञ्च यत् ॥ २३ ॥

क्व नु ते हृदयङ्गमः सखा
कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना
गमितः सोऽपि सुहृद्गतां गतिम् ॥ २४ ॥

[अङ्गेन च जीवितेन च समम्] सहैव [अतर्किताम्] अविचारिताम् [गतिं गतोऽसि ।] इह मृतशरीरमपि नास्ति कस्य मण्डनमिति भावः ॥ २२ ॥

ऋजुतामिति । [शरम् ऋजुताम्] आर्ज्जवम् [नयतः] [उत्सङ्गे निषण्णम्] अङ्कगतं धनुर्यस्य तस्य । धनुषश्च (५, ४, १३२ पा॰) इत्यनङादेशः [ते] तव [मधुना] वसन्तेन [सह] "मधुर्दैत्ये वसन्ते च चैत्रे चेति" विश्वः । [सस्मितां कथाम्] आलापं तथा [यन्नयनोपान्तविलोकितम्] अपाङ्गवीक्षणं इत्यनुषङ्गः । तच्च [स्मरामि] ॥ २३ ॥

क्व ? न्विति । हृदयं गच्छतीति [हृदयङ्गमः] हृद्यः । खच् प्रकरणे गमेः सुप्युपसंख्यानमिति (३,२,३८पा॰वा॰) खच् प्रत्ययः । अरुर्द्विषदजन्तस्य मुम् (६,३,६७पा॰) इति मुमागमः । [ते] तव [सखा कुसुमैरायोजितम्] आरचितम् [कार्मुकम्] येन कार्मुकनिर्माता [मधु] वसन्तः, [क्व ? नु] वा

अथ तैः परिदेविताक्षरै-
र्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां
मधुरात्मानमदर्शयत् पुरः ॥ २५ ॥

तमवेक्ष्य रुरोद सा भृशं
स्तनसम्बाधमुरो जघान च ।
स्वजनस्य हि दुःखमग्रतो
विवृतद्वारमिवोपजायते ॥ २६ ॥

इति शेषः । अथ वा [सोऽपि उग्ररुषा] तीव्रकोपेण [पिना-किना] ईश्वरेण [सुहृदा] मदनेन [गताम्] प्राप्ताम् [गतिम्] भस्मतामित्यर्थः । [न गमितः खलु] न प्रापितः किम् ? । "जिज्ञासानुनये खलु" इत्यमरः ॥ २४ ॥

अथेति । [अथ तैः परिदेविताक्षरैः] विलापवचनैः [हृदये दिग्धशरैः] विषलिप्तमुखशरैः [इवाहतः] सन् । "विषाक्ते दिग्ध लिप्तकौ" इत्यमरः । [मधुः] वसन्तः [आतुराम्] आपन्नाम् [रतिम् अभ्युपपत्तुम्] अनुग्रहीतुम् आश्वासयितुमित्यर्थः । "अभ्युपपत्तिरनुग्रहः" इत्यमरः । [आत्मानं पुरः अदर्शयत्] आविरभूदित्यर्थः ॥ २५ ॥

तमिति । [सा] रतिः [तम्] मधुम् [अवेक्ष्य] दृष्ट्वा [भृशं रुरोद] स्तनौ सम्बाध्य [स्तनसम्बाधम् ।] परिक्लिश्यमाने चेति (३,४,५५पा०) (१) णमुल् । [उरो जघान] ताडितवती

---

(१) सर्वतः पीड्यमाने चार्थे द्वितीयान्ते उपपदे णमुल् स्यात् ।

इति चैनमुवाच दुःखिता
सुहृदः पश्य वसन्त! किं स्थितम्।
तदिदं कणशो विकीर्य्यते
पवनैर्भस्म कपोतकर्वुरम्॥ २७॥

अयि सम्प्रति देहि दर्शनं
स्मर! पर्य्युत्सुक एष माधवः।
दयितास्वनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने॥ २८॥

[च]। तथाहि [स्वजनस्य अग्रतः दुःखं विवृतम्] अपसारितम् [द्वारम्] कपाटं यस्य तदिव [उपजायते] आविर्भवति उच्छृङ्खलं प्रवर्त्तत इत्युत्प्रेक्षाभिप्रायः॥ २६॥

इतीति। दुःखमस्याः सञ्जातम् [दुःखिता] सञ्जातदुःखेत्यर्थः। (५,२,३६पा०) तारकादित्वादितच्। सा रतिः [एनम्] वसन्तम् [इत्युवाच च।] चकारः पूर्वोक्तसमुच्चयार्थः। हे [वसन्त! पश्य] [सुहृदः] त्वत्सखस्य [किं स्थितम्] किमुपस्थितम् [तदिदं कपोतकर्बुरम्] पारावतशवलम् [कणशः] चूर्णीभूतम् (५,४,४२पा०) अल्पार्थाच्छस्प्रत्ययः। [भस्म पवनैः] विकीर्य्यति, पश्य भस्मीभूतस्ते सुहृदित्यर्थः॥ २७॥

अयीति। [अयि स्मर!] [सम्प्रति दर्शनं देहि एष माधवः] वसन्तः [पर्य्युत्सुकः] त्वद्दर्शनोत्कण्ठितः। त्वामप्यनादृतवतोऽस्य को माधव इत्याशङ्क्याह। [नृणाम्] पुरुषाणाम् [दयितासु प्रेम

अमुना ननु पार्श्ववर्त्तिना
जगदाज्ञां ससुरासुरं तव ।
विसतन्तुगुणस्य कारितं
धनुषः पेलवपुष्पपत्रिणः ॥ २९ ॥
गत एव न ते निवर्त्तते
स सखा दीप इवानिलाहतः ।
अहमस्य दशेव पश्य मा-
मविषह्यव्यसनेन धूमिताम ॥ ३० ॥

अनवस्थितम्] अस्थिरं चलमित्यर्थः । [सुहृज्जने प्रेम तु न चलं खलु] ॥ २८ ॥

ईदृशाः सुहृदः कति न सन्तीत्याशङ्का न कोऽपीत्याह,—

अमुनेति । [ननु] मदन ! [पार्श्ववर्त्तिना] सहचरेण [अमुना] वसन्तेन [ससुरासुरम्] सुरासुरसहितम् [जगत्] [विसतन्तुगुणस्य] मृणालसूत्रमौर्वीकस्य [पेलवानि] कोमलानि [पुष्पाणि] एव [पत्रिणः] वाणा यस्य तस्य [तव धनुषः आज्ञां कारितम्] जगताज्ञा कारितेत्यर्थः । हृक्रोरन्यतरस्यामिति (१,४,५३पा०) जगतः कर्मत्वम् ॥ २९ ॥

गत इति । [स ते सखा अनिलाहतः] वायुताडितः [दीप इव गत एव न निवर्त्तते] [अहमस्य] दीपायमानस्य [दशा] वर्त्तिः [इव] तिष्ठामीति शेषः । "दशा वर्त्ताववस्थायां वस्त्रान्ते स्युर्दशा अपि" इति विश्वः । कुतः [अविसह्यव्यसनेन] सोढुमशक्यदुःखप्रकर्षेण [धूमिताम्] सञ्जातधूमाम् [मां पश्य]

विधिना कृतमर्द्धवैशसं
ननु मां कामवधे विमुञ्चता ।
अनपायिनि संश्रयद्रुमे
गजभग्ने पतनाय वल्लरी ॥ ३१ ॥
तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।

धूमवत्त्वान्नष्टदीपदशासाम्यं धूमस्य व्यसनमेवेत्यर्थः ॥ ३० ॥

विधिनेति [ननु] वसन्त ! [कामवधे] मदनवधे [मां विमुञ्चता] वर्जयता अमारयतेत्यर्थः । [विधिना] दैवेन वि सति छिनत्तीति विशसो घातुकः पचाद्यच् । विशसस्य क वैशसम् (५,१,१३०पा०) युवादित्वादण्प्रत्ययः । [अर्द्धवैशसं अर्द्धवधः [कृतम्] "अर्द्धो वा एष आत्मनो यत् पत्नी" इ श्रुतेः । पत्युःस्वस्य च आश्रयाश्रयिभूतयोरेकपदार्थत्वाभिप्र येणार्द्धोक्तिः । तथा च एकदेशवधे देशान्तरस्यापि बधनि अनाथामपि विधिरघ्नन्नेव हतवानिति तात्पर्य्यम् । एतदे मपादयति [अनपायिनि] अनपायित्वेन विश्वस्ते [संश्रयद्रु आश्रयवृक्षे [गजभग्ने] सति [वल्लरी] लता [पतनाय] भ तीति शेषः । पतितुमेव सालमित्यर्थः । तुमर्थाच्च भाववच दिति (२,३,१५पा०) चतुर्थी ॥ ३१ ॥

सम्प्रति अनन्तरकर्त्तव्यं प्रार्थयते,—

तदिति । [तत्] तस्मात्कारणादुक्तप्रकारेण अन्यथ मरणस्यावश्यम्भावादित्यर्थः । [अनन्तरं भवता इदम्] व

विधुरां ज्वलनातिसर्ज्जना-
न्ननु मां प्रापय पत्युरन्तिकम् ॥ ३२ ॥
शशिना सह याति कौमुदी
सह मेघेन तड़ित् प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि ॥ ३३ ॥
अमुनैव कषायितस्तनी

ानम् [बन्धुजनप्रयोजनम्] बन्धुकृत्यम् [क्रियताम् ।] प्रार्थ-
नायां लोट् । तदेवोपदिशति [ननु] वतन्त ! [विधुराम्]
विवशाम् [मां ज्वलनातिसर्ज्जनात्] अग्निदानात् [पत्युर-
न्तिकं प्रापय] अग्निप्रवेशनं कारयेत्यर्थः ॥ ३२ ॥

कर्त्तव्यव्यवायमर्थः स्त्रीणामित्याह,—

शशिनेति । [कौमुदी] चन्द्रिका [शशिना सह याति]
शशिनि अस्तमिते स्वयं नश्यतीत्यर्थः । [तड़ित्] सौदामनी
मेघेन सह प्रलीयते] प्रणश्यति । कर्त्तरि लट् । [प्रमदाः]
स्त्रियः पतिवर्त्म गच्छन्तीति [पतिवर्त्मगाः] पतिमार्गानुगा-
मिन्यः [इति] एतत् [विचेतनैः] अल्पचेतनैरविवेकिभिरपी-
त्यर्थः । [प्रतिपन्नम्] ज्ञातम् अलवणा यवागूः अनुदरा क-
न्येतिवत् अल्पत्वाभिप्रायेण विचेतनैरपीति निर्द्देशः । नाथस्तु
पृथग्जनैरिति पपाठ । पतिवर्त्मगा इत्यत्र स्मृतिः । "आ-
र्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या
पत्यौ सा स्त्री ज्ञेया पतिव्रता" इति ॥ ३३ ॥

अमुनैवेति । [अमुना] पुरोवर्त्तिना [सुभगेन] शोभनेन

सुभगेन प्रियगात्रभस्मना ।
नवपल्लवसंस्तरे यथा
रचयिष्यामि तनुं विभावसौ ॥ ३४ ॥
कुसुमास्तरणे सहायतां
बहुशः सौम्य ! गतस्त्वमावयोः ।
कुरु सम्प्रति तावदाशु मे
प्रणिपाताञ्जलियाचितश्चिताम् ॥ ३५ ॥
तदनु ज्वलनं मदर्पितं
त्वरयेर्दक्षिणवातवीजनैः ।

[प्रियगात्रभस्मनैव] एवकारो मण्डनान्तरनिवृत्त्यर्थः । [कष
यितस्तनी] रञ्जितस्तनी । रागे क्वाथे कषायोऽस्त्री निर्या
सौरभे रसे" इति वैजयन्ती । [नवपल्लवसंस्तरे यथा] नवप
वतल्प इव [विभावसौ] वह्नौ [तनुम्] शरीरम् [रचयिष्यामि
निधास्यामीत्यर्थः ॥ ३४ ॥

कुसुमेति । हे [सौम्य !] साधो ! [त्वम् आवयोः] द
पत्नीकयोः [बहुशः] बहुवारम् [कुसुमास्तरणे] पुष्पश
[सहायतां गतः ।] [सम्प्रति प्रणिपाताञ्जलिना याचि
अञ्जलिपूर्वकं प्रार्थितः सन्नित्यर्थः । [आशु मे चित
काष्ठचयम् [कुरु] कुरुष्व । यथेह तथामुत्रोपकर्तव्यं मि
णेत्यर्थः ॥ ३५ ॥

तदिति । [तत्] चिताकरणम् [अनु] अनन्तरं मय्य
तम् [मदर्पितं ज्वलनम्] अग्निम् [दक्षिणवातवीजनैः] म

विदितं खलु ते यथा स्मरः
क्षणमप्युत्सहते न मां विना ॥ ३६ ॥

इति चापि विधाय दीयतां
सलिलस्याञ्जलिरेक एव नौ ।
अविभज्य परत्र तं मया
सहितः पास्यति ते स बान्धवः ॥ ३७ ॥

परलोकविधौ च माधव !
स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः
प्रियचूतप्रसवो हि ते सखा ॥ ३८ ॥

मारुतसञ्चालनैः [त्वरयेः] त्वरितं ज्वलयेत्यर्थः । त्वराहेतुमाह,—[ते] तव [विदितम् खलु] मतिबुद्धिपूजार्थेभ्यश्चेति (३,२,१८८पा०) वर्त्तमाने क्तः । तद्योगात् कर्त्तरि षष्ठी । [यथा] येन प्रकारेण [स्मरः मां विना क्षणमपि नोत्सहते] न हृष्यति तथा त्वया ज्ञातमेवेत्यर्थः ॥ ३६ ॥

इतीति । [अपि च] [इति] एवम् [विधाय] कृत्वा [नौ] आवाभ्याम् [एक एव सलिलस्याञ्जलिर्दीयताम्] । तम् [अञ्जलिम्] [स ते बान्धवः] सखा स्मरः [परत्र परलोके] [मया सहितोऽविभज्य पास्यति] ॥ ३७ ॥

परलोकेति । किञ्च हे [माधव !] वसन्त ! [परलोकविधौ] पिण्डोदकादिकर्मणि [स्मरमुद्दिश्य विलोलाः पल्लवाः]

इति देहविमुक्तये स्थितां
रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां
प्रथमा वृष्टिरिवान्वकम्पयत् ॥ ३९ ॥

कुसुमायुधपत्नि ! दुर्लभ-
स्तव भर्ता न चिराद्भविष्यति ।
शृणु येन स कर्मणा गतः
शलभत्वं हरलोचनार्चिषि ॥ ४० ॥

यासु ताः [सहकारमञ्जरीः] चूतवल्लरीः [निवपेः देहि [हि
यस्मात्कारणात् [ते सखा] स्मरः [प्रियाः चूतप्रसवाः] यस्य स
तथोक्तः ॥ ३८ ॥

इतीति । [इति देहस्य विमुक्तये] शरीरस्य विसर्गाय
[स्थिताम्] कृतनिश्चयामिति यावत् [रतिम्] आकाशभवा
[सरस्वती] अशरीरा वाक् [ह्रदशोषविक्लवाम्] ह्रदस्य जला
धारस्य शोषेण विक्लवाम् [शफरीम्] प्रोष्ठीम् । "प्रोष्ठी त
शफरी द्वयोः" इत्यमरः । [प्रथमा वृष्टिः] वर्षम् [इव] अन्व
कम्पयत्] अनुकम्पितवती सदयमुवाचेत्यर्थः "कृपा दयानु
कम्पा स्यात्" इत्यमरः ॥ ३९ ॥

कुसुमेति । हे [कुसुमायुधपत्नि !] रते ! [तव भर्त्ता] [चि
रात्] चिरम् [दुर्लभो न भविष्यति] किन्त्वचिरमेव सुलभ
भविष्यति इत्यर्थः । किञ्च,[शृणु] तत्कर्मेति शेषः [येन कर्मण
[सः] ते भर्त्ता [हरलोचनस्यार्चिः] ज्वाला । "ज्वाला भा

अभिलाषमुदीरितेन्द्रियः
स्वसुतायामकरोत् प्रजापतिः ।
अथ तेन निगृह्य विक्रिया-
मभिशप्तः फलमेतदन्वभूत् ॥ ४१ ॥

परिणेष्यति पार्वतीं यदा
तपसा तत्प्रवणीकृतो हरः ।
उपलब्धसुखस्तदा स्मरं
वपुषा स्वेन नियोजयिष्यति ॥ ४२ ॥

इति चाह स धर्मयाचितः
स्मरशापावधिदां सरस्वतीम् ।

नपुंस्यर्चिः” इत्यमरः तस्मिन् । [शलभत्वम्] पतङ्गत्वम् [गतः] । “समौ पतङ्गशलभौ” इत्यमरः ॥ ४० ॥

तदेव कर्मोपाचष्टे,—

अभिलाषमिति । [उदीरितेन्द्रियः] प्रेरितेन्द्रियः स्मरेणेति- शेषः । [प्रजापतिः] ब्रह्मा [स्वसुतायाम्] सरस्वत्याम् [अभि- लाषम्] अनुरागम् [अकरोत्] । [अथ तेन] प्रजापतिना [विक्रियाम्] इन्द्रियविकारम् [निगृह्य] निरुध्य [अभिशप्तः] सन् [एतत् फलम्] दाहात्मकं स्वकर्मफलम् [अन्वभूत्] ॥४१॥

शापावधिरपि तेनैवोक्त इत्याह श्लोकद्वयेन,—

परिणेष्यतीत्यादिना । [धर्मेण] धर्माख्यप्रजापतिना [याचितः] प्रार्थितः [सः] भगवान् ब्रह्मा, [तपसा] कारणेन [तस्याम्] पार्वत्याम् [प्रवणीकृतः] अभिमुखीकृतः [हरः] शिवः

अग्नेरमृतस्य चोभयो-
र्वशिनश्चाम्बुधराश्च योनयः ॥४३॥ युग्मकम्।

तदिदं परिरक्ष शोभने !
भवितव्यप्रियसङ्गमं वपुः।
रविपीतजला तपात्यये
पुनरोघेन हि युज्यते नदी ॥ ४४ ॥

इत्थं रतेः किमपि भूतमदृश्यरूपं
मन्दीचकार मरणव्यवसायबुद्धिम्।

[यदा पार्वतीम् परिणेष्यति] उद्वक्ष्यति [तदा उपलब्धसुखः] प्राप्तानन्दः सन् [स्मरम्] कामम् [स्वेन वपुषा नियोजयिष्यति] सङ्गमयिष्यति,— [इति] एवम् [स्मरशापस्यावधिदाम्] अवसानदायिनीम् [सरस्वतीम्] वाचञ्च [आह] एवं शापावधिमप्युक्तवानित्यर्थः। ननु तथा क्रुद्धस्य कथमीदृशी शान्तिरत आह,—[वशिनः] जितेन्द्रियाश्च [अम्बुधराश्च] [अग्नेरमृतस्य च] इति [उभयोर्योनयः] प्रभवाः। वशिपक्षे अग्न्यमृतशब्दौ कोपप्रसादपरौ अन्यत्र वैद्युताम्बुदकपरौ युग्मकम् ॥४२॥४

तदिति। हे [शोभने!] [तत्] तस्मात् कारणात् [भवितव्यः] भविष्यन् [प्रियसङ्गमः] यस्य तथोक्तम् [इदम् वपुः परिरक्ष।] तथाहि [रविपीतजला नदी] [तपात्यये] प्रावृषि "प्रावृट् तपात्यय" इति हलायुधः। [पुनरोघेन] प्रवाहे [युज्यते] सङ्गच्छते [हि] ॥ ४४ ॥

इत्थमिति। [इत्थम्] अनेन प्रकारेण [अदृश्यरूपम् किम

तत्प्रत्ययाच्च कुसुमायुधबन्धुरेना-
माश्वासयत् सुचरितार्थपदैर्वचोभिः ॥४५॥
अथ मदनवधूरुपप्लवान्तं
व्यसनकृशा परिपालयाम्बभूव ।
शशिन इव दिवातनस्य लेखा
किरणपरिक्षयधूसरा प्रदोषम् ॥ ४६ ॥

भूतम्] कश्चित्प्राणी। "युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरः। [रतेः] मदनदाराणाम् [मरणव्यवसायबुद्धिम्] मरणोद्योगबुद्धिम् [मन्दीचकार] निवारयामासेत्यर्थः। "मूढाल्पापटुनिर्भाग्यामन्दा" इत्यमरः। अथ [कुसुमायुधबन्धुः] वसन्तश्च [तत्प्रत्ययात्] तस्मिन् भूते विश्वासात्। "प्रत्ययोऽधीनशपथज्ञानविश्वास हेतुषु" इत्यमरः। [एनाम्] रतिम् [सुष्ठु चरितार्थानि पदानि येषां तैः [वचोभिः] वाक्यैः [आश्वासयत्।] सर्वथा ते देवताप्रसादात् प्रियसङ्गमो भविष्यतीत्यादिवचनैः अस्याः दुःखमपाचकारेत्यर्थः ॥ ४५ ॥

अथेति। [अथ] अनन्तरम् [व्यसनेन] दुःखेन [कृशा मदनवधूः] रतिः [उपप्लवान्तम्] विपदवधिं [किरणपरिक्षयेण धूसरा] मलिना [दिवातनस्य] दिनभवस्य। सायञ्चिरमित्यादिना (४,३,२३पा०) ट्युप्रत्ययः। [शशिनः] चन्द्रस्य [लेखा] [प्रदोषम्।] रात्रिमिव [परिपालयाम्बभूव] प्रतीक्षाञ्चक्रे। पुष्पिताग्रावृत्तम् "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" इति लक्षणात् ॥ ४६ ॥

इति श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये
रतिविलापो नाम चतुर्थः सर्गः ॥ ४॥

पञ्चमः सर्गः ।

—००—

तथा समक्षं दहता मनोभवं
पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनी-
समाख्यायां चतुर्थः सर्गः॥ ४ ॥

तथेति। पर्वतस्यापत्यं स्त्री [पार्वती तथा] तेन प्रकारेण अक्ष्णः समीपे [समक्षम्] पुरतः। अव्ययं विभक्तिसमीपसमृद्धी-त्यादिना (२,१,६पा०) अव्ययीभावः। [मनोभवम्] मन्मथम् [दहता] भस्मीकुर्वता [पिनाकिना] ईश्वरेण [भग्नः] खण्डितः [मनोरथः] अभिलाषो यस्याः सा तथोक्ता सती [हृदयेन] मनसा [रूपम्] सौन्दर्यम् [निनिन्द] धिक् मे रूपं, यत् हरमनोहरणाय नालम् इति गर्हितवतीत्यर्थः। युक्तञ्चैतदि

इयेष सा कर्तुमवन्ध्यरूपतां
समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं
तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥

त्याह,—तथा हि, [चारुता] सौन्दर्य्यम् [प्रियेषु] पतिषु वि-
षये [सौभाग्यम्] प्रियवाल्लभ्यम् [फलम्] यस्याः सा तथोक्ता।
सौन्दर्य्यस्य तदेव फलं, यद्भर्तृसौभाग्यं लभ्यते; नो चेत् वि-
फलं तत् इति भावः । अस्मिन् सर्गे वंशस्थं वृत्तम् । "जतौ
तु वंशस्थमुदीरितं जरौ" इति लक्षणात् ॥ १ ॥

इयेषेति । [सा] पार्वती [समाधिम्] एकाग्रताम् [आ-
स्थाय] अवलम्ब्य [तपोभिः] वक्ष्यमाणनियमैः करणभूतैः
[आत्मनः] स्वस्य [अवन्ध्यरूपताम्] सफलसौन्दर्य्यम् [कर्तुम्
इयेष] इच्छति स्म, तपसा शिवं वशीकर्तुमुद्युक्तेत्यर्थः । [अ-
न्यथा] ततोऽन्यप्रकारेण [कथं ? वा] तत् [द्वयमवाप्यते ।]
किं ? तद्द्वयम् तथाभूता विधा प्रकारो यस्य तत् [तथाविधं
प्रेम] स्नेहः, येनार्द्धाङ्गहरा हरस्य भवेदिति भावः । [तादृशः
पतिश्च] यो मृत्युञ्जय इति भावः । द्वयमेव खलु स्त्रीणाम-
पेक्षितं, यद्भर्तृवाल्लभ्यं जीवद्भर्तृकत्वञ्चेति, तच्च तपश्चर्य्यैक-
साध्यमिति निश्चिकायेत्यर्थः । अत्र मनुः,—"यद्दुस्तरं यद्दु-
रापं यद्दुर्गं यच्च दुस्तरम् । तत् सर्वं तपसा प्राप्यं तपो हि
दुरतिक्रमम्" इति (अ० ११ श्लो० १३८) ॥ २ ॥

निशम्य चैनां तपसे कृतोद्यमां
सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा
निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥
मनीषिताः सन्ति गृहेषु देवता-
स्तपः क्व वत्से ! क्व च तावकं वपुः ।

निशम्येति । [मेना] मेनका [च] [गिरीशप्रतिसक्तमानसाम्] हरासक्तचित्ताम् [तपसे] तपश्चरणाय [कृतोद्यमाम्] कृतोद्योगाम् [सुतां निशम्य] श्रुत्वा [एनाम्] पार्वतीम् [वक्षसा परिरभ्य] आलिङ्ग्य [महतो मुनिव्रतात्] तपसः [निवारयन्ती उवाच]। मुनिव्रतादित्यत्र यद्यपि मुनिव्रतस्य मेनकाया अनीप्सितत्वात्, वारणार्थानामीप्सितः (१,४,२७ पा०) इति नापादानत्वं, तथापि कृतोद्यमामिति मानस-प्रवेशोक्तत्वात् ध्रुवमपायेऽपादानमिति (१,४,२४पा०) अपादानत्वमेव स्यात्; यथाह भाष्यकारः,—"यच्च मिथ्या सम्प्रा निवर्त्तते तच्च ध्रुवमपायेऽपादानमिति प्रसिद्धम्" ॥ ३ ॥

सामान्यनिषेधमुक्त्वा विशेषनिषेधमाह,—

मनीषिता । इति [हे वत्से !] मनस ईषिताः इष्टाः [मनीषिताः ।] शकन्ध्वादित्वात्साधुः । [देवताः] शच्यादयः [गृहेषु सन्ति] त्वं ता आराधयेति शेषः । [तपः क्व] तव इद [तावकम् ।] युष्मदस्मदोरन्यतरस्याम् खञ् च (४,३,१,पा०) इत्यण्प्रत्ययः तवकममकावेकवचने इति (४,३,३,पा०) त

पदं सहेत भ्रमरस्य पेलवं
शिरीषपुष्पं न पुनः पतत्त्रिणः॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुतां
शशाक मेना न नियन्तुमुद्यमात्।
क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥ ५ ॥
कदाचिदासन्नसखीमुखेन सा
मनोरथज्ञं पितरं मनस्विनी।

ादेशः। [वपुश्च ते] तथाहि [पेलवम्] मृदुलम् [शिरीष-
ष्पं भ्रमरस्य] भृङ्गस्य [पदम्] पदस्थितिम् [सहेत।] [प-
त्त्रिणः पुनः] पक्षिणस्तु [पदं न सहेत] अतिसौकुमार्याद्धि-
ोपभोगयोग्यं ते वपुर्न दारुणतपःक्षममित्यर्थः। अत्र
ष्टान्तालङ्कारः॥ ४ ॥

इतीति। [इति] एवम् [अनुशासती] उपदिशन्ती [मेना
ध्रुवेच्छाम्] स्थिरव्यवसायाम् [सुताम्] पार्वतीम् [उद्यमात्]
द्योगात्तपोलक्षणात् [नियन्तुम्] निवारयितुम् [न शशाक]
मर्था नाभूत्। तथाहि [ईप्सितार्थे] इष्टार्थे [स्थिरनिश्चयं
नः निम्नाभिमुखं पयश्च कः प्रतीपयेत्] प्रतीकूलयेत् प्रति-
नवर्त्तयेदित्यर्थः। निम्नप्रवणं पय इव इष्टार्थाभिनिविष्टं
नो दुर्वारमिति भावः। अत्र दीपकानुप्राणितोऽर्थान्तर-
ासालङ्कारः॥ ५ ॥

कदाचिदिति। अथ [कदाचित् मनस्विनी] स्थिरचित्ता

अयाचतारण्यनिवासमात्मनः
फलोदयान्ताय तपःसमाधये ॥ ६ ॥

अथानुरूपाभिनिवेशतोषिणा
कृताभ्यनुज्ञा गुरुणा गरीयसा ।
प्रजासु पश्चात् प्रथितं तदाख्यया
जगाम गौरी शिखरं शिखण्डिमत् ॥ ७ ॥

[सा] पार्वती [मनोरथज्ञम्] अभिलाषाभिज्ञम् [पितरम्] हिमवन्तम् [आसन्नसखी] आसन्नसखी सैव [मुखम्] उपायः । "मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि" इति विश्वः । तेन [फलोदयः] फलोत्पत्तिः [अन्तः] अवधिर्यस्य तस्मै [तपःसमाधये] तपोनियमार्थम् [आत्मनः] स्वस्य [अरण्यनिवासम्] वनवासम् [अयाचत] दुह्याचित्यादिना (१) (१,४,५१पा० सू० भा०) द्विकर्मकत्वम् ॥ ६ ॥

अथेति । [अथ गौरी] [अनुरूपेण] योग्येन [अभिनिवेशेन] आग्रहेण तुष्यतीति तथोक्तेन [गरीयसा] पूज्यतमेन [गुरुणा] पित्रा [कृताभ्यनुज्ञा] तपः कुरु इति कृतानुमतिः सती [पश्चात्] तपसिद्ध्युत्तरकालम् [प्रजासु] जनेषु [तदाख्यया] तस्याः गौर्य्याः संज्ञया [प्रथितम्] गौरीशिखरमिति प्रसिद्धमित्यर्थः । [शिखण्डिमत्] न तु हिंस्रप्राणिप्रचुरमिति भावः । [शिखरम्] शृङ्गम् [जगाम] ययौ ॥ ७ ॥

(१) दुह्याच् पच् दण्ड्रुधि-प्रच्छि-चि-ब्रू-शासि-जि मथ् मुषाम् कर्मयुक् स्यादकथितं तथा स्यान्नी-हृ-कृष्-वहाम् ॥ माधवः ।

विमुच्य सा हारमहार्य्यनिश्चया
विलोलयष्टिप्रविलुप्तचन्दनम्।
बबन्ध बालारुणबभ्रु वल्कलं
पयोधरोत्सेधविशीर्णसंहति॥ ८॥
यथा प्रसिद्धैर्मधुरं शिरोरुहै-
र्जटाभिरप्येवमभूत्तदाननम्।
न षट्पदश्रेणिभिरेव पङ्कजं
सशैवलासङ्गमपि प्रकाशते॥ ९॥

विमुच्येति। [अहार्य्यनिश्चया] अनिवार्य्यनिश्चया [सा] गौरी [विलोलाभिः] चलाभिः [यष्टिभिः] प्रतिसरैः [प्रविलुप्तम्] प्रमृष्टम् [चन्दनम्] स्तनान्तरगतं येन तं तथोक्तम् [हारम्] मुक्तावलीम् [विमुच्य] विहाय [बालारुणबभ्रु] बालार्कपिङ्गलम् [पयोधरयोः] स्तनयोः [उत्सेधेन] उच्छ्रायेण [विशीर्णा] विघटिता [संहतिः] अवयवसंश्लेषो यस्य तत्तथोक्तम् [वल्कलम्] कण्ठलम्बि स्तनोत्तरीयभूतम् [बबन्ध] धारयामास इत्यर्थः॥ ८॥

यथेति। तस्याः देव्याः आननम् [तदाननं प्रसिद्धैः] भूषितैः। "प्रसिद्धौ ख्यातभूषितौ" इत्यमरः। रोहन्तीति रुहाः। इगुपध-ज्ञा-प्री-किरः क इति (३,१,१३५पा०) कप्रत्ययः। शिरसि रुहाः तैः [शिरोरुहैः] मूर्द्धजैः [यथा मधुरम्] प्रियम् [अभूत्।] "स्वादुप्रियौ तु मधुरौ" इत्यमरः। [जटाभिरप्येवम्] [मधुरम् अभूत्।] तथाहि [पङ्कजम्] पद्मम् [षट्-

प्रतिक्षणं सा कृतरोमविक्रियां
व्रताय मौञ्जीं त्रिगुणां बभार याम् ।
अकारि तत्पूर्वनिबद्धया तया
सरागमस्या रशनागुणास्पदम् ॥ १० ॥
विसृष्टरागादधरान्निवर्तितः
स्तनाङ्गरागारुणिताच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः
कृतोऽक्षसूत्रप्रणयी तया करः ॥ ११ ॥

पद्मेरेखिभिः] भ्रमरपङ्क्तिभिरेव [न] किन्तु सह शैवल सङ्गेन [सशैवलासङ्गमपि ।] तेन सहेति तुल्ययोगे (२,३ २८पा०) बहुव्रीहिः । [प्रकाशते] शैवलेनापि शोभत एवे त्यर्थः ॥ ८ ॥

प्रतिक्षणमिति । [सा] देवी [प्रतिक्षणम्] क्षणे क्षणे [कृत रोमविक्रियाम्] पारुष्यात्कृतरोमाञ्चाम् [त्रिगुणाम्] त्रिर हत्ताम् [यां मौञ्जीम्] मुञ्जमयीं मेखलाम् [व्रताय] तप [बभार ।] तदेव पूर्वं प्रथमं यस्य [तत्पूर्वम्] यथा त [निबद्धया तया] मौञ्ज्या [अस्याः] देव्याः [रशनागुणास्पदम्] स्थानं जघनम् सह रागेण [सरागम्] सलोहित [अकारि] कृतम् सौकुमार्य्यातिशयादिति भावः ॥ १० ॥

विसृष्टेति । [तया] देव्या [विसृष्टरागात्] त्यक्तलाक्षार रञ्जनात् निसृष्टेति पाठे नितरां त्यक्तलाक्षारागात् । [अ रात्] अधरोष्ठात् [निवर्त्तितः] रागत्यागेन निष्प्रयोजन

महार्हशय्यापरिवर्तनच्युतैः
स्वकेशपुष्पैरपि या स्म दूयते।
अशेत सा बाहुलतोपधायिनी
निषेदुषी स्थण्डिल एव केवले॥ १२॥
पुनर्ग्रहीतुं नियमस्थया तया
द्वयेऽपि निक्षेप इवार्पितं द्वयम्।

दिति भावः तथा [स्तनाङ्गरागेण] [अरुणिताल्] अरुणीकृतात् पतनसमये तस्य स्तनयोरुपरीधादिति भावः। [कन्दुकाच निवर्त्तितः]। [कुशाङ्कुराणाम्] [आदानेन] लवनेन [परिक्षताः व्रणिताः [अङ्गुलयः] यस्य स तथोक्तः [करः] पाणिः [अक्षसूत्र-प्रणयी] अक्षमालासहचरः [कृतः]॥ ११॥

महार्हेति। महानर्हो मूल्यं यस्याः सा [महार्हा] श्रेष्ठा या [शय्या] तस्याम् [परिवर्त्तनेन] लुण्ठनेन [च्युतैः] भ्रष्टैः [स्वकेशपुष्पैरपि] [या] देवी [दूयते स्म] क्लिश्यति स्म पुष्पाधिकसौकुमार्य्यादिति भावः। [सा] देवी बाहुलतामुपधत्ते उपधानीकरोतीति [बाहुलतोपधायिनी] सती [केवले] संस्तरणरहिते [स्थण्डिले] भूमौ [एव अशेत] शयितवती। तथा [निषेदुषी] उपविष्टा च क्वसुश्चेति (३,२,१०७पा०) उगितश्चेति (४,१,६पा०) ङीप्। भूमावेव शयनादिव्यवहारो न जातूपरीत्यर्थः॥ १२॥

पुनरिति। [नियमस्थया] व्रतस्थया [तया] देव्या [द्वयेऽपि द्वयं पुनः ग्रहीतुम्] पुनरानेतुम् [निक्षेपः अर्पितमिव] निक्षेपत्वेन अर्पितं किमु। क्वचित् द्वयीषु इति प्रामादिकः पाठः।

लतासु तन्वीषु विलासचेष्टितं
विलोलदृष्टं हरिणाङ्गनासु च ॥ १३ ॥
अतन्द्रिता सा स्वयमेव वृक्षकान्
घटस्तनप्रस्रवणैर्व्यवर्द्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां
न पुत्रवात्सल्यमपाकरिष्यति ॥ १४ ॥
अरण्यबीजाञ्जलिदानलालिता
स्तथा च तस्यां हरिणा विशश्वसुः ।

कुत्र द्वये किं द्वयमर्पितम्, इत्याह,—[तन्वीषु लतासु] वि‍लास एव चेष्टितम् [विलासचेष्टितम्] [हरिणाङ्गनासु विलोदृष्टम्] चञ्चलावलोकितम् [च] । व्रतस्थायां तस्यां तयोदर्शनाल्लतादिषु दर्शनाच्च अर्पितमिवेत्युत्प्रेक्षा न तु वस्तुतर्पणमस्तीति भावः ॥ १३ ॥

अतन्द्रितेति । [सा] देवी [स्वयमेव अतन्द्रिता] असञ्जातन्द्रा सती तारकादित्वात् (५,२,३६पा०) इतच्प्रत्यय [वृक्षकान्] स्वल्पवृक्षान् । अल्पे (५,३,८५पा०) इत्यल्पार्थे वत्ययः । [घटाः] एव [स्तनौ] तयोः [प्रस्रवणैः] प्रस्तृतपयो [व्यवर्द्धयत् ।] [गुहः] कुमारः [अपि] [प्रथमाप्तजन्मनाम् थमलब्धजन्मनाम् अग्रजातानामित्यर्थः [येषाम्] वृक्षका सम्बन्धि [पुत्रवात्सल्यम्] सुतप्रेम [नापाकरिष्यति] उत्कुमारोदयेऽपि न तेषु पुत्रवात्सल्यं निवर्त्तिष्यत इत्यर्थः ॥

अरण्येति । [अरण्यबीजानाम्] नीवारादीनाम् [अलयः] तेषाम् [दानेन] लालिताः [हरिणाश्च तस्याम्] दे

यथा तदीयैर्नयनैः कुतूहलात्
पुरः सखीनाममिमीत लोचने ॥ १५ ॥

कृताभिषेकां हुतजातवेदसं
त्वगुत्तरासङ्गवतीमधीतिनीम् ।
दिदृक्षवस्तामृषयोऽभ्युपागम-
न्न धर्मवृद्धेषु वयः समीक्ष्यते ॥ १६ ॥

[तथा विश्रब्धाः] विस्रम्भं जग्मुः । "समौ विस्रम्भविश्वासौ" इत्यमरः । [यथा कुतूहलात्] औत्सुक्यात् [तदीयैः] हरिणसम्बन्धिभिः [नयनैः] नेत्रैः करणैः स्वकीये [लोचने सखीनां पुरः] पुरतः अनेन तेषां सम्बन्धसहत्वमुक्तम् । [अमिमीत] अक्षिपरिमाणतारतम्यज्ञानायमानं चकारेत्यर्थः । केचित्तु सा पार्वती तदीयैर्नेत्रैः कुतूहलात् पुरोऽग्रे वर्त्तमानानां सखीनां लोचने अमिमीत व्रतस्थत्वान्नात्मन इत्याहुः । माङ्माने इत्यस्माद्धातोर्लङ् । इयमेव खलु विश्वासस्य परा काष्ठा यदक्षिपीड़नेऽपि न क्षुभ्यन्तीति भावः ॥ १५ ॥

तपःप्रभावमाह,—

कृतेति । [कृताभिकाम्] कृतस्नानाम् [हुतजातवेदसम्] हुताग्निकां कृतहोमामित्यर्थः । त्वचा वल्कलेन उत्तरासङ्गवतीम् उत्तरीयवतीम् [त्वगुत्तरासङ्गवतीम्] अधीतमस्याः अस्तीति [अधीतिनीम्] स्तुतिपाठादि कुर्वतीम् । इष्टादिभ्यश्च (५,२,८८पा० ।) इतीनिः [ताम्] देवीम् [दिदृक्षवः] द्रष्टुमिच्छवः [ऋषयः] मुनयः [अभ्युपायमन्] समुपागताः । न चात्र कनिष्ठसेवादोष इत्याह,—[धर्मवृद्धेषु वयो न समीक्ष्यते] न

विरोधिसत्त्वोज्झितपूर्वमत्सरं
द्रुमैरभीष्टप्रसवार्चितातिथि।
नवोटजाभ्यन्तरसम्भृतानलं
तपोवनं तच्च बभूव पावनम् ॥ १७ ॥
यदा फलं पूर्वतपःसमाधिना
न तावता लभ्यममंस्त काङ्क्षितम्।
तदानपेक्ष्य स्वशरीरमार्दवं
तपो महत् सा चरितुं प्रचक्रमे ॥ १८ ॥

प्रमाणीक्रियते। सति धर्मज्यैष्ठ्ये वयोज्यैष्ठ्यं न प्रयोजका
त्यर्थः। तथाच मनुः,—"न तेन वृद्धो भवति येनास्य पलि
शिरः। यो वा युवाप्यधीयानस्तं देवाः स्थविरं विदुः," इ
(अ० २श्लो० १५६) ॥ १६ ॥

विरोधीति। [विरोधिभिः सत्त्वैः] गोव्याघ्रादिभिः [उ
ज्झितपूर्वमत्सरम्] त्यक्तपूर्ववैरम् हिंसारहितमित्यर्थः। [द्रु
अभीष्टप्रसवेन] इष्टफलेन [अर्चिताः] पूजिताः [अतिथयः
यस्मिन् तत्तथोक्तम् [नवानामुटजानाम्] पर्णशालान
[अभ्यन्तरेषु सम्भृताः] सञ्चिताः [अनलाः] अग्नयो यस्मि
तत्तथोक्तम् [तच्च तपोवनम्] पावयतीति [पावनम् बभूव
अहिंसातिथिसत्काराग्निपरिचर्याभिर्जगत्पावनं बभू
त्यर्थः ॥ १७ ॥

यदेति। [सा] देवी [यदा] यस्मिन् काले [तावता] ता
प्रमाणेन [पूर्वतपःसमादिना] पूर्वेणानुष्ठीयमानप्रका

क्लमं ययौ कन्दुकलीलयापि या
तया मुनीनां चरितं व्यगाह्यत ।
ध्रुवं वपुः काञ्चनपद्मनिर्मितं
मृदु प्रकृत्या च ससारमेव च ॥ १९ ॥

शुचौ चतुर्णां ज्वलतां हविर्भुजां
शुचिस्मिता मध्यगता सुमध्यमा ।
विजित्य नेत्रप्रतिघातिनीं प्रभा-
मनन्यदृष्टिः सवितारमैक्षत ॥ २० ॥

तपोनियमेन [काङ्क्षितम् फलम् लभ्यम्] लब्धुं शक्यम् [अमंस्त] अशक्यममंस्तेत्यर्थः । [तदा] तत्काले अविलम्बेनेत्यर्थः [स्वशरीरस्य मार्दवम्] मृदुत्वं सौकुमार्य्यम् [अनपेक्ष्य] अविगणय्य [महत्] दुश्चरम् [तपश्चरितुम्] साधयितुम् [प्रचक्रमे] उपचक्रमे ॥ १८ ॥

क्लममिति । [या] देवी [कन्दुकलीलया] कन्दुकक्रीड़यापि [क्लमम् ययौ] ग्लानिं प्राप [तया] देव्या [मुनीनाम् चरितम्] तीव्रं तपः [व्यगाह्यत] प्रविष्टम् । अत्रोत्प्रेक्षते,—[ध्रुवम्] अस्याः [वपुःकाञ्चनपद्मेन] सुवर्णकमलेन [निर्मितम्] घटितम् अतएव [प्रकृत्या] पद्मस्वभावेन [मृदु च] सुकुमारमपि काञ्चनस्वभावेन [ससारम्] कठिनम् [एव] तथा च तदुपादानत्वाद्देव्या वपुषः सुकुमारस्यापि तीव्रतपःक्षमत्वनित्युत्प्रेक्षार्थः ॥ १९ ॥

शुचाविति । [शुचौ] ग्रीष्मे [शुचिस्मिता] विशदमन्दहासा [सुमध्यमा] पार्वती [ज्वलताम्] दीप्तिमताम् [चतुर्णाम् हवि-

तथातितप्तं सवितुर्गभस्तिभि-
र्मुखं तदीयं कमलश्रियं दधौ ।
अपाङ्गयोः केवलमस्य दीर्घयोः
शनैःशनैः श्यामिकया कृतं पदम् ॥ २१ ॥
अयाचितोपस्थितमम्बु केवलं
रसात्मकस्योडुपतेश्च रश्मयः ।

भुजाम्] अग्नीनाम् [मध्यगता] सती नेत्रे प्रतिहन्तीति ताम् [नेत्रप्रतिघातिनीम् प्रभाम्] सावित्रं तेजः [विजित्य] न विद्यते अन्यत्र दृष्टिर्यस्याः सा [अनन्यदृष्टिः] सती [सवितारम्] सूर्यम् [ऐक्षत] ददर्श। "ग्रीष्मे पञ्चाग्निमध्यस्थो वर्षासु स्थण्डिलेशयः" इति स्मरणात्; पञ्चाग्निमध्ये तपश्चचारेत्यर्थः तत्र सवितैव पञ्चमोऽग्निः "अग्निः सविता सवितैवाग्निः" इति श्रौतलिङ्गात् ॥ २० ॥

तथेति। [सवितुः] सूर्यस्य [गभस्तिभिः] किरणैः [तथा] पूर्वोक्तप्रकारेण [अतितप्तम्] सन्तप्तं तस्याः इदम् [तदीयम्] मुखम् कमलश्रियम्] कमलस्य शोभाम् [दधौ] प्राप। यथा रवितापात् कमलं न म्लायति प्रत्युत विकसति तथा तदीयं मुखमासीदिति भावः। किन्तु [अस्य] मुखस्य [दीर्घयोरपाङ्गयोः केवलम्] नेत्रान्तयोरेव [शनैः शनैः] मन्दं मन्दम् [श्यामिकया] कालिम्ना [पदम्] स्थानम् [कृतम्] तयोः सौकुमार्य्यादित्यर्थः ॥ २१ ॥

अयाचितेति। [अयाचितोपस्थितम्] अप्रार्थितोपनतम् [केवलम् अम्बु] उदकम् [रसात्मकस्य] अमृतमयस्य [उडूनाम्

बभूव तस्याः किल पारणाविधि-
र्न वृक्षवृत्तिव्यतिरिक्तसाधनः ॥ २२ ॥
निकामतप्ता विविधेन वह्निना
नभश्चरेणेन्धनसम्भृतेन सा ।
तपात्यये वारिभिरुक्षिता नवै-
र्भुवा सहोष्माणममुञ्चदूर्ध्वगम् ॥ २३ ॥
स्थिताः क्षणं पक्ष्मसु ताडिताधराः

...चवताणां [पतिः चन्द्रस्तस्य [रश्मयश्च] [तस्याः । पार्वत्याः पारणाविधिः] अभ्यवहारकर्म [बभूव] तावन्मात्रसाधनको भूदित्यर्थः । साध्यसाधनयोरभेदेन व्यपदेशः साधनान्तर-...ावस्त्यर्थः । [किल] इति प्रसिद्धौ । वृक्षाणाम् या [वृत्तिः] ...ीवनोपायः [तद्व्यतिरिक्तम्] [साधनम्] उपायो यस्य स ...थोक्तः पारणाविधिः [न बभूव] । वृक्षोऽप्ययाचितोपस्थि-...ेन मेघोदकेन इन्दुकिरणैश्च जीवतीति प्रसिद्धम् अम्बिकापि ...ावन्मात्रमवालम्बतेत्यर्थः ॥ २२ ॥

निकामेति । [विविधेन] पञ्चविधेनेत्यर्थः [नभश्चरेण] खेच-...ेण आदित्यरूपेणेत्यर्थ । [इन्धनसम्भृतेन] काष्ठसमिद्धेन ...वह्निना] [निकामम्] अत्यन्तम् [तप्ता सा] अम्बिका [तपा-...त्यये] ग्रीष्मान्ते प्रावृषीत्यर्थः [नवैर्वारिभिः उक्षिता] सिक्ता ...सती [भुवा] पञ्चाग्नितप्तया [सह ऊर्ध्वगम्] ऊर्ध्वप्रसृतम् [उष्माणम्] वाष्पम् [अमुञ्चत् ।] "ग्रीष्मोष्मवाष्प उष्माण" इति यादवः ॥ २३ ॥

स्थिता इति । उदकस्य विन्दवः [उदबिन्दवः] मघ्योदने-

पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदविन्दवः ॥ २४ ॥
शिलाशयां तामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ।

त्यादिना (६,३,६०पा) उदकशब्दस्य उदादेशः । [प्रथमे] [उद-
विन्दवः] प्रथमविशेषणात् विन्दूनां विरलत्वं बहुवचनाज्जाति-
विरलत्वञ्च गम्यते तथा च चिरत्वनाभ्यन्तरगमनयोर्निर्वाहः।
[तस्याः] पार्वत्याः [पक्ष्मसु] नेत्रलोमसु [क्षणम्] [स्थिताः]
स्थितिं गताः स्थिता इत्यनेन पक्ष्मणां सान्द्रत्वं क्षणमिति
स्नेग्धत्वञ्च गम्यते । अनन्तरम् [ताड़िताः] आहिताः [अधरः
ओष्ठो यैस्ते तथोक्ताः एतेनाधरस्य मार्दवं गम्यते । तत
[पयोधरयोः] स्तनयोः [उत्सेधे] उपरिभागे [निपातेन] पत-
नेन [चूर्णिताः] जर्जरिताः कुचकाठिन्यादिति भावः । तद
[वलीषु] उदररेखासु [स्खलिताः] निम्नोन्नतत्वादिति भावः
इत्थं [चिरेण] न तु शीघ्रं प्रतिबन्धबाहुल्यादिति भावः [ना
भिम्] [प्रपेदिरे] प्रविष्टाः न तु निर्जग्मुः एतेन नाभेः गाम्भी
गम्यते । अत्र प्रतिपदमर्थवत्त्वात्परिकरालङ्कारः ॥ २४ ॥

शिलेति । [निरन्तरासु] नीरन्ध्रासु अन्तरे मध्ये वात
यासां तादृश्यो या वृष्टयस्तासु [अन्तरवातवृष्टिषु] न निके
गृहे वसतीति [अनिकेतवासिनीम्] अनावृतदेशवासिनं

(१) मन्थादिषु परेषु उदकस्य उदः स्यात् ।

व्यलोकयन्नुन्मिषितैस्तडिन्मयै-

र्महातपः साक्ष्य इव स्थिताः क्षपाः ॥ २५ ॥

निनाय सात्यन्तहिमोत्किरानिलाः

सहस्यरात्रीरुदवासतत्परा ।

परस्पराक्रन्दिनि चक्रवाकयोः

पुरो वियुक्ते मिथुने कृपावती ॥ २६ ॥

मित्यर्थः शिलायां शेत इति [शिलाशयाम्] शिलातल-शायिनीम् । अधिकरणे शेतेरिति (३,२, १५ पा०) अच्-प्रत्ययः । [ताम्] पार्वतीं साक्षाद्द्रष्टा साक्षी । साक्षाद्द्रष्टरि संज्ञायाम् (१) (५,२,९१पा०) इतीनिप्रत्ययः । तस्य कर्म साक्ष्यम् [महातपसः साक्ष्ये स्थिताः क्षपाः] [तडिन्मयैः] वैद्युद्रूपैः [उन्मिषितैः] अवलोकनैः [व्यलोकयन्निव] इवेति चक्षुषा विलोकनमेव उत्प्रेक्ष्यते साक्ष्यन्तु "आदित्य चन्द्राव-निलोऽनलश्च द्यौर्भूमिरापोहृदयम् यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्त" मिति प्रमाण-सिद्धत्वात् नोत्प्रेक्ष्यमित्यनुसन्धेयम् ॥ २५ ॥

एवं वर्षासु विहितं तपःप्रकारमुक्त्वा सम्प्रति हैमन्ते तप-श्चरणप्रकारमाह,—

निनायेति । [सा] पार्वती उत्किरन्ति क्षिपन्तीत्युत्किराः । इगुपधज्ञेत्यादिना (३,१,१३५पा०) कः । [अत्यन्तं हिमा-नामुत्किराः अनिलाः] यासु ताः [सहस्यरात्रीः] पौषरात्रीः ।

---

(१) साक्षाच्छब्दाद्द्रष्टर्यर्थे इनिप्रत्ययः पाणिनिना अत्र साक्ष्य इति लोपः ।

मुखेन सा पद्मसुगन्धिना निशि
प्रवेपमानाधरपत्त्रशोभिना ।
तुषारवृष्टिक्षतपद्मसम्पदां
सरोजसन्धानमिवाकरोदपाम् ॥ २७ ॥

"पौषे तैषसहस्यौ द्वौ" इत्यमरः । उदके वासः [उदवासः] पेषंवासवाहनधिषु च (१) (६,३,५८पा०) इत्युदादेशः [उदवासे तत्परा] आसक्ता तथा [परस्परमाक्रन्दि] अन्योन्यमाक्रोशिनि [पुरः] अग्रे [वियुक्ते] विरहिणि वियो प्राप्ते इति यावत् । चक्रवाकी च चक्रवाकश्च चक्रवाकौ त [चक्रवाकयोर्मिथुने] द्वन्द्वे [कृपावती] सती [निनाय दुःखितेषु कृपालुत्वं महतां स्वभाव इति चक्रवाकमिथुने कृ न तु कामितयेति व्याख्यानवकाशः । "अप्सु वासस्तु हेम क्रमशो वर्धयंस्तप" इति मनुः (अ०६ श्लो०२३) ॥ २६ ॥

मुखेनेति । [सा] पार्वती [निशि] रात्रौ [पद्मवत्सुगन्धि सुरभिणा गन्धस्येदित्यादिना (५,४,१३५पा०) (२) इका [प्रवेपमानः] कम्पमानः [अधरः] ओष्ठ एव [पत्त्रम्] दलं [शोभते] इति तथोक्तेन [मुखेन] [तुषारवृष्ट्या] तुहिनव [क्षताः] नाशिताः [पद्मसम्पदः] यासाम् तासाम् [अप सरोजसन्धानम्] पद्मसङ्घटनम् [अकरोदिव] इत्युत्प्रे ालङ्कारः । पद्मान्तरन्तुहिनेनोपहन्यते तन्मुखपद्मन्तु न तां अतिरेकालङ्कारो व्यज्यत इत्युभयोः सङ्करः ॥ २७ ॥

(१) पेषमादिषु परेषु उदकस्य उदः स्यात् ।
(२) उत्पूतिसु सुरभिपूर्वकगन्धस्यान्तावयवस्य इत्‌ स्यात् ।

स्वयं विशीर्णद्रुमपर्णवृत्तिता
परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥
मृणालिकापेलवमेवमादिभि-

स्वयमिति । [स्वयम् विशीर्णानि] स्वयम्पतितानि [द्रुमपर्णानि] एव [वृत्तिः] जीवनं यस्य तस्य भावस्तत्ता [तपसः परा काष्ठा] परमुत्कर्षो हि । "काष्ठोत्कर्षे स्थितौ दिशि" इत्यमरः । [तया] देव्या [पुनः तत्] पर्णवर्त्तनम् [अपि अपाकीर्णम्] अपाकृतम् । [अतः] पर्णापकरणाद्धेतोः प्रियं वदतीति [प्रियंवदा] प्रियवशे वदः खच् इति (३,२,३८पा०) खच्प्रत्ययः अरुर्द्विषदजन्तस्य मुम् इति (६,३,६७पा०) मुमागमः । [ताम्] पार्वतीम् [पुराविदः] पुराणज्ञाः तपःकरणसमये अविद्यमानं पर्णभक्षणं यस्याः सा [अपर्णा] इति [वदन्ति] नामान्तरसमुच्चयार्थश्चकारः । स्वयं प्रियं वदाः परेषामपि प्रियवादभाजनानि भवन्तीति भावः । अत्रापर्णामित्यपपाठः इति शब्दाभिहिते द्वितीयानुपपत्तेः । यथाह वामनः "निपातेनाप्यभिहिते कर्मणि न कर्मविभक्तिः परिगणनस्य (१) प्रायिकत्वात्" इति ॥ २८ ॥

मृणालिकेति । [मृणालिकापेलवम्] पद्मिनीकन्दकोमलम्

(१) अभिहिते प्रथमेति वार्तिके अभिधानस्य प्रायेण तिङ्कृत्तद्धितसमासैरिति परिगणने प्रायेणेत्युक्तेः निपातस्यापि अभिधानप्रयोजकत्वं [illegible] ।

अतः स्वमङ्गं [illegible]मुपवासव्रतादिभिः ।
तपः शरीरैः कठिनैरुपार्जितं
तपस्विनां दूरमधश्चकार सा ॥ ॥ २६ ॥

अथाजिनाषाढधरः प्रगल्भवाक्
ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥

[स्वम्] स्वकीयम् [अङ्गम्] शरीरम् [एवम्] उक्तप्रकारतोय
[illegible]म्बुवासव्रतम् [आदिः] येषां तैः [व्रतैः] अहश्च निशा
[अहर्निशम् ।] समाहारे द्वन्द्वैकवद्भावः । अत्यन्तसंयोगे [illegible]
तीया । [ग्लपयन्ती] कर्षयन्ती [सा] पार्वती [कठिनैः] क्ले[illegible]
सहैरित्यर्थः । [शरीरैः उपार्जितम्] सम्पादितम् तपस्विना
ऋषीणाम् [तपः] [दूरम्] अत्यन्तम् [अधश्चकार] तिरश्च[illegible]
अतिशिश्य इत्यर्थः तपस्विभिरप्येवं तपः कर्त्तुं न शक्य
इति तात्पर्य्यार्थः ॥ २९ ॥

अथेति । [अथ] अनन्तरम् [अजिनम्] कृष्णमृगत्व[illegible]
[आषाढः] प्रयोजनमस्येति [आषाढः] पालाशदण्ड[illegible]
"पालाशदण्ड आषाढ" इत्यमरः । विशाखाषाढादण् म[illegible]
दण्डयोः (५,१,११०पा०) । इत्यण्प्रत्ययः । तयोः [ध[illegible]
तथोक्तः [प्रगल्भवाक्] प्रौढवचनः [ब्रह्ममयेन] वैदिकेन [illegible]
जसा] ब्रह्मवर्चसेनेत्यर्थः । [ज्वलन्निव] स्थितः इवशब्दो नि[illegible]
रणार्थः [कश्चित्] पुमिविष्टः [जटिलः] जटावान् [illegible]
धारीति शेषः । (५,२,१००पा) पिच्छादित्वादिलच्प्रत्यय[illegible]

तमातिथेयी बहुमानपूर्वया
सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां
परिश्रमं नाम विनीय च क्षणम् ।

शरीरबद्धः बद्धशरीरः शरीरवानित्यर्थः। आहिताग्न्यादिषु (२,२,३७पा०) पाठात्साधुः। [प्रगल्भवाक्] [illegible] श्रम एव यथाशब्द एवार्थे [तपोवनम्] देशं [illegible] [विवेश] प्रविष्टवान् ॥ ३० ॥

तमिति। अतिथिषु साध्वी [आतिथेयी] पथ्यतिथिवसति[illegible] (४,४,१०४पा०) ढञ्प्रत्ययः। टिड्ढाणञ्[illegible] (४,१,१५पा०) ङीप्। [पार्वती] [तम्] ब्रह्मचारिणम् [बहुमान-पूर्वया] बहुमानःपूर्वो यस्यास्तया गौरवपूर्वयेत्यर्थः। [सपर्यया] अर्चया। "सपर्यार्चार्हणाः समाः" इत्यमरः। [प्रत्युदियाय] प्रत्युज्जगाम। कथं समानेऽपि तस्यास्तादृशी प्रतिपत्तिरत आह। [साम्ये] सति [अपि] [निविष्टचेतसाम्] स्थिरचित्ता-नाम् [वपुर्विशेषेषु] व्यक्तिविशेषेषु अतिशयितं गौरवं [illegible] ताः [अतिगौरवाः] अतिगौरवसहिताः [क्रियाः] [illegible] [भवन्ति] प्रवर्तन्त इत्यर्थः। [illegible] न साम्याभिनिवेशिन इति भावः ॥ ३१ ॥

विधीति। [सः] ब्रह्मचारी [विधिना प्रयुक्ताम्] [illegible]ष्ठिताम् [सत्क्रियाम्] पूजाम् [परिगृह्य] स्वीकृत्य [क्षण

उमां स पश्यन् ऋजुनैव चक्षुषा
प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥
अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥
अपि त्वदावर्जितवारिसंभृतं

परिग्रहम्] विश्रामञ्च [विनीय नाम] नामित्यपरमार्थे । अथ [उमाम् ऋजुनैव] विकाररहितेनैव [चक्षुषा] पश्यन् [अनुज्झितक्रमः] अत्यक्तोचितपरिपाटीकः सन् [वक्तुं प्रचक्रमे] प्रारेभे ॥ ३२ ॥

अपीति । अत्र अपिशब्दः प्रश्ने । [क्रियार्थम्] होमादिकर्मानुष्ठानार्थं समिधश्च कुशाश्च [समित्कुशम् ।] जातिरप्राणिनामिति (२,४,६पा०) द्वन्द्वे एकवद्भावः । [सुलभमपि ?] सुलभं कच्चित् ? [जलानि ते] तव [स्नानविधिक्षमाणि] स्नानक्रियायोग्यानि [अपि ?] ? कच्चित् किञ्च [स्वशक्त्या] निजसामर्थ्यानुसारेण [तपसि प्रवर्तसे अपि ?] देहमपीडयित्वा तपश्चरसि कच्चित् ? इत्यर्थः । युक्तञ्च नामैतत् [खलु] यस्मात् [शरीरम् आद्यम्] [धर्मसाधनम्] । धर्मस्तु कायेन वाचा बुद्ध्या धनादिना च बहुभिः साध्यते तेषु च वपुरेव मुख्यं साधनं सति देहे धर्मार्थकाममोक्षलक्षणाश्चतुर्वर्गाः साध्यन्ते । अतएव "सततमात्मानमेव गोपयीत" इति श्रुतिः ॥ ३३ ॥

प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥
अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि ! प्रचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥

अपि त्वदेति। त्वया [आवर्जितेन] सिक्तेन [वारिणा] सम्भृतम्] जनितम् [आसाम वीरुधाम्] लतानाम् [प्रवालम्] पल्लवम् [अनुबन्ध्यपि ?] अनुस्यूतं किं ? यत् प्रवालं चिरोज्झितचिरकालत्यक्तः लाक्षारागो येन तत्तथापि पाटलं स्वभावरक्तमित्यर्थः तेन [चिरोज्झितालक्तकपाटलेन ते] तव [दन्त वाससा] अधरेण। "ओष्ठाधरौ तु रदनच्छदौ दशनवाससी" इत्यमरः। [तुलाम्] साम्यम् [आरोहति] गच्छतीत्यर्थः। अत्र तुलाशब्दस्य सादृश्यवाचित्वात्तद्योगेऽपि तुल्यार्थैरतुलोपमाभ्यामिति (२,३,७२पा०) न तृतीयाप्रतिषेधः तत्र सूत्रे सदृशवाचिन एव ग्रहणादिति ॥ ३४ ॥

अपीति ! [करस्थान् दर्भान् प्रणयेन] स्नेहेन [अपहरन्ति] इति ते तथोक्तेषु सापराधेष्विति भावः। अपराधिष्विति पाठे दर्भाणां प्रणयेन प्रार्थनया अपराधिषु [हरिणेषु] विषये [ते मनः] [प्रसन्नमपि ?] न क्षुभितं किं सापराधेष्वपि न कोपितव्यं तपस्विभिरिति भावः। हे [उत्पलाक्षि ! ये] हरिणाः [प्रचलैः] चञ्चलैः [विलोचनैः] नेत्रैः [तव अक्षि-

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥
विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।

साद्दश्यम् प्रयुङ्क्ते इव] अभिनयन्तीव प्रसङ्गलात् मृगनेत्राणि त्वन्नयनैः साम्यमुपयान्तीति भावः । उत्पलक्षेपचलैरिति पाठान्तरे उत्पलकम्पचलैः "भावानयने द्रव्यानयनम्" इति न्यायेन क्षिप्यमाणोत्पलचलैरित्यर्थः ॥ ३५ ॥

यदिति । हे [पार्वति !] [रूपम्] सौम्याकृतिः [पापवृत्तये] पापचरणाय [न] भवतीति [यदुच्यते], लोकैरिति शेषः । [तद्वचः] न व्यभिचरति न स्खलतीति [अव्यभिचारि] सत्यम् । 'यत्राकृतिस्तत्र गुणाः' 'न सुरूपाः पापसमाचारा भवन्ति' इत्यादयो लोकवादा न विसंवादमासादयन्तीत्यर्थः । किमिति ज्ञायते [तथाहि] हे [उदारदर्शने !] महति । सुरूपे इत्यर्थः । अथवा उन्नतज्ञाने । विवेकवति । [ते] तव [शीलम्] वृत्तम्, "शीलं स्वभावे सद्वृत्ते" इत्यमरः । [तपस्विनामपि] उपदिश्यते अनेनेत्युपदेशः प्रमाणं तत्ताम् [उपदेशताम् गतम्] प्राप्तम् । सुवर्णमपि त्वां वीक्ष्य तपसि प्रवर्तन्त इति भावः ॥ ३६ ॥

विकीर्णेति । एषः [महीधरः] हिमवान् सप्त च ते ऋ

यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भाविनि ! ।
त्वया मनोनिर्विषयार्थकामया
यदेक एव प्रतिगृह्य सेव्यते ॥ ३८ ॥

यश्च सप्तर्षयः । दिक्संख्ये संज्ञायाम् (१) (२,१,५०पा०) इति समासः । [विकीर्णैः] पर्यस्तैः [सप्तर्षीणाम्] सम्बन्धिभिः [बलिभिः] पुष्पोपहारैः [प्रहसन्ति] ये तथोक्तैः [दिवः] अन्तरिक्षात् [च्युतैः] गाङ्गैः सलिलैः तथा न [पावितः] [अनाविलैः] अकलुषैः [त्वदीयैः चरितैः] [यथा सान्वयः] सपुत्रपौत्रः पावितः पवित्रीकृतः ॥ ३७ ॥

अनेनेति । हे [भाविनि !] प्रशस्ताभिप्राये ! [अनेन] कारणेन [धर्मः सविशेषम्] सातिशयम् [अद्य मे] ममार्थो धर्मकामार्थानां वर्गः [त्रिवर्गः] । "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः" इत्यमरः । तत्र [सारः] श्रेष्ठः [प्रतिभाति ।] [यत्] यस्मात् कारणात् [मनसो निर्विषयौ अर्थकामौ] यस्यास्तया [त्वया एकः] धर्म एव [प्रतिगृह्य] स्वीकृत्य [सेव्यते ।] अतएव अर्थकामौ विहाय धर्म एवावलम्बितः सर्वेषां मे स एवाभिमत इति प्रतिपद्यत इत्यर्थः ॥ ३८ ॥

---

(१)-संज्ञायामेव दिक्संख्ये समानाधिकरणेन समस्येते न तद्धितार्थे । अथ संज्ञायां च त्रिवर्गेऽपि ।

प्रयुक्तसत्कारविशेषमात्मना

न मां परं संप्रतिपत्तुमर्हसि ।

यतः सतां संनतगात्रि ! संगतं

मनीषिभिः साप्तपदीनमुच्यते ॥ ३९ ॥

अतोऽत्र किंचिद्भवतीं बहुक्षमां

द्विजातिभावादुपपन्नचापलः ।

अयं जनः प्रष्टुमनास्तपोधने !

न चेद्रहस्यं प्रतिवक्तुमर्हसि ॥ ४० ॥

सम्प्रति मनोरथं जिज्ञासुः प्रस्तौति,—

प्रयुक्तेति । [आत्मना] त्वया [प्रयुक्तः] कृतः [सत्कार-विशेषः] पूजातिशयो यस्य तम् [माम्] [परम्] अन्यम् [सं-प्रतिपत्तुम्] अवगन्तुम् [नार्हसि] हे [संनतगात्रि !] संन-तात्रि ! । अङ्गगात्रकण्ठेभ्यः (१) इति (४,१,५५पा० वा० वक्तव्यात् ङीप् [यतः] कारणात् [illegible] [मनीषिभि-र्विद्भिः] [illegible] [सतां संगतम्] सख्यं सप्तभि-पदैरवाप्यत इति [साप्तपदीनम्] सप्तपदोच्चारणसाध्य [उच्यते] [illegible] सिद्धमित्यर्थः साप्तपदीनं सख्यमिति (५,२,२२पा०) [illegible] ॥३९

अत इति । हे [तपोधने !] [अयं जनः] [illegible] अत्र प्र-स्तावे [बहुक्षमाम्] [illegible] [भवतीम्] [illegible]लाम् [द्विजातिभावात्] ब्राह्मणत्वात् [उपपन्नचापलः] सुलभ

[illegible] —

(१) अङ्गादिभ्य उपसर्जनेभ्यः स्वाङ्गवाचिभ्यो [illegible] ।

कुले प्रसूतिः प्रथमस्य वेधस-
स्त्रिलोकसौन्दर्यमिवोदितं वपुः ।
अमृग्यमैश्वर्यसुखं नवं वय-
स्तपःफलं स्यात् किमतः परं वद ॥४१॥
भवत्यनिष्टादपि नाम दुःसहा-
न्मनस्विनीनां प्रतिपत्तिरीदृशी ।

बाध्यः [अयम् जनः] स्वयमित्यर्थः । किञ्चित्प्रष्टुं मनो यस्य सः [किञ्चित्प्रष्टुमनाः] प्रष्टुकामः तुम्काममनसोरपीति (६,३, १०९पा० वा०) (१) मकारलोपः । रहसि भवम् [रहस्यम्] गोप्यम् [न चेत्] प्रतिवक्तुमर्हसि ॥ ४० ॥

प्रष्टव्यमाह,—

कुल इति । [प्रथमस्य वेधसः] हिरण्यगर्भस्य [कुले] अन्वाये [प्रसूतिः] उत्पत्तिः । "यज्ञार्थं हि मया सृष्टो हिमवानचलेश्वरः" इति ब्रह्मपुराणवचनात् । [वपुः] शरीरम् [त्रयाणां लोकानां सौन्दर्यमिव उदितम्] एकत्र समाहृतम् [ऐश्वर्यसुखम्] सम्पत्सुखम् [अमृग्यम्] अन्वेषणीयं न भवति किन्तु सिद्धमेवेत्यर्थः । [वयः नवम्] यौवनमित्यर्थः । [अतः परम्] अतोऽन्यत् [किं तपःफलं स्यात् ?] [वद] अस्ति चेदिति शेषः न किञ्चिदस्तीत्यर्थः ॥ ४१ ॥

भवतीति । [दुःसहात्] सोढुमशक्यात् [अनिष्टात्] भर्त्रादिकृतादपि [मनस्विनीनाम्] धीरस्त्रीणाम् [ईदृशी] तपश्च-

(१) लुम्पेदवश्यमः कृत्ये तुम् काममनसोरपि । [illegible]

विचारमार्गप्रहितेन चेतसा
न दृश्यते तच्च कृशोदरि ! त्वयि ॥ ४२ ॥
अलभ्यशोकाभिभवेयमाकृति-
र्विमानना सुभ्रु ! कुतः पितुर्गृहे ।
पराभिमर्शो न तवास्ति कः करं
प्रसारयेत् पन्नगरत्नसूचये ॥ ४३ ॥

रणलक्षणा [प्रतिपत्तिः] प्रवृत्तिः । "प्रतिपत्तिस्तु गौरवे प्राप्तौ प्रवृत्तौ प्रागल्भ्ये" इति केशवः । [भवति] [नाम] । नामेति सम्भावनायाम् । [विचारमार्गे प्रहितेन चेतसा चित्तेन [तत्] अनिष्टम् [च] हे [कृशोदरि ! त्वयि] [न दृश्यते] । विचार्यमाणे तदपि नास्ति असम्भावितत्वादि त्यर्थः ॥ ४२ ॥

अनिष्टाभावमेव प्रपञ्चयति,—

अलभ्येति । हे [सुभ्रु !] इयं त्वदीया [आकृतिः] मूर्त्ति [अलभ्यः] लब्धुमनर्हः [शोकेन] भर्त्रावमानजेन दुःखे [अभिभवः] तिरस्कारो यस्याः सा तथोक्ता दृश्यत इति शेषः असम्भावितश्चायमर्थ इत्याह [पितुर्गृहे विमानना] अवमा [कुतः] न सम्भाव्यत एवेत्यर्थः । न चाप्यन्यस्माद्भावीत्याह [पराभिमर्शः] परधर्षणन्तु [तव नास्ति] [पन्नगरत्नसूचये] फणिशिरोमणिशलाकां ग्रहीतुमित्यर्थः । क्रियार्थोपपदस्य कर्मणि स्थानिनः (२,३,१४पा०) इति चतुर्थी । [करम्] स्वम् [कः?] [प्रसारयेत् ।] सुभ्रु ! इत्यत्र भ्रूशब्दस्योवङ्स्था नीयत्वान्नियङ्वङ्स्थानावस्त्रीति (१,४,४पा०) नदीसं

किमित्यपास्याभरणानि यौवने
धृतं त्वया वार्द्धकशोभि वल्कलम् ।
वद प्रदोषे स्फुटचन्द्रतारका
विभावरी यद्यरुणायै कल्पते ॥ ४४ ॥

प्रतिषेधात् अम्बार्थनद्योर्ह्रस्वः (७,३,१०७पा०) इति ह्रस्वत्वं नास्ति तेन ह्रस्वः प्रामादिक इति केचित् अन्ये तु अप्राणिजातेश्चारज्ज्वादीनाम् (४,१,६६पा० वा०) इत्यत्र अलाबूः कर्कन्धूरि त्यूकारान्तादप्युङ्प्रत्ययमुदाजहार भाष्यकारः। एतस्मादेव ज्ञापकात् क्वचिदूकारान्तस्याप्यूङन्तत्वान्नदीत्वे ह्रस्वमित्याहुः। अतएवाह वामनः ऊकारादप्यूङ् प्रकृतेरिति। सुभ्रूः कुतस्तातगृहेऽवमाननमिति पाठान्तरकरणन्तु साध्वसमेव उक्तोपपत्तिसम्भवात्। अन्यत्रापि "सुभ्रु! त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषिता" मित्यादिप्रयोगदर्शनात् वंशस्थवृत्ते पादादौ जगणभङ्गप्रसङ्गाच्चेत्यलं गोष्ठीभिः ॥ ४३ ॥

किमिति। हे गौरि! [किमिति ?] केन हेतुना [यौवने] [त्वया] [आभरणान्यपास्य] विहाय वृद्धस्य भावो वार्द्धकम् (५,१,१३३पा०) मनोज्ञादित्वाद्वुञ्प्रत्ययः। "वार्द्धकं वृद्धसङ्घाते वृद्धत्वे वृद्धकर्मणी" इति विश्वः। तत्र शोभत इति [वार्द्धकशोभि वल्कलं धृतम्] [प्रदोषे] रजनीमुखे स्फुटाः प्रकटाश्चन्द्रस्तारकाश्च यस्याः सा [स्फुटचन्द्रतारका विभावरी] रात्रिः [अरुणाय] सूर्यसूताय [कल्पते यदि ?] अकर्त्तुं कल्पते किम्? [वद] ब्रूहि। क्रियार्थोपपदस्येत्यादिना (२,३,

दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः।
अथोपयन्तारमलं समाधिना
न रत्नमन्विष्यति मृग्यते हि तत् ॥ ४५ ॥
निवेदितं निश्वसितेन सोष्मणा
मनस्तु मे संशयमेव गाहते।

१४पा०) चतुर्थी। दीप्यमानशशाङ्कतारके प्रदोषे यथा
च्छेति ततो विभूषणापहारेण तव वल्कलधारणं सङ्कच्छ
इति भावः ॥ ४४ ॥

तपःप्रयोजनं निराकर्तुमाह,—

दिवमिति। [दिवम्] स्वर्गम् [प्रार्थयसे] कामयसे [यदि
तर्हि [श्रमः] तपश्चरणप्रयासः [वृथा] निष्फलः यदि स्वर्ग
लप्यसे ततः श्रमं मा कार्षीः। कुतः ? [तव पितुः] हिमव
[प्रदेशाः देवभूमयः] स्वर्गपदार्थाः तवत्या इत्यर्थः। [अ
उपयन्तारम्] वरं प्रार्थयसे तर्हि [समाधिना] तपसा [
लम्] न कर्त्तव्य इत्यर्थः। निषेध्यस्य निषेधं प्रति करणत्व
तृतीया। तथाहि [रत्नम्] कर्तृ [नान्विष्यति] न मृगय
ग्रहीतारमिति शेषः किन्तु [तद्रत्नं मृग्यते] ग्रहीतृभिरि
शेषः। न हि वरार्थं त्वया तपसि वर्त्तितव्यम् किन्तु तं
त्वदर्थमिति भावः ॥ ४५ ॥

यावत्कालावस्थानमेव देव्या उच्छ्वासमाल
मेव च प्रत्युत्तरमनुपलभ्य स्वयमेवाशङ्कयाह,—

निवेदितमिति। [सोष्मणा निश्वसितेन] निश्वासवायु

न दृश्यते प्रार्थयितव्य एव ते
भविष्यति प्रार्थितदुर्लभः कथम् ॥ ४६ ॥
अहो स्थिरः कोऽपि तवेप्सितो युवा
चिराय कर्णोत्पलशून्यतां गते।
उपेक्षते यः श्लथलम्बिनीर्जटाः
कपोलदेशे कलमाग्रपिङ्गलाः ॥ ४७ ॥
मुनिव्रतैस्त्वामतिमात्रकर्शितां

निवेदितम्] चिन्तानुभावेन उष्णोच्छ्वासेन ते वरार्थित्वं सूचितमित्यर्थः। तर्हि किं प्रत्याख्यानेनेत्याह मम इति। [मनस्तु] तथापि [मे संशयमेव गाहते] [illegible] कुतः [ते] तव आत्मना, कर्तरि षष्ठी (२,३,७१पा०) इति षष्ठी। [प्रार्थयितव्यः] प्रार्थयितुमर्हः [एव] [न दृश्यते] [प्रार्थितदुर्लभः] प्रार्थितो दुर्लभः सः [कथम् भविष्यति] नास्त्येवेत्यर्थः ॥४६॥

अथ पतिप्रार्थनामेव सिद्धवत् कृत्वाह,—

अहो इति [अहो] चित्रम् [तव ईप्सितः] काङ्क्षितः [युवा कोऽपि स्थिरः] कठिनः वर्त्तत इति शेषः। कुतः? [यः] युवा [चिराय] चिरात्प्रभृति [कर्णोत्पलशून्यतां गते] प्राप्ते [कपोलदेशे] गण्डस्थले श्लथाः शिथिलबन्धनाः अतएव लम्बिन्यः ताः [श्लथलम्बिनीः] [कलमाः] शालिविशेषाः तेषाम् [अग्राणि] तद्वत् [पिङ्गलाः] [जटाः उपेक्षते] यस्त्वामीदृशीं पश्यन् न व्यथते स नूनं वज्रहृदय इत्यर्थः ॥ ४७ ॥

मुनिव्रतैरिति। [मुनिव्रतैः] चान्द्रायणादिभिः [अति-

दिवाकराप्लुष्टविभूषणास्पदाम्।
शशाङ्कलेखामिव पश्यतो दिवा
सचेतसः कस्य मनो न दूयते॥४८॥
अवैमि सौभाग्यमदेन वञ्चितं
तव प्रियं यश्चतुरावलोकिनः।
करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्त्रमात्मीयमरालपक्ष्मणः॥४९॥
कियच्चिरं श्राम्यसि गौरि! विद्यते

माल्यम्] अलङ्कृतम् [अर्पिताम्] अधीनताम् [दिवाक सूर्येण [आप्लुष्टानि] दग्धानि वातातपसंसर्गान्मृदुत म्लानीभूतानि [विभूषणास्पदानि] भूषणस्थानानि यस्या तवेमाम् अतएव [दिवा] अहनि [शशाङ्करेखामिव] स्थि ताम् [पश्यतः सचेतसः] जीवतः [कस्य] पुंसः [मनः न दूय न परितप्यते अपि तु सर्वस्यैवेत्यर्थः॥४८॥

अवैमीति। [तव प्रियम्] वल्लभम् [सौभाग्यमदेन] सौन्द गर्वेण कर्त्रा [वञ्चितम्] विप्रलब्धम् [अवैमि] वेद्मि। [प्रियः चतुरं मधुरम् अवलोकत इति [चतुरावलोकिनः] [अ लपक्ष्मणः] कुटिलरोम्णः "अरालं वृजिनं जिह्मम्" इ मरः; [अस्य] त्वदीयस्य [चक्षुषः] [आत्मीयम् वक्त्रम्] मु [चिरम् लक्ष्यम्] विषयम् [न करोति] दृष्टिपथं न गच्छ त्यर्थः। तदयं गर्वेण हतः निष्फलाक्षलाभो जात भावः॥४९॥

ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्द्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥५०॥

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्त्तिनीं
विवर्त्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥

कियदिति । हे गौरि ! [कियत्] किम्परिमाणकं किमधिकमित्यर्थः [चिरम् श्राम्यसि] तपस्यसि अत्यन्तसंयोगे (२,३,५पा० सू०) द्वितीया । [ममापि] [पूर्वाश्रमः] प्रथमाश्रमः ब्रह्मचर्य्याश्रमः तत्र [सञ्चितम्] सम्पादितम् [तपः विद्यते] अर्द्धश्चासौ भागश्च तेन [तस्य] तपसः [अर्द्धभागेन] एकदेशेन [काङ्क्षितम्] इष्टम् [वरम्] उपयन्तारम् [लभस्व] [तम् वरम् साधु] सम्यक् [वेदितुम्] ज्ञातुम् [इच्छामि] यद्यसौ योग्यो भवति तदा ममापि सम्मतिरिति भावः ॥५०॥

इतीति । [इति] इत्थम् [द्विजन्मना] द्विजेन [प्रविश्य] अन्तर्गत्वा आप्तवद्रहस्यमुद्घाट्येत्यर्थः । [अभिहिता] उक्ता सा पार्वती [मनोगतम्] हृदिस्थम् वरम् [शंसितुम्] वक्तुं [न शशाक] समर्था नाभूत् लज्जयेति शेषः । [अथो] अनन्तरम् परिपार्श्ववर्त्तिनीं [वयस्याम्] सखीम् [विवर्त्तितम्] विचालितम् [अनञ्जनम्] व्रतचर्य्याद्वर्जितकज्जलं [नेत्रम्] यस्मिन् कर्मणि तत्तथा [ऐक्षत] नेत्रसंज्ञयैव प्रत्युत्तरं वाचयाञ्चकारेत्यर्थः ॥ ५१ ॥

सखी तदीया तमुवाच वर्णिनं
निबोध साधो ! तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥
इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।

सखीति । तस्याः पार्वत्याः इयम् [तदीया सखी] वयस्या [तम्] वर्णः प्रशस्तिरिति क्षीरस्वामी । सोऽस्यास्तीति [वर्णिनम्] ब्रह्मचारिणं वर्णाद्ब्रह्मचारिणीति (५,२,१३४पा॰) इनिप्रत्ययः । [उवाच] ब्रूतेस्म । किमिति । हे [साधो] विद्वन् ! [तव कुतूहलञ्चेत्] श्रोतुमस्तीति शेषः तर्हि [निबोध] अवगच्छ आकर्णयेत्यर्थः । बुध अवगमन इति धातोर्भौवादिकाल्लोट् श्रोतव्यं किन्तदाह,—यस्मै लाभाय इदं [यदर्थम्] अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति वक्तव्यमिति (२,१,३६पा॰ सू) वार्त्तिकनियमात् क्रियाविशेषणम् [एतया] पार्वत्या [अम्भोजम्] पद्मम् [उष्णवारणम्] आतपत्रमिव [वपुः] शरीरम् [तपः साधनम्] [कृतम्] तत्प्रवृत्तिकारणमुच्यते श्रूयतामित्यर्थः ॥ ५२ ॥
"दृङ्मनः सङ्गसङ्कल्पो जागरः कृशताऽरतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति । तत्रास्याः काश्चिद्दशाममनाहत्यैव यो भवति इयमित्यादिभिः षड्भिः श्लोकैः-
इयमिति । [मानिनी] इन्द्राणीप्रभृतीरतिशय्य वर्ति

अरूपहार्य्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥
असह्यहुङ्कारनिवर्त्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्त्तेरपि पुष्पधन्वनः ॥ ५४ ॥

अमित्यभिमानवती [इयम्] पार्वती [अधिश्रियः] अधिकैश्वर्य्यान् [महेन्द्रप्रभृतीन्] इन्द्रादीन् चतसृणाम् दिशामीशान् । इन्द्रवरुणयमकुवेरान् । तद्धितार्थेत्यादिना (२,१,५१ पा०) उत्तरपदसमासः । [अवमत्य] अवधूय [मदनस्य निग्रहात्] निवर्हणाद्धेतोः अकामुकत्वादित्यर्थः । रूपेण सौन्दर्य्येण हार्य्यो वशीकरणीयो न भवतीति [अरूपहार्य्यम्] पिनाकः पाणौ यस्य तम् [पिनाकपाणिम्] हरम् । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति (२,२,३७पा०वा०) साधु ।[पतिम्] भर्त्तारम् [आप्तुमिच्छति ।] एतेन सङ्कल्पावस्था सूचिता ॥५३॥

असह्येति । [पुरा] पूर्वम् [असह्येन] सोढुमशक्येन [हुङ्कारेण] रौद्रेण [निवर्त्तितः] अतएव [पुरारिम्] हरम् [अप्राप्तमुखः] अप्राप्तफलः [विशीर्णमूर्त्तेः] नष्टशरीरस्य [अपि] [पुष्पधन्वनः] कामस्य [शिलीमुखः] वाणः [इमाम्] पार्वतीम् [हृदि] [व्यायत.] सुदूरावगाढ इति यावत् तादृक् [पातः] प्रहारो यस्मिन् कर्मणि तत्तथा [अक्षिणोत्] अक्षणोत् दग्धदेहस्यापि मार्गणोलब्धः, "मृदुः सर्वत्र बाध्यते" इति भावः ।

तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥ ५५ ॥
उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम् ।

अनेन विप्लवती शैलसुतापि भावमित्यवोक्तं (३स० ६८श्लो
चक्षुःप्रीतिमनः सङ्गाख्यमवस्थाद्वयमनन्तरावस्थोपयोगित
अनूद्य कार्श्यावस्था सूचिता ॥ ५४ ॥

तदेति । तदेति छेदः [तदा प्रभृति] तत आरभ्येत्य
सप्तम्यर्थस्यापि दाप्रत्ययस्य पञ्चम्यर्थे लक्षणा प्रभृतियोगे प
मीनियमात् । [पितुर्गृहे उन्मदना] उत्कटमन्मथा, लला
स्यालङ्कारः [ललाटिका] तिलकः । कर्णललाटात् कन् अ
ङ्कारे (४,३,६५ पा०) इति कन्प्रत्ययः । तस्याः [चन्द
धूसराः] धूसरवर्णा [अलकाः] चूर्णकुन्तलाः यस्याः सा
शोका [बाला] पार्वती [जातु] कदाचिदपि [तुषारसङ्घात
सरा घनास्त एव [शिलाः] तासाम् [तलेषु] उपरिभागेष्व
[निर्वृतिम्] सुखम् [न लभते स्म । [एतेनारत्यपरसंज्ञा वि
सविहेषावस्था द्वादशावस्थापदे संज्वरश्च व्यज्यते ॥ ५५ ॥

उपात्तेति । [पिनाकिनः] शम्भोः [चरिते] त्रिपुरवि
यादिचेष्टिते [उपात्तवर्णे] प्रारब्धगीतक्रमे । "गीतक्रमे र
विदे वर्णशब्दः प्रयुज्यते" इति हलायुधः । [सबाष्प] म

अनेकशः किन्नरराजकन्यका
वनान्तसङ्गीतसखीररोदयत् ॥ ५६ ॥

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत।
क्व नीलकण्ठ! व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धना ॥ ५७ ॥

[कण्ठे] [स्खलितैः] विशीर्णैः [पदैः] सुतिक्तरूपैः कारणैः [वनान्ते सङ्गीतेन] निमित्तेन [सखीः] वयस्याः [किन्नरराजकन्यकाः] [अनेकशः] बहुशः [अरोदयत्] अश्रुमोचनमकारयत्। हरचरितगानजनितमदनवेदनामिमां वीक्ष्य किन्नर्योऽपि रुरुदुरिति भावः। अत्र वर्णस्खलनलक्षणकार्यात्तथा पुनः पुनस्तत्कारणीभूतमूर्च्छावस्थाप्रादुर्भावो व्यज्यते अन्यथा सखीरोदनानुपपत्तेरिति। द्वादशावस्थापत्ते तु प्रलापावस्था च व्यज्यते। "प्रलापो गुणकीर्त्तनम्" इत्यालङ्कारिकाः ॥५६॥

त्रिभागेति। क्विन्नेति चार्थः शिष्यत इति शेषः कर्मणि घञ्। [त्रिभ्यो भागेभ्यः शेषासु] अवशिष्टासु। यद्वा रात्रेस्त्रियामत्वेन प्रसिद्धत्वात् तृतीयो भागः त्रिभागः संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वमिष्यते यथा शतांशः सहस्रांश इति [त्रिभागः शेषः] यासां तासु [निशासु क्षणम्] क्षणमात्रम् [नेत्रे निमील्य] मीलयित्वा [सहसा] सद्यः हे [नीलकण्ठ!] [क्व? व्रजसि] कुत्र? गच्छसीति [अलक्ष्या] निर्विषया वाग् वचनं यस्याः सा तथोक्ता तथा [असत्ये] मिथ्याभूते [कण्ठे-

यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम्।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

यदा च तस्याभिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती।

ऽर्पितं बाहुबन्धनम्] यस्याः सा तथा सती [व्यबुध्यत] वि
द्रवती। एतेन जागरोन्मादौ सूचितौ ॥ ५७ ॥

स्वप्नसाक्षात्प्रतिकृतिदर्शनतदङ्गस्पृष्टस्पर्शाख्याश्चत्वारो वि
क्षियां विनोदाः तत्र स्वप्नसन्दर्शनमुक्त्वा प्रतिकृतिदर्शनमाह

यदेति। [यदा] यत इत्यर्थः। यदेति हेताविव्युक्त्वा य
व्याख्याने अस्योदाहृतत्वात्। [त्वम् बुधैः] मनीषिभिः [स
गतः] सर्वव्यापीति [उच्यसे।] तत इत्यध्याहारः। भावे
त्याख्ये तिष्ठतीति। [भावस्थम्] त्वय्यनुरागिणमित्यर्थः [इ
जनम्] इममित्यात्मनिर्देशः। कथं ? न वेत्सि] न जा
सीति [मुग्धया] मूढया अकिञ्चित्करचित्रगतोपालम्भ इ
जानानयेत्यर्थः। तया [स्वहस्तेन] उल्लिखितः चित्रे
खितः] [चन्द्रशेखरः रहसि] एकान्ते सखीमात्रसमक्ष
त्यर्थः। [उपालभ्यत] साधिक्षेपमुक्तश्च। उक्तसमुच्चयार्थ
कारः। यद्यपि रहसीत्युक्तं तथापि सखीसमक्षकरणाल्ल
त्यागो व्यज्यत एव ॥ ५८ ॥

यदेति। [जगत्पतेस्तस्य] ईश्वरस्य [अभिगमे] प्र

तदा सहाभ्याभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।
न च प्ररोहाभिमुखोऽपि दृश्यते
मनोरथोऽस्याः शशिमौलिसंश्रयः ॥ ६० ॥

न वेद्मि स प्रार्थितदुर्लभः कदा
सखीभिरस्रोत्तरमीक्षितामिमाम् ।

अन्यं विधिम्] उपायम् । [विचिन्वती] मृगयमाणा [यदा
लभ्यत् तदा इयम्] पार्वती [गुरोः] पितुः [अनुज्ञया अ-
भाभिः सह तपसे] तपश्चरितुम् [तपोवनं प्रपन्ना] प्राप्ता ॥५९॥

द्रुमेष्विति । [सख्या] पार्वत्या [स्वयं कृतं जन्म] येषां तेषु
स्वयं रोपितेष्वित्यर्थः [तपसः साक्षिषु] साक्षाद् द्रष्टृषु [एषु-
मेषु अपि] [फलं दृष्टम्] लब्धं जनितमित्यर्थः । [अस्याः]
पार्वत्याः [शशिमौलिसंश्रयः] चन्द्रशेखरविषयः [मनोरथस्तु
प्ररोहाभिमुखः] अङ्कुरोन्मुखोऽपि [न दृश्यते] "प्ररोहस्त्वङ्कुर"
इति वैजयन्ती । स्वयं रोपितवृक्षफलकालेऽपि अस्याः मनो-
रथस्य नाङ्कुरोदयोऽप्यस्ति फलाशा तु दूरापास्तेत्यर्थः ॥६०॥

न वेद्मीति । प्रार्थितः सन् दुर्लभः [प्रार्थितदुर्लभः] [सः]
शिवः [तपःकृशाम्] तपसा कृशां क्षीणाम् अतएव [सखीभिः
अस्रोत्तरम्] अश्रुप्रधानं यथा भवति तथा [ईक्षिताम् इमाम्]
[सखीम्] [तस्य] इन्द्रस्य [अवग्रहेण] अनावृष्ट्या [क्षताम्]

[Bengali library stamp, partly legible]

तपःकृशामभ्युपपत्स्यते सखीं
वृषेव सीतां तदवग्रहक्षताम् ॥ ६१ ॥
अगूढसद्भावमितीङ्गितज्ञया
निवेदितो नैष्ठिकसुन्दरस्तया ।
अयीदमेवं परिहास इत्युमा-
मपृच्छदव्यञ्जितहर्षलक्षणः ॥ ६२ ॥

पीड़िताम् । "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" इत्य
मरः । अवग्रहो वर्षप्रतिबन्ध इत्यर्थः । [सीताम्] कृष्टभूम
"सीता लाङ्गलपद्धतिः" इत्यमरः । [वृषा] वासवः [इव] "
सवो वृत्रहा वृषा" इत्यमरः । [कदा अभ्युपपत्स्यते] अनुग्र
ष्यति [न वेद्मि] अत्र वाक्यार्थः कर्म । तदवग्रहक्षतामित
अवग्रहक्षतामित्यनेनैव गतार्थत्वे तत्पदस्य वैयर्थ्यापत्तेः त
ति भिन्नं पदं वेद्मीत्यस्य कर्म इति युक्तमुत्पश्यामः ॥ ६१

अगूढेति । [इङ्गितज्ञया] पार्वतीहृदयाभिज्ञया "इङ्गि
हृगतो भाव" इति सज्जनः । [तया] गौरीसख्या [इति] ए
[अगूढसद्भावम्] प्रकाशितसदभिप्रायं यथा तथा [निवेदि
ज्ञापितः निष्ठामरणमवधिर्यस्य स [नैष्ठिकः] यावज्जीव
चारी [सुन्दरः] विलासी नैष्ठिकश्चासौ सुन्दरश्चेति तयं
द्वयोरन्यतरस्य विशेषणत्वविवक्षायां विशेषणसमासः । ि
नैष्ठिकत्वविशेषणेन कामित्वविरोधः अथवा देवस्य अलौ
कामहिमत्वादुभयं तात्त्विकमिति न विरोधः । [अव्यं
हर्षलक्षणम्] मुखरागादि हर्षलिङ्गं यस्य तथाभूतः

अथाग्रहस्ते मुकुलीकृताङ्गुलौ
समर्पयन्ती स्फटिकाक्षमालिकाम् ।
कथञ्चिदद्रेस्तनया मिताक्षरं
चिरव्यवस्थापितवागभाषत ॥ ६३ ॥

यथा श्रुतं वेदविदां वर ! त्वया
जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।

अयि गौरि ! अयीति कोमलामन्त्रणे [इदम्] त्वत्सखी-
भाषितम् [एवम्] सत्यं किमित्यर्थः । [परिहासः] केलिर्वा ।
"द्रवकेलिपरिहासाः" इत्यमरः । [इत्येवमुमामपृच्छत्] पृष्ट-
वान् ॥ ६२ ॥

अथेति । [अथ] अनन्तरम् [अद्रेस्तनया] पार्वती [मुकुली-
कृताङ्गुलौ] सम्पुटीकृताङ्गुलौ अग्रश्चासौ हस्तश्चेति समाना-
धिकरण समासः । हस्ताग्राग्रहस्तयोर्गुणगुणिनोर्भेदाभेदाभि
धानतः । तस्मिन् [अग्रहस्ते] [स्फटिकानामक्षमालिकाम्]
जपमालिकाम् [अर्पयन्ती] आमुञ्चन्ती [कथञ्चित्] महता
कष्टेन [चिरव्यवस्थापितवाक्] चिरेण स्वीकृतवाक् एतेन
लज्जोपरोधो व्यज्यते । [मिताक्षरम्] परिमितवर्णं यथा
तथा [अभाषत] बभाषे ॥ ६३ ॥

किमुवाचेत्याह,—

यथेति । हे [वेदविदां वर !] वैदिकश्रेष्ठ ! [त्वया यथा
श्रुतम् ।] सम्यक् श्रुतम् । श्रुतार्थमेवाह [अयं जनः] स्वयमि-
त्यर्थः [उच्चैःपदस्य] शिवलाभरूपोन्नतस्थानस्य [लङ्घने] प्राप्त-
णे [उत्सुकः] । किमप्राप्यमित्याह [इदन्तपः] तद्वाप्तिः

तपः क्विवेदं तदवाप्तिसाधनं
मनोरथानामगतिर्न विद्यते ॥ ६४ ॥
अथाह वर्णी विदितो महेश्वर-
स्तदर्थिनी त्वं पुनरेव वर्त्तसे ।
अमङ्गलाभ्यासरतिं विचिन्त्य तं
तवानुवृत्तिं न च कर्त्तुमुत्सहे ॥ ६५ ॥
अवस्तुनिर्बन्धपरे ! कथं नु ते

तस्य उच्चैः पदस्य [अवाप्तेः] प्राप्तेः, [साधनं किल] । किले-त्यलीके । अतितुच्छत्वादसाधकमेवेत्यर्थः । तर्हि त्यज्यतामि-त्याशङ्क्य दुराशा मां न मुञ्चतीत्याशयेनाह [मनोरथानाम्] कामानाम् [अगतिः] अविषयाः [न विद्यते] न हि स्वशक्ति पर्य्यालोचनया कामाः प्रवर्त्तन्त इति भावः ॥ ६४ ॥

अथेति । [अथ वर्णी] ब्रह्मचारी । "वर्णिनो ब्रह्मचारिण इत्यमरः । [आह] उवाचेत्यर्थः । आहेति भूतार्थे लट्प्रयोगं भ्रान्तिमूलमित्याह वामनः । किमित्याह [महेश्वरः] महादेवः [विदितः] त्वया ज्ञायत इत्यर्थः बुद्धार्थत्वाद्वर्त्तमाने क्तप्रत्ययः । येन त्वं प्राक् भग्नमनोरथा कृतेति भावः । [पुनरेव त्वम्] तमीश्वरमर्थयते [तदर्थिन्येव] तत्कामैव प्रवर्त्तसे तत्प्रभावमनुभूयापीति भावः । अनुसरणे को दोषस्तत्राह [अमङ्गलाभ्यासे] अमङ्गलाचारे रतिर्यस्य [तम्] तथोक्तमीश्वरम् [विचिन्त्य] विचार्य्य [तव] [अनुवृत्तिम्] अनुसरणम् [कर्त्तुं नोत्सहे] नाहमनुमन्तुं शक्नोमीत्यर्थः ॥ ६५ ॥

करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥
त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

अवस्त्विति । अवस्तुनि तुच्छवस्तुनि निर्बन्धः अभिनिवेशः परं प्रधानं यस्याः तस्याः सम्बुद्धिः [अवस्तुनिर्बन्धपरे !] पार्वति ! [आमुक्तम्] आसञ्जितम् [विवाहे] यत् [कौतुकम्] हस्तसूत्रं तद्यस्य सः [ते अयं करः] । "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहले" इति यादवः । [वलयीकृताहिना] भूषणीकृतसर्पेण [शम्भोः] महादेवस्य [करेण] कारणभूतेन तत् एव प्रथमम् [तत्प्रथमम्] अपरिचितत्वादतिभयङ्करमिति भावः । तच्च तत् [अवलम्बनम्] ग्रहणञ्चेति [कथं नु सहिष्यते] न कथञ्चिदपि ? सहिष्यत इत्यर्थः । अन्यतो वास्तु तद्दूरेऽवतिष्ठतां प्रथमं करग्रह एव दुःसह इति भावः ॥६६॥

त्वमेवेति । हे गौरि ! [त्वमेव स्वयम्] आत्मना [तावत्] इति मानार्थे । (यावत्तावत् विचारेऽवधौ तावत् साकल्यमवधिः । इदमेवोदाहरणमत्र मन्यामहे) [परिचिन्तय] पर्यालोचय । किमिति ? [कलहंसलक्षणम्] कलहंसचिह्नम् । "चिह्नं लक्ष्म च लक्षणम्" इत्यमरः । वध्वाः नवोढायाः दुकूलम् [वधूदु-

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥

कूलम्] "वधूः स्नुषा नवोढा स्त्री" इति विश्वः । तथ [शोणितबिन्दून् वर्षति] इति तच्छीलम् आर्द्रमित्यर्थः [गजाजिनञ्च] कृत्तिवासश्च तत् पिनाकिन इत्याशयः । [एते कदाचित्] कदाचिदपि [योजनम्] सङ्गतिम् [अर्हतो यदि ?] अर्हतः किम् ? नार्हत एवेति पूर्वेणान्वयः । पाणिग्रहणका [illegible] क्रियते कृत्तिवाससा पाणिपीडने दुकूल [illegible] कार्यं न घटिष्यत इति भावः ॥ ६७ ॥

चतुष्केति । [चतुष्के] गृहविशेषे [पुष्पप्रकरः] तत्र [अवकीर्णयोः] व्याप्तयोः कुसुमास्तृतदिव्यभवनभूसञ्चारोचितयोरित्यर्थः । [तव पादयोः] सम्बन्धीनि [अलक्तकाङ्कानि] लाक्षारञ्जितानि [पदानि] [illegible] । "पदं शब्दे वाक्ये च व्यवसायापदेशयोः । पादतच्चिह्नयोः" इति विश्वः [विकीर्णकेशासु] विक्षिप्ताः [केशाः] [illegible] यासु तासु [परेतभूमिषु] [illegible] (२) [illegible] (४, १, [illegible]) इति [illegible] [परेतभूमिषु] [illegible] । [परो

(१) [illegible]
[illegible]

वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद्बालमृगाक्षि! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥

"कन्या वरयते रूपं माता वित्तं पिता श्रुतम्। बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः" इति लोकानामाभाषणम्। तत्र किञ्चिदपि नास्तीत्याह,—

वपुरिति। [वपुः] तावदस्य विरूपाणि विकृतरूपाणि अक्षीणि नेत्राणि यस्य तत् [विरूपाक्षम्]। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (५,४,११३ पा०) इति षच्प्रत्ययः। वैरूप्यञ्च त्रिनेत्रत्वादिति क्षीरस्वामी। अतो न सौन्दर्यवार्त्तापीत्यर्थः। [अलक्ष्यम्] अज्ञातं [जन्म] यस्य तस्य भावस्तत्ता कुलमपि न ज्ञायत इत्यर्थः। अलक्षिता जनिरिति पाठे जनिः उत्पत्तिः अलक्षिता न ज्ञाता। "जनिरुत्पत्तिरुद्भव" इत्यमरः। [वसु] वित्तम् [दिगम्बरत्वेनैव निवेदितम्] नास्तीति ज्ञापितमित्यर्थः। यदि वित्तं भवति तदा कथं दिगम्बरो भवति अतो ज्ञेयं निर्धनोऽयमिति। किं बहुना हे [बालमृगाक्षि!] पार्वति! [वरेषु] वोढृषु। "वरो जामातृवोढारौ" इति विश्वः। [यत्] रूपवित्तादिकम् [मृग्यते] कन्यातद्बन्धुभिरन्विष्यते [तत् त्रिलोचने] त्र्यम्बके [व्यस्तम्] एकमपि समस्तं मा भूदिति भावः [अस्ति किम्?] नास्त्येवेत्यर्थः ॥ ७२ ॥

निवर्त्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया॥ ७३॥

इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्य्यगुपान्तलोहिते॥ ७४॥

निवर्त्तयेति। [अस्मादसदीप्सितात्] अनिष्टमनोरथात् [मनः निवर्त्तय] निवारय [सा] पूर्वोक्ता [विधा] प्रकारो यस्य तथोक्तः अमङ्गलशील इत्यर्थः [क्व?] महदन्तरमित्यर्थः [पुण्य-लक्षणा] प्रशस्तभाग्यचिह्ना [त्वञ्च क्व?] अतो न तवायमर्ह इत्यर्थः। तथाहि [साधुजनेन।] "साधुर्वार्द्धुषिके चारौ सज्जने चाभिधेयवत्" इति विश्वः। [श्मशानशूलस्य] श्मशा-नभूमिनिखातस्य वध्यशङ्कोः [वैदिकी] वेदोक्ता यूपो नाम पशुबन्धनसाधनभूतः संस्कृतदारुविशेषः। तस्य [सत्क्रिया] प्रोक्षणाभ्युक्षणादिसंस्कारः [यूपसत्क्रिया] [नापेक्ष्यते] नेष्यते। यथा श्मशानशूले यूपसत्क्रिया न क्रियते तथा त्वमपि तस्मै न घटसे इति तात्पर्य्यार्थः॥ ७३॥

इतीति। [इति] एवंप्रकारेण [द्विजातौ] द्विजे [प्रतिकू-लवादिनि] सति [प्रवेपमानेन] चञ्चलेन [अधरेण] अध-रोष्ठेन [लक्ष्यः] अनुमेयः [कोपः] क्रोधः यस्याः तथोक्तया

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥
इयञ्च तेऽन्या पुरतोविडम्बना
यदूढया वारणराजहार्य्यया ।

…रपि [को ? नाम अनुमन्यते] न कोऽपीत्यर्थः । नामेति …सायाम् । पिनाकपाणिपाणिग्रहणे तस्य परेतभूसञ्चारि… …न साहचर्य्यात्तवापि तत्र सञ्चारोऽवश्यम्भावीति भावः ॥ ६८ ॥

अयुक्तेति । [त्रिनेत्रवक्षः] त्र्यम्बकालिङ्गनमित्यर्थः । [तव] …सम्बन्धितया [सुलभमपि] सुप्रापञ्च भवतीति शेषः । त… …ति शेषे षष्ठी । न लोकाव्ययेत्यादिना क्वचीगलक्षणषष्ठ्या …षेधात् (१) । [अतःपरम्] अस्मात्त्रिनेत्रवक्षोलाभादन्यत् …युक्तरूपम्] अत्यन्तायुक्तम् [किं ? वद] न किञ्चिदित्यर्थः । …शंसायां रूपविति (५,३,६६ पा०) रूपप्प्रत्ययः । कुतः ? …त्] यस्मात्कारणात् [हरिचन्दनास्पदे] हरिचन्दनस्य आस्पदे …नभूते [अस्मिन् स्तनद्वये] [चिता भस्म] श्मशानभस्म त… …व [रजः] चूर्णं कर्तृ [पदं करिष्यति] पदं निधास्यति भर्त्तु… …वस्य भस्माङ्गरागादिति भावः ॥ ६९ ॥

इयमिति । [इयञ्च ते] तव [पुरतः] आदावेव [अन्या …डम्बना] परिहास इत्यर्थः का सेत्यत्राह,—[ऊढया] परि…

(१) अत्र स्थले खलर्थयोगे षष्ठीनिषेधात् ।

विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥
इयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।
कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥

णीतया । वहेः कर्मणि क्तः । वारणराजहार्य्यया] गजे
वाह्यया त्वया अधिष्ठितम्] आरूढं वृद्धमुक्षाणम् [वृद्धोक्षम्
अचतुरेत्यादिना (५,४,७७पा०) निपातः । [विलोक्य मह
जनः] साधुजनः [स्मेरमुखः] स्मितमुखः [भविष्यति] उपहसि
ष्यति यत्, इयमिति पूर्वेण सम्बन्धः । स्मेरेति नमिकम्पिस्म
जसेत्यादिना (३,२,१६७पा०) रप्रत्ययः ॥ ७० ॥

इयमिति । [पिनाकिनः] ईश्वरस्य [समागमप्रार्थनया
प्राप्ति कामनया क्रियमाणयेतिशेषः । [सम्प्रति इयं शोच
नीयताम्] शोच्यत्वम् [गतम्] ।] किन्तदाह,—[सा] प्रागि
हरशिरोगता । अत्र अतिप्रसिद्धार्थत्वान्न यच्छब्दापेक्षा तदु
क्तप्रकाशे । "प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यदु
पादानं नापेक्षते" इति । [कान्तिमतः] नित्ययोगे मतुप्
[कलावतः] चन्द्रस्य [कला] षोड़शो भागश्च [अस्य लोकस्य
नेत्रकौमुदी] नेत्रानन्दिनीत्यर्थः [त्वञ्च] । कान्तिमत्त्वनेत्रकौ
मुदीत्वविशेषणयोरुभयत्रान्वयः । प्रागेकैव शोच्या सम्प्रति
द्वे अपीत्यर्थः शोच्यत्वञ्च निकृष्टाश्रयणादिति भावः ॥ ७१ ॥

उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं
द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥ ७५ ॥
विपत्प्रतीकारपरेण मङ्गलं
निषेव्यते भूतिसमुत्सुकेन वा

[तया] पार्वत्या [उपान्तलोहिते] प्रान्तरक्ते [विलोचने] [विकुञ्चिते] कुटिलिते [भ्रूलते] यस्मिन् तत्तथा सभ्रूभङ्गमित्यर्थः । [तिर्यक्] साचि [आहिते] निहिते अनादरात्तिर्यगैक्ष्यतेत्यर्थः ॥ ७४ ॥

उवाचेति । अथ [एनम्] ब्रह्मचारिणम् [उवाच च ।] किमिति ? [परमार्थतः] तत्त्वतः [हरं न वेत्सि] न जानासि [नूनम्] । कुतः ? [यतः माम् एवम्] उक्तया रीत्या [आत्थ] ब्रवीषि । ब्रुवः पञ्चानामादित: (३,४,८४ पा०) इति रूपसिद्धिः । अज्ञानादेवायं शिवद्वेषस्तवेत्याशयेनाह,—[मन्दाः] मूढाः । "मूढाल्पापटुनिर्भाग्या मन्दाः" इत्यमरः । लोकसामान्यम् इतरजनसाधारणं न भवतीति [अलोकसामान्यम्] [अचिन्त्यहेतुकम्] दुर्बोधकारणम् [महात्मनाञ्चरितम्] [द्विषन्ति] हेत्वपरिज्ञानात् दूषयन्ति । विद्वांसस्तु कोऽप्यत्र हेतुरस्तीति बहु मन्यन्त इत्यर्थः ॥ ७५ ॥

अमङ्गल्यशीलस्त्वमित्याद्युक्तं (६५ श्लोकादिषु) दूषणजातं विपदित्यादिभिः बहुभिः श्लोकैः परिहर्तुमारभते,

विपदिति । [विपत्प्रतीकारपरेण] अनर्थपरिहारार्थि-

जगच्छरण्यस्य निराशिषः सतः
किमेभिराशोपहतात्मवृत्तिभिः ॥ ७६ ॥
अकिञ्चनः सन् प्रभवः स सम्पदां
त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्य्यते
न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७

नेत्यर्थः । उपसर्गस्य घञ्यमनुष्येषु बहुलमिति (६,३,१२२ पा०) दीर्घः । [भूतिसमुत्सुकेन] ऐश्वर्य्यकामेन [वा मङ्गल गन्धमाल्यादिकम् [निषेव्यते ।] शरणे रक्षणे साधुः शरण्यः तत्र साधुरिति (४,४,९८ पा०) यत्प्रत्ययः । "शरणं गृह क्षित्रोः" इत्यमरः । जगतः शरण्यः तस्य [जगच्छरण्य निराशिषः] निरभिलाषस्य [सतः] शिवस्य । "आशीरुरग द्रायां विप्रवाक्याभिलाषयो" इति शाश्वतः । [आशया] तृष्णया [उपहता] दूषिता [आत्मवृत्तिः] अन्तःकरणवृत्ति येषां तैः [एभिः] मङ्गलैः किम् ?] व्यर्थेत्यर्थः । पूर्वं मङ्ग मित्येकवचनस्य जात्यभिप्रायत्वादेभिरिति बहुवचनेन प मर्शो न विरुध्यते । इष्टावाप्त्यनिष्टपरिहारार्थिनो हि म लाचारनिर्बन्धः तदुभयासंस्पृष्टस्य तु यथाकथञ्चिदासां दोष ? इत्यर्थः । एतेनामङ्गलाभ्यासरतिमित्युक्तं (६५ श्लो प्रत्युक्तम् ॥ ७६ ॥

अकिञ्चन इति । [सः] हरः न विद्यते किञ्चन द्रव्यं स [अकिञ्चनः] दरिद्रः [सन् सम्पदाम्] प्रभवत्यस्मादि [प्रभवः] कारणम् [पितृसद्मगोचरः] श्मशानाश्रयः सन्

विभूषणोद्भासि पिनद्धभोगि वा
गजाजिनालम्बि दुकूलधारि वा ।
कपालि वा स्यादथ वेन्दुशेखरं
न विश्वमूर्त्तेरवधार्य्यते वपुः ॥ ७८ ॥

ाणां लोकानां नाथः] तद्धितार्थेत्यादिना (२,१,५१ पा०) ्तरपदसमासः । [सः] देवः [भीमरूपः] भयङ्कराकारः ान् [शिवः] सौम्यरूपः [इत्युदीर्य्यते] उच्यते । अतः [पिना- कनः] हरस्य यथाभूतोऽर्थः यथार्थः तस्य भावः [याथार्थ्यम्] त्त्वं तस्य [विदः न सन्ति ।] लोकोत्तरमहिम्नो निर्लेपस्य था कथञ्चिदवस्थानं न दोषायेति भावः । एतेन अवस्तु- निर्बन्धपरे इति (६६) श्लोकोक्तं परिहृतं वेदितव्यम् ॥ ७७ ॥

देवस्य लौकिकमलौकिकञ्च प्रसाधनं नास्तीत्याशयेनाह,–

विभूषणेति । विश्वं मूर्त्तिर्यस्येति [विश्वमूर्त्तेः] अष्ट- मूर्त्तेः शिवस्य [वपुः] शरीरं भूषणैरुद्भासत इति [भूषणो- ासि स्यात्] [पिनद्धभोगि] आसुक्तभुजङ्गमम् [वा स्यात्] । पिनद्धेति नह्यतेरपिपूर्वात्कर्मणि क्तः "वष्टि भागुरिरल्लोपम- ाप्योरुपसर्गयोः" इति अकारलोपः । [गजाजिनालम्बि] स्यात् अथ [वा दुकूलधारि] स्यात् । कपालमत्रास्तीति [क- पालि] ब्रह्मशिरःकपालशेखरम् । [वा स्यात्] [इन्दुशेखरम् वा स्यात्] [नावधार्य्यते] सर्वं सम्भवतीत्यर्थः । एतेन त्वमेव तावदिति (६७) श्लोकोक्तं प्रत्युक्तमिति ज्ञेयम् ॥ ७८ ॥

तदङ्गसंसर्गमवाप्य कल्पते
ध्रुवं चिताभस्मरजो विशुद्धये ।
तथाहि नृत्याभिनयक्रियाच्युतं
विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥
असम्पदस्तस्य वृषेण गच्छतः
प्रभिन्नदिग्वारणवाहनो वृषा ।

अयुक्तरूपं किमतः परं वदेति ६९ श्लोकोक्तं प्रत्याह,— तदङ्गेति । [तस्य] शिवस्य [अङ्गम्] तस्य [संसर्गम् अवाप्य] आसाद्य [चिता भस्मैव रजः विशुद्धये [कल्पते] अलं पर्य्याप्नोतीत्यर्थः । अलमर्थयोगान्नमःस्वस्तिस्वाहेत्यादिना (२, ३, १६ पा०) चतुर्थी । ध्रुवम्] शोधकत्वं प्रमाणसिद्धमित्यर्थः । प्रमाणमेवाह,—[तथा हि] प्रसिद्धमेवेत्यर्थः । [नृत्ये] ताण्डवे यः [अभिनयः] अर्थव्यञ्जकचेष्टाविशेषः स एव [क्रिया] तया निमित्तेन [च्युतम्] पतितं चिताभस्मरज इति शेषः [अम्बरौकसाम्] देवानाम् [मौलिभिः विलिप्यते] ध्रियते । अशुद्धं चेत् कथमिन्द्रादिभिर्ध्रियेतेत्यर्थापत्तिरनुमानं वा प्रमाणमित्यर्थः ॥ ७९ ॥

यदुक्तं दिगम्बरत्वेन निवेदितं वसु (२७ श्लो०) इयञ्च तेऽन्या पुरतो विडम्बनेत्यादि (७० श्लो०) च तत्रोत्तरमाह— असम्पद इति । [प्रभिन्नः] मदस्रावी [दिग्वारणः] दिग्गजः [वाहनम्] यस्य सः ऐरावतेनोढ इत्यर्थः । [वृषा] देवेन्द्रः [असम्पदः] दरिद्रस्य [वृषेण गच्छतः] वृषभारूढस्य

करोति पादावुपगम्य मौलिना
विनिद्रमन्दाररजोऽरुणाङ्गुली ॥ ८० ॥

विवक्षता दोषमपि च्युतात्मना
त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
कथं सलक्ष्यप्रभवो भविष्यति ॥ ८१ ॥

अलं विवादेन यथा श्रुतस्त्वया

नस्य] ईश्वरस्य [पादौ मौलिना] मुकुटेन [उपगम्य] प्रणम्ये-
त्यर्थः । [विनिद्राणाम्] विकसितानाम् [मन्दाराणाम्] कल्प-
रुकुसुमानाम् [रजोभिः] परागैः [अरुणाः अङ्गुलयः]
योस्तौ तथोक्तौ [करोति] । दिग्गजारोहिणाम् इन्द्रादीना-
पि वश्यस्य इन्दुमौलेः किं ? सम्पदा, वृषारोहणे वा को ?
ोष इत्यर्थः ॥ ८० ॥

यदुक्तम् अलक्ष्यजन्मतेति (७२ श्लो०) तत्रोत्तरमाह,—

विवक्षतेति । [च्युतात्मना] नष्टस्वभावेन अतएव [दोषम्]
षणम् [विवक्षता] वक्तुमिच्छतापि [त्वया ईशं प्रति एकम्]
लक्ष्यजन्मतेत्येतदेकं वच इत्यर्थः । [साधु भाषितम्] सम्य-
क्तं कुतः ? [यम्] ईश्वरम् [आत्मभुवोऽपि] ब्रह्मणोऽपि ।
ब्रह्मात्मभूः सुरज्येष्ठ" इत्यमरः । [कारणमामनन्ति] उदा-
रन्ति विद्वांस इति शेषः । पाघ्राध्माख्याम्नादाणित्यादिना
,३,७८पा०) मनादेशः । [सः] ईश्वरः कथम् ? [लक्ष्यप्रभवः]
क्ष्यजन्मा [भविष्यति] । अनादिनिधनस्य भगवतः कारण-
ज्ञाकलङ्कस्य नाभिष्यत इत्यर्थः ॥ ८१ ॥

तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥
निवार्य्यतामालि ! किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥८३

अलमिति । अथ वा [विवादेन] कलहेन [अलम् त्वया
यथा] येन प्रकारेण [सः] ईश्वरः [श्रुतः] [अशेषम्] कात्स्न्र्येन
[तथाविधः] तावत्प्रकार एव [अस्तु] । [मम मनः] तु [अत्र
ईश्वरे [भावः] शृङ्गारः [एकः] अद्वितीयः [रसः] आस्वादो
यस्य तत् [तथा स्थितम्] । तथाहि [कामवृत्तिः] स्वेच्छाव्य
वहारी [वचनीयम्] अस्थानसङ्गापवादम् [नेक्षते] न विचा-
रयति । न हि स्वेच्छासञ्चारिणो लोकापवादाद्बिभ्यतीति
भावः ॥ ८२ ॥

निवार्य्यतामिति । हे [आलि !] सखि ! "आलिः सखी
वयस्या च" इत्यमरः । [स्फुरितोत्तराधरः] स्फुरणभूयिष्ठोष्ठः
[अयं वटुः] माणवकः [पुनः] [किमपि विवक्षुः] वक्तुमिच्छुः
ब्रुवः सनन्तादुप्रत्ययः । [निवार्य्यताम् ।] तर्हि वक्तुमेव कथं
न ददासीत्याह,—तथाहि [यो महतः] पूज्यान् [अपभाषते]
अपवदति [न केवलम्] [स पापभाग्] भवतीति शेषः । अत्र
स्मृतिः । गुरोः यत्र परीवादो न श्रोतव्यः कथञ्चन । कर्णौ
तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत इति किन्तु [तस्मात्]

इतो गमिष्याम्यथ वेति वादिनी
चचाल बाला स्तनभिन्नवल्कला।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः॥ ८४॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ॥८५॥

महतामपवादकात् [यः शृणोति] महदपवादकवाक्यमिति शेषः [सः अपि] पापभागित्यनुषज्यते॥ ८३॥

सम्प्रति गन्तव्यपक्षमाश्रयते,—

इत इति। [अथ वा इतः] अन्यत्र [गमिष्यामीति वादिनी] वदन्ती [स्तनाभ्यां भिन्नवल्कला] रयवशात् कुचस्रस्तचीरा [बाला] पार्वती [चचाल]। [वृषराजकेतनः] वृषभध्वजश्च [स्वरूपमास्थाय] निजरूपमाश्रित्य [कृतस्मितः] सन् [ताम्] पार्वतीम् [समाललम्बे] जग्राह॥ ८४॥

तमिति [तम्] देवम् [वीक्ष्य वेपथुमती] कम्पवती [सरसाङ्गयष्टिः] खिन्नगात्री महादेवदर्शनेन देव्याः सात्त्विकभावोदय उक्तः [निक्षेपणाय] अन्यत्र विन्यासाय [उद्धृतम्] उत्क्षिप्तम् [पदम्] अङ्घ्रिम् [उद्वहन्ती] [शैलाधिराजतनया] पार्वती [मार्गे अचलः] तस्य [व्यतिकरेण] समाहत्या अवरोधेनेति यावत्। [आकुलिता] सम्भ्रमिता [सिन्धुः] नदी

अद्य प्रभृत्यवनताङ्गि ! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥८६॥

इति श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये
तपःफलोदयो नाम पञ्चमः सर्गः ॥ ५ ॥

[इव] । "देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्" इत्यमरः । [न ययौ न तस्थौ] लज्जयेति भावः । वसन्ततिलकावृत्तमेतत् ॥ ८५ ॥

अद्येति । [चन्द्रमौलौ] शिवे हे [अवनताङ्गि !] पार्वति ! [अद्य प्रभृति] अस्माद्दिनादारभ्येत्यर्थः । प्रभृतियोगादद्येति सप्तम्यर्थवाचिना पञ्चम्यर्थो लक्ष्यते । [तव] [तपोभिः] [क्रीतः] । दाञ्ड् दाने दासते आत्मानं ददातीति [दासः अस्मि] [इति] [वादिनि] वदति सति । [सा] देवी [अह्नाय] सपदि । "झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुतम्" इत्यमरः । [नियमजम्] तपोजन्यम् [क्लमम्] क्लेशम् [उत्ससर्ज] फलप्राप्त्या क्लेशं विसस्मारेत्यर्थः तथा [हि] क्लेशः [फलेन] फलसिद्ध्या [पुनर्नवतां विधत्ते] पूर्ववदेवाक्लिष्टतामापादयतीत्यर्थः । सफलः क्लेशो न क्लेश इति भावः ॥ ८६ ॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरि-
विरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनी
समाख्यायां पञ्चमः सर्गः ॥ ५ ॥

षष्ठः सर्गः।

—००—

अथ विश्वात्मने गौरी सन्दिदेश मिथः सखीम्।
दाता मे भूभृतां नाथः प्रमाणीक्रियतामिति॥१
तया व्याहृतसन्देशा सा बभौ निभृता प्रिये।
चूतयष्टिरिवाभ्यासे मधौ परभृतोन्मुखी॥२॥

अथेति। [अथ] देवदेवानुग्रहानन्तरम् [गौरी] पार्वती विश्वम् आत्मा स्वरूपं यस्येति विश्वस्य आत्मेति वा [विश्वात्मने] शिवाय [मिथः] रहसि। "मिथोऽन्योन्यं रहस्यपि" इत्यमरः। [सखीं सन्दिदेश] अतिससर्ज्ज। क्रियामात्रप्रयोगेऽपि (१) सम्प्रदानत्वाच्चतुर्थी किमिति [भूभृतां नाथः] हिमवान् [मे] मम [दाता] सन् [प्रमाणीक्रियताम्] दातृत्वेन प्रमाणीक्रियतामित्यर्थः। प्रार्थनायां लोट्। पित्रा दीयमानायाः परिग्रहो मम महाननुग्रह इति भावः॥ १॥

तयेति। [तया] सख्या सखीमुखेनेत्यर्थः [व्याहृतसन्देशा] उक्तवाचिका [प्रिये] हरविषये [निभृता] निश्चला परमासक्तेत्यर्थः [सा] गौरी [मधौ] वसन्ते निभृता स्थिरा परभृतया कोकिलया उन्मुखी मुखरा [परभृतोन्मुखी।] मुखशब्देन

---

(१) कर्मणा यमभिप्रैति (१,४,२२पा०) सूत्रे कर्मशब्देन क्रियाया अपि ग्रहणात् क्रियया यमभिप्रैतीति तत्र सूत्रव्याख्यानात्सिद्धे क्रियाशब्दस्य सम्बन्धादुपलक्षणाच्च सम्प्रदानसंज्ञा।

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम्।
ऋषीन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः॥३॥
ते प्रभामण्डलैर्व्योम द्योतयन्तस्तपोधनाः।
सारुन्धतीकाः सपदि प्रादुरासन् पुरः प्रभोः॥४॥

अभिभाषणव्यापारो लक्ष्यते। तथा च परभृतामुखेन व्याहरन्तीत्यर्थः परभृतेति क्रियाशब्दविवक्षायां जातिरस्त्रीति (४,१,६३पा०) ङीप्प्रत्ययो न भवति। तयेत्युपमेयस्य व्यस्तत्वादुपमानस्य परभृताशब्दस्य समासः सोढव्यः। अथ वा भृञ्हरणं (३,२,१०८पा० वा०) सम्पदादित्वात् क्विप्। परैर्भृत् यस्यास्तया परभृता इति व्यासेन व्याख्येयम्। पदमञ्जरीकारस्तु परैर्भ्रियत इति कर्मणि क्विपमाह। [चूतयष्टिः] चूतशाखेव [अभ्यासे] अन्तिके [बभौ]। "सदेशाभ्याससविधसमर्थ्यादसवेशवत्। उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्" इत्यमरः॥ २॥

स इति। [स] प्रकृतः। शास्तीति शासनः। (१) बहुलग्रहणात् कर्त्तरि ल्युट्। [स्मरस्य शासनः] ईश्वरः [तथेति प्रतिज्ञाय] तथा करिष्यामीत्युक्त्वेत्यर्थः। [उमाम् कथमपि] कृच्छ्रेण [विसृज्य] तत्र गाढानुरागत्वादिति भावः। [ज्योतिर्मयान्] तेजोरूपान् [सप्तर्षीन्] अङ्गिरःप्रभृतीन् [सस्मार] स्मृतवान्॥ ३॥

तइति। [ते] तप एव धनं येषान्ते [तपोधनाः] सप्तर्षयः [प्रभामण्डलैः] तेजःपुञ्जैः [व्योम] आकाशम् [द्योतयन्त

(१) कृत्यल्युटोबहुलम् (३,३,११३पा०) इति सूत्रे इति शेषः।

आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु ।
व्योमगङ्गाप्रवाहेषु दिङ्नागमदगन्धिषु ॥५॥
मुक्तायज्ञोपवीतानि बिभ्रतो हैमवल्कलाः ।
रत्नाक्षसूत्रा प्रव्रज्यां कल्पवृक्षा इवाश्रिताः ॥६॥

प्रकाशयन्तः अरुन्धत्या सह वर्त्तन्त इति [सारुन्धतीकाः] सन्तः । नद्यृतश्चेति (५,४,१५३पा०) कप् । [सपदि प्रभोः] ईश्वरस्य [पुरः] पुरोभागे [प्रादुरासन्] प्रत्यक्षा बभूवुः ॥४॥

इतः परं षड्भिः श्लोकैस्तानेव मुनीन् वर्णयति,—आप्लुता इत्यादिभिः । उत्किरन्ति विक्षिपन्तीत्युत्किराः इगुपधेत्यादिना (३,१,१३५ पा०) कप्रत्ययः । [तीरे] ये [मन्दाराः] कल्पवृक्षाः तेषाम् [कुसुमानाम् उत्किराः वीचयः] तरङ्गाः येषां तेषु [दिङ्नागानाम्] दिग्गजानाम् [मदगन्धः] येष्विति तथोक्तेषु [व्योमगङ्गाप्रवाहेषु] आकाश गङ्गास्रोतःसु [आप्लुताः] स्नाताः ॥ ५ ॥

मुक्तेति । [मुक्तानाम्] मौक्तिकानाम् [यज्ञोपवीतानि] मुक्तामयानि तानीत्यर्थः [बिभ्रतः] दधानाः हैममयानि वल्कलानि येषां ते [हैमवल्कलाः ।] रत्नमयानि अक्षसूत्राणि येषान्ते [रत्नाक्षसूत्राः] । [प्रव्रज्याम्] प्रव्रजनम् । व्रजयजोर्भावे क्यबिति (३,३,९८पा०) क्यप् । [आश्रिताः कल्पवृक्षा इव] स्थिताः । अत्र चतुर्थाश्रमवाचिना प्रव्रज्याशब्देन वानप्रस्थाश्रमो लक्ष्यते "जहुः परिग्रह व्रीड़ां प्राजापत्यास्तपस्विन" इति (६स० ३४श्लोके) सपत्नीकत्वाभिधानात् "सुतविन्यस्त-

अधःप्रस्थापिताश्वेन समावर्जितकेतुना।
सहस्ररश्मिना साक्षात् सप्रणाममुदीक्षिताः ॥७॥
आसक्तबाहुलतया सार्द्धमुद्धृतया भुवा।
महावराहदंष्ट्रायां विश्रान्ताः प्रलयापदि ॥८॥
सर्गशेषप्रणयनाद्विश्वयोनेरनन्तरम्।
पुरातनाः पुराविद्भिर्धातार इति कीर्त्तिताः॥९॥

पत्नीकस्तया वानुगतोऽपि सन्" इति वानप्रस्थस्योभयथा स्मरणात् ॥ ६ ॥

अध इति। [अधः प्रस्थापिताश्वेन] सूर्य्यमण्डलोपरिवर्त्तित्वात् सप्तर्षिमण्डलस्येति भावः। [समावर्जितकेतुना] तन्मण्डलाघातशङ्कया नामितध्वजेन [सहस्ररश्मिना] सूर्य्येण [साक्षात्] स्वयमेव [सप्रणामम् उदीक्षिताः] गमनाभ्यनुज्ञादानपर्य्यन्तमित्यर्थः। भगवतः सूर्य्यस्याप्युपास्या इति भावः॥७॥

आसक्तेति। पुनः किंविधाः [प्रलयापदि] कल्पान्तसङ्कटे [आसक्तबाहुलतया] दंष्ट्रायामिति शेषः। [उद्धृतया] दंष्ट्रयेतिशेषः। [भुवा सार्द्धम्] धरण्या सह [महावराह दंष्ट्रायां विश्रान्ताः]। महाप्रलयेऽप्यविनाशिन इत्यर्थः ॥ ८ ॥

सर्गशेषेति। [विश्वयोनेः] ब्रह्मणः [अनन्तरम्] सर्गशेषस्य प्रणयनात् ब्रह्मसृष्टावशिष्टसृष्टेः करणाद्धेतोरित्यर्थः [पुराविद्भिः] पुराणवेदिभिः व्यासादिभिः [पुरातनाः धातार इति कीर्त्तिताः]। विश्वयोनेरिति सम्बन्धमात्रे षष्ठी तस्यानन्तरमिति भाष्ये दर्शनात्। अपादानत्वविवक्षायां तु

प्राक्तनानां विशुद्धानां परिपाकमुपेयुषाम् ।
तपसामुपभुञ्जानाः फलान्यपि तपस्विनः ॥१०॥
कुलकम् ॥

तेषां मध्यगता साध्वी पत्युः पादार्पितेक्षणा ।
साक्षादिव तपःसिद्धिर्बभासे बह्वरुन्धती ॥११॥

तामगौरवभेदेन मुनींश्चापश्यदीश्वरः ।

पञ्चमी । अथमदः शब्दीयथाशब्दाद्वृत्तादनन्तरस्येति शाबरभाष्ये दर्शनात् । "तथा अथातो धर्मजिज्ञासा वेदाध्ययनादनन्तरम्" इत्याचार्याः । कविश्च "पुराणपत्रापगमादनन्तरम्" इति । एव मन्यत्रापि द्रष्टव्यम् ॥ ८ ॥

प्राक्तनानामिति । [प्राक्तनानाम्] जन्मान्तरभवानाम् [विशुद्धानाम्] निर्मलानाम् [परिपाकम्] फलदानोन्मुखत्वम् [उपेयुषाम्] गतानाम् [तपसां फलानि उपभुञ्जाना अपि] [तपस्विनः] तपोनिष्ठाः । प्रारब्धभोगिनो निस्पृहा इवेति भावः ॥ कुलकम् ॥ १० ॥

तेषामिति । [तेषाम्] ऋषीणाम् [मध्यगता साध्वी] पतिव्रता अतएव [पत्युः] वसिष्ठस्य [पादयोः अर्पितेक्षणा] निविष्टदृष्टिः [अरुन्धती] [साक्षात्] प्रत्यक्षा [तपःसिद्धिरिव] तेषामेवेति शेषः । तेषां मध्यगतेति लिङ्गवचनादिसाम्यादियमुपमा । [बहु] भूयिष्ठम् [बभासे] भाति स्म ॥ ११ ॥

तामिति । [ईश्वरः] भगवान् [ताम्] अरुन्धतीम् [मुनींश्च] [अगौरवभेदेन] समानप्रतिपत्त्या [अपश्यत्] दृष्टवान् । नचाय-

स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम्॥१२
तद्दर्शनादभूत् शम्भोर्भूयान् दारार्थमादरः।
क्रियाणां खलु धर्म्याणां सत्पत्न्यो मूलकारणम्॥१३
धर्म्मेणापि पदं शर्वे कारिते पार्वतीं प्रति।
पूर्वापराधभीतस्य कामस्योच्छ्वसितं मनः॥ १४॥

मविवेक इत्याह,—[हि] यस्मात् [स्त्री पुमांश्चेत्येषा] [अनास्था स्त्रीपुंसभेदो न विवक्षितः किन्तु [सताम्] साधूनाम् [वृत्तम्] चरित्रमेव [महितम्] पूज्यम्। "गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वय" इति॥ १२॥

तदिति। [तद्दर्शनात्] अरुन्धतीदर्शनात् [शम्भोः दारार्थम्] दारपरिग्रहार्थम् [आदरो भूयान्] बहुतरः [अभूत् ननु दाराः कुत्रोपयुज्यन्त इत्यत्राह,—[धर्म्याणाम्] धर्मादनपेतानाम्। धर्मपथ्यर्थन्यायादनपेते (४,४,९२पा०) इति यत्प्रत्ययः। [क्रियाणाम्] इज्यादीनां सत्यः पतिव्रताः पत्न्यः [सत्पत्न्यः] पत्युर्नो यज्ञसंयोगे (४,१,३३पा०) इति ङीप् नकारश्च। [मूलकारणं खलु]॥ १३॥

धर्म्मेणेति। [धर्मेण] दारसञ्जिघृक्षालक्षणेनापि क [शर्वे] ईश्वरे [पार्वतीम्] [प्रति] [पदं कारिते] सति। हृ रन्यतरस्यामिति (१,४,५३पा०) शर्वस्याणिकर्त्तुः कर्मत्व [पूर्वापराधभीतस्य कामस्य] [मनः उच्छ्वसितम्] पुनरुज्जी नावकाशो भवतीति समाश्वासमभूदित्यर्थः॥ १४॥

अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम् ।
इदमूचुरनूचानाः प्रीतिकण्टकितत्वचः ॥१५॥
यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।
यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः ॥१६॥

अथेति । [अथ] [अनूचानाः] साङ्गवेदप्रवक्तारः । "अनूचानः प्रवचने साङ्गेऽधीती गुरोस्तु यः" इत्यमरः । उपेयिवाननाश्वाननूचानश्चेति (३,२,१०९पा०) निपातः । [प्रीत्या कण्टकिताः] पुलकिताः [त्वचः] येषान्ते तथोक्ताः । [ते सर्वे] मुनयः [जगद्गुरुम्] हरम् [मानयित्वा] पूजयित्वा [इदम्] वक्ष्यमाणम् [ऊचुः] ॥ १५ ॥

यदिति । [ब्रह्म] वेदः । "वेदस्तत्त्वं तपोब्रह्म" इत्यमरः । [सम्यक्] नियमपूर्वकम् [आम्नातम्] अधीतमिति [यत्] [अग्नौ विधिना हुतम्] इति [यत्,] [तपः] चान्द्रायणादिकम् [तप्तम्] इति च [यत्,] [तस्य] अध्ययनेज्यातपोरूपस्य आश्रमत्रयसाध्यस्य कृत्स्नस्यापि कर्मण इत्यर्थः । समुदायाभिप्रायकमेकवचनम् अन्यथा आहत्यान्वयप्रसङ्गात् । न च नपुंसकैकवद्भावः अनपुंसकेनेति नियमात् (१) । [फलम्] कार्य्यम् [अद्य] [नः] अस्माकम् [विपक्वम्] सुनिष्पन्नमित्यर्थः । कर्मणि क्तः पचोवः (८,२,५२पा०) इति निष्ठा तस्य वत्वम् ॥१६॥

---

(१) नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् (१,२,६९पा०) इति सूत्रे ह्यनपुंसकेनैव सहोक्तौ नपुंसकं शिष्यते विभाषया एकवचनञ्चेत्यर्थके अनपुंसकेनेत्युक्तेः इह तु ब्रह्मादीनां सर्वेषां नपुंसकत्वान्नैकवचनसम्भवः ।

यदध्यक्षेण जगतां वयमारोपितास्त्वया ।
मनोरथस्याविषयं मनोविषयमात्मनः ॥१७॥
यस्य चेतसि वर्त्तेथाः स तावत् कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यस्तव चेतसि वर्त्तते ॥ १८ ॥
सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम् ।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात्तव ॥१९॥

तदेव फलमाह,—

यदिति। [यत्] यस्मात् कारणात् [जगतामध्यक्षेण] अधिपेन [त्वया वयम्] [मनोरथस्य] अभिलाषस्य [अविषयम्] अगोचरम् [आत्मनः] स्वस्य [मनोविषयम्] मनोदेशम् [आरोपिताः] प्रापिताः। तस्माद्विपक्वं फलमिति पूर्वेण सम्बन्धः। सकलजगदन्वेष्टव्यस्य भगवतोऽपि वयमन्वेष्या भवाम इति परमोत्कृष्टा वयमिति भावः ॥ १७ ॥

तदेवोपपादयति,—

यस्येति। [यस्य] जनस्य [चेतसि वर्त्तेथाः] येन स्मर्य्यसे इत्यर्थः। [स तावत्] स एव [कृतिनां वरः] श्रेष्ठः। [ब्रह्मणः] वेदस्य वेधसो वा [योनिः] कारणस्य यद्वा वेदप्रमाणकस्य [तव चेतसि यो वर्त्तते] त्वया स्मर्य्यत इत्यर्थः [किम्पुनः] स कृतिनां वर इति किमु वक्तव्यमित्यर्थः ॥ १८ ॥

सत्यमिति। [अर्कात्] सूर्य्यात् [सोमात्] चन्द्राच्च [परम्] उच्चैः [पदम्] स्थानम् [अध्यास्महे] तिष्ठामः वयमिति शेषः [सत्यम्।] अधिशीङ्स्थासां कर्म्मेति (१,४,४६पा०) कर्म्मत्वम्।

त्वत्सम्भावितमात्मानं बहु मन्यामहे वयम् ।
प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः ॥ २० ॥
या नः प्रीतिर्विरूपाक्ष ! त्वदनुध्यानसम्भवा ।
सा किमावेद्यते तुभ्यमन्तरात्मासि देहिनाम् ॥ २१ ॥

अद्य तु] [तव कर्त्तुः [स्मरणम्] एव [अनुग्रहः] प्रसादः तस्माद्धेतोः [ताभ्याम्] अर्केन्दुभ्याम् [उच्चैस्तरम्] अत्युच्चं पदम् अध्यास्महे इति सम्बन्धः । उच्चैस्तरमिति (१) द्रव्यप्रकर्षत्वान्नामुप्रत्ययः ॥ १९ ॥

त्वदिति । [वयम्] त्वया सम्भावितं सत्कृतम् [त्वत्सम्भावितम्] [आत्मानम्] आत्मस्वरूपम् [बहु] अधिकं यथा तथा मन्यामहे ।] तथाहि [उत्तमादरः] सत्पुरुषकर्त्तृकः सत्कारः स्वगुणेषु] विषये [प्रायेण] भूत्वा [प्रत्ययम्] विश्वासम् आधत्ते] जनयति । सर्वस्यापि महाजनपरिग्रह एव पूज्यत्वे हेतुरित्यर्थः ॥ २० ॥

येति । हे [विरूपाक्ष !] [त्वदनुध्यानसम्भवा] त्वत्कर्त्तृकस्मरणजन्या [नः] अस्माकम् [या प्रीतिः] [सा] प्रीतिः तुभ्यं किम् ? आवेद्यते] किमर्थं ? निवेद्यते तथाहि, [देहिनाम्] प्राणिनाम् [अन्तरात्मा] अन्तर्यामी [असि] । सर्वसाक्षिणा न त्वया अस्मत्प्रीतिरनावेदिताऽपि ज्ञायत एव यतः, अतीन्द्रियबुद्धबोधमं सम्भवतीति भावः ॥ २१ ॥

(१) किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे (५,४,११ पा०) किमादिभ्यः घसं-ज्ञकप्रत्ययान्तेभ्यः स्वार्थ अमु द्रव्यप्रकर्षे इति द्रव्यप्रकर्षे तन्निषेधात् नामुः ।

साक्षाद् दृष्टोऽसि न पुनर्विद्मस्त्वां वयमञ्जसा।
प्रसीद कथयात्मानं न धियां पथि वर्त्तसे ॥२२
किं येन सृजसि व्यक्तमुत येन बिभर्षि तत् ।
अथ विश्वस्य संहर्त्ता भागः कतम एष ते ॥२३
अथ वा सुमहत्येषा प्रार्थना देव ! तिष्ठतु ।

साक्षादिति । हे देव ! [साक्षात्] प्रत्यक्षेण [दृष्टोऽसि [अञ्जसा पुनः] तत्त्वतस्तु [त्वां वयं न विद्मः] । दृश्यमानस्य रूपस्यातात्त्विकत्वादिति भावः । अतः [प्रसीद] अनुगृहाण [आत्मानम्] निजस्वरूपं [कथय] । न चाकथितं तत्सुबोध-मित्याह, [धियाम्] बुद्धीनाम् [पथि न वर्त्तसे] अतः त्वयैव त्वद्रूपं कथनीयमित्यर्थः ॥ २२ ॥

तात्त्विकं रूपं तावदास्तां न दृश्यमानमपि रूपं तत्त्वतो रूपयितुं शक्यमित्याह,—

किमिति । हे देव ! [एषः] दृश्यमानः [ते भागः] मूर्ति- [किम् ?] [येन] भागेन [व्यक्तम्] प्रपञ्चम् [सृजसि] सः । यत्तदोर्नित्यसम्बन्धात्सर्वत्र तच्छब्दोऽध्याहार्य्यः । [उत ? येन भागेन [तत्] व्यक्तम् [बिभर्षि] पालयसि स वा । [अथ ? यः [भागः] तस्य [विश्वस्य संहर्त्ता] स वा । किमादयः स-न्देहे । [कतमः ?] ब्रह्मविष्णुमहेश्वरेषु अयं कतमः ? भागः तदुच्यतामित्यर्थः ॥ २३ ॥

ननु हर इत्येवं निश्चयात् कथमयं संशयस्तत्राह,—

अथ वेति । [अथ वा] हे [देव !] [सुमहती] गुरुतमला

न्तितोपस्थितांस्तावत् शाधि नः करवाम किम्॥२४

अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः ।
उपचिन्वन् प्रभां तन्वीं प्रत्याह परमेश्वरः ॥२५॥

विदितं वो यथा स्वार्था न मे काश्चित् प्रवृत्तयः ।
ननु मूर्तिभिरष्टाभिरित्थम्भूतोऽस्मि सूचितः ॥२६

तिदुर्लभेत्यर्थः । [एषा] [प्रार्थना] निजरूपनिरूपणप्रार्थना तिष्ठतु ।] किन्तु चिन्तितेन चिन्तिता वा उपस्थिताः [चिन्तितोपस्थिताः] तान् [नः] अस्मान् [तावत् शाधि] आज्ञापय [किं ? करवाम ।] प्रार्थनायां लोट् । अलमप्रस्तुतेन, प्रस्तुते तावन्नियुङ्क्ष्वेत्यर्थः ॥ २४ ॥

अथेति । [अथ] [परमेश्वरः] [मौलिगतस्य इन्दोः] [तन्वीम्] अल्पां कलामात्रत्वादिति भावः । [प्रभाम्] कान्तिम् [विशदैः] शुभ्रैः [दशनांशुभिः] [उपचिन्वन्] वर्धयन् [प्रत्याह] प्रत्युवाचेत्यर्थः ॥ २५ ॥

विदितमिति । हे मुनयः ! [काश्चित्] अपि [मे प्रवृत्तयः] व्यापाराः [स्वार्था न] भवन्ति [यथा] तथा [वः] युष्माकम् [विदितम्] वाक्यार्थः कर्म बुद्ध्यर्थत्वाद्वर्त्तमाने क्तः तद्योगात् षष्ठी (१) । प्रवृत्तिपारार्थ्ये प्रमाणमाह, [अष्टाभिः मूर्त्तिभिः] [इत्थम्भूतः] इमं प्रकारं परार्थप्रवृत्तिरूपं प्राप्तः ।

---

(१) मतिबुद्धिपूजार्थेभ्यश्च (३,२,१८८पा०) इति वर्त्तमाने क्तः क्तस्य च वर्त्तमाने (२,३,६७पा०) वर्त्तमानार्थक्तयोगे कर्त्तरि षष्ठी ।

सोऽहं तृष्णातुरैर्वृष्टिं विद्युत्वानिव चातकैः।
अरिविप्रकृतैर्देवैः प्रसूतिं प्रतियाचितः ॥२७॥
अत आहर्तुमिच्छामि पार्वतीमात्मजन्मने।
उत्पत्तये हविर्भोक्तुर्यजमान इवारणिम् ॥२८॥
तामस्मदर्थे युष्माभिर्याचितव्यो हिमालयः।

भू प्राप्ताविति धातोः कर्त्तरि क्तः। [सूचितः] ज्ञापितः [अस्मि]। मत्स्वमूर्त्तिचेष्टया पारार्थ्यमनुमेयमित्यर्थः ॥२६॥

स इति। [सः] परार्थप्रवृत्तिः [अहम्] [तृष्णातुरैः चातकैः] [वृष्टिं विद्युत्वान्] मेघः [इव] [अरिविप्रकृतैः] शत्रुपीड़ितैः [देवैः] [प्रसूतिम्] पुत्रोत्पादनम् [प्रतियाचितः] याचतेर्दुह्यादित्वात् अप्रधाने (१) कर्मणि क्तः ॥ २७ ॥

अत इति। [अतः] सुरप्रार्थितत्वाद्धेतोः [आत्मजन्मने] पुत्राय पुत्रमुत्पादयितुमित्यर्थः। क्रियार्थोपपदस्येत्यादिना (२,३,१४पा०) चतुर्थी। [पार्वतीम् यजमानः] यष्टा पूङ्यजोः शानन् (३,२,१२८पा०) इति शानन्प्रत्ययः। [हविर्भोक्तुः] अग्नेः [उत्पत्तये] [अरणिम्] अग्निमन्थनदारुविशेषम् [इव] "निर्मन्थ्यदारुणि त्वरणिर्द्वयोः" इत्यमरः। [आहर्तुम्] सङ्ग्रहीतुम् [इच्छामि] ॥ २८ ॥

तामिति। [अस्मदर्थे] अस्मत्प्रयोजने निमित्ते सति [युष्माभिः] [ताम्] पार्वतीम् [हिमालयः] हिमवान् [याचि-

(१) "गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" इति भाष्यवचनादिति शेषः।

विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः॥२९

उन्नतेन स्थितिमता धुरमुद्वहता भुवः ।
तेन योजितसम्बन्धं वित्त मामप्यवञ्चितम् ३०॥

एवं वाच्यः स कन्यार्थमिति वो नोपदिश्यते ।

व्यः] । याचेर्दुहादित्वादप्रधाने कर्मणि (१) तव्यप्रत्ययः । प्रावश्यकश्चैतदित्याह, [सद्भिः] सत्पुरुषैः [अनुष्ठिताः] सङ्घटिताः [सम्बन्धाः] यौनादयः [विक्रियायै] वैकल्योत्पादनाय [न कल्पन्ते] न पर्य्याप्नुवन्ति न समर्था इत्यर्थः । ,३,१६पा०) अलमर्थयोगाच्चतुर्थी ॥ २९ ॥

न चाहं लौल्यात् स्त्रियमिच्छामि किन्तु देवोपकाराय दवं निखिलदेवेषु विद्यमानेषु हिमगिरेः शिलाभूतस्य न्या परिणयेच्छा कथमित्युक्ते स एव मे श्लाघ्यसम्बन्धोऽलवान् हिमवानित्याह,—

उन्नतेनेति । [उन्नतेन] प्रांशुना प्रसिद्धेन च [स्थितिमता] तिष्ठावता [भुवः धुरम्] भारम् [उद्वहता] निर्वाहकेणेर्थः [तेन] हिमवता [योजितः] सङ्घटितः [सम्बन्धः] यौनबन्धो यस्य तम् [मामप्यवञ्चितम्] अव्यामोहितम् [वित्त] नीत । विद ज्ञाने इति धातोर्लोट् ॥ ३० ॥

तर्हि स किं वाच्य इत्याशङ्क्याह,—

एवमिति । कन्यार्थं कन्याप्रदानाय [सः] हिमवान् [एवं

---

(१) प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहाां ण्यन्ते कर्त्तुश्च कर्मण इति भाष्यवचनादिति शेषः ।

भवत्प्रणीतमाचारमामनन्ति हि साधवः ॥३१॥
आर्य्याप्यरुन्धती तत्र व्यापारं कर्तुमर्हति ।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता ॥३२॥
तत् प्रयातौषधिप्रस्थं सिद्धये हिमवत्पुरम् ।
महाकोषीप्रपातेऽस्मिन् सङ्गमः पुनरेव नः ॥३३॥

वाच्य इति वः] युष्मभ्यम् [नोपदिश्यते] । कुतः [हि] यस्मात् [साधवः] विद्वांसः [भवद्भिः प्रणीतम्] स्मृतिरूपेण निबद्धम् [आचारम्] आमनन्ति उपदिशन्ति । न हि स्वयमुपदेष्टारः परोपदेशमपेक्षन्त इत्यर्थः ॥ ३१ ॥

आर्य्येति । [आर्य्या] पूज्या [अरुन्धत्यपि तत्र] विवाहकृत्ये [व्यापारम्] साहाय्यम् [कर्त्तुम् अर्हति] । तथाहि [प्रायेण] प्राचुर्य्येण [एवंविधे कार्य्ये] विवाहादिकार्य्ये दुर्घट इत्यर्थः [पुरन्ध्रीणाम्] कुटुम्बिनीनाम् । 'स्यात्तु कुटुम्बिनी पुरन्ध्रिः" इत्यमरः । [प्रगल्भता] चातुर्य्यम् । स्त्रीप्रधानेषु स्त्रीणामेव घटनापाटवमिति भावः ॥ ३२

तदिति । [तत्] तस्मात्कारणात् [ओषधिप्रस्थम्] नाम [हिमवत्पुरम्] हिमवन्नगरम् [सिद्धये] कार्य्यसिद्ध्यर्थम् [प्रयात] गच्छत । [अस्मिन्] पुरोवर्त्तिनि [महाकोषी] नाम तवत्या काचिन्नदी तस्याः [प्रपाते] भृगावेव सा नदी यत्र पतति तस्मिन्नित्यर्थः । "प्रपातस्त्वतटोभृगुः" इत्यमरः [नः] अस्माकम् [पुनः सङ्गमः] अस्त्विति शेषः । भवत्समागमम्प्रतिपालयन्नहमिहैव निवत्स्यामीत्यर्थः ॥ ३३ ॥

तस्मिन् संयमिनामाद्ये जाते परिणयोन्मुखे।
जहुः परिग्रहव्रीडां प्राजापत्यास्तपस्विनः॥३४॥
ततः परममित्युक्त्वा प्रतस्थे मुनिमण्डलम्।
भगवानपि सम्प्राप्तः प्रथमोद्दिष्टमास्पदम्॥३५॥
ते चाकाशमसिश्यामसुत्पत्य परमर्षयः।
आसेदुरोषधिप्रस्थं मनसा समरंहसः॥३६॥

तस्मिन्निति। [संयमिनाम्] आद्ये तस्मिन्] ईश्वरे [परिणयोन्मुखे] विवाहोत्सुके [जाते] सति प्रजापतेरिमे [प्राजापत्याः] ब्रह्मपुत्रा इत्यर्थः [तपस्विनः] मुनयः [परिग्रहैः] पत्नीभिः [व्रीडाम्] गार्हस्थ्यनिमित्तामित्यर्थः। "पत्नीपरिजनादानमूलशापाः परिग्रहा" इत्यमरः। [जहुः] तत्यजुः। जहातेर्लिटि रूपम्। न हि समानगुणदोषेषु व्रीडागमोऽस्तीति भावः॥ ३४॥

तत इति। [ततः] अनन्तरम् [मुनिमण्डलम्] मुनिसमूहः [परममित्युक्त्वा] ओमित्युक्त्वा अनुमन्येत्यर्थः अव्ययमेतत्। "ओमेवं परमं मतम्" इत्यमरः। [प्रतस्थे]। [भगवान्] ईश्वरः [अपि] [प्रथमोद्दिष्टम्] पूर्वसङ्केतितम् [आस्पदम्] स्थानम् महाकोशीप्रपातम् [सम्प्राप्तः]॥ ३५॥

त इति। [मनसा समरंहसः] मनस्तुल्यवेगाः [ते परमर्षयश्च]। पूर्वश्लोकोक्तेश्वरसमुच्चयार्थश्चकारः। असिवच्छ्यामं नीलम् [आकाशम्] खं प्रति उत्पत्य [ओषधिप्रस्थम्] हिमवत्पुरम् [आसेदुः] सद्यः प्रापुरित्यर्थः॥ ३६॥

अलकामतिवाह्येव वसतिं वसुसम्पदाम् ।
स्वर्गाभिष्यन्दवमनं कृत्वेवोपनिवेशितम् ॥३७॥
गङ्गास्रोतःपरिक्षिप्तं वप्रान्तर्ज्वलितौषधि ।
बृहन्मणिशिलासालं गुप्तावपि मनोहरम् ॥३८॥

इतः परं दशभिः श्लोकैः ओषधिप्रस्थमेव वर्णयति,—

अलकामिति । [वसुसम्पदाम्] धनसमृद्धीनाम् । [वसतिम्] स्थानम् [अलकाम्] कुवेरनगरीम् [अतिवाह्य] परिच्छिद्येति यावत् [उपनिवेशितम् इव] स्थितम् । तथा [स्वर्गस्य अभिष्यन्दः] अतिरेकः अतिरिक्तजन इति यावत् । तस्य [वमनम्] निःसारणम् [कृत्वा उपनिवेशितम् इव] स्थितम् । उभयत्रापि कौटिल्यः, भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति । अलकामरावत्यतिशयितसमृद्धिकमित्यर्थः ॥ ३७ ॥

गङ्गेति । [गङ्गायाः स्रोतोभिः] प्रवाहैः [परिक्षिप्तम्] परिवेष्टितं तैरेव सपरिखमित्यर्थः । [वप्रः] चयः प्राकारचैत्यमिति यावत् । "स्याच्चयो वप्रमस्त्रियात्" इत्यमरः । तस्य [अन्तः] मध्ये [ज्वलिताः] प्रकाशमानाः [ओषधयः] यस्य तत्तथोक्तम् । ज्वलितौषधित्वाद्रात्रिषु सञ्चारिणां दीपनिरपेक्षमित्यर्थः । [बृहन्] विपुलः [मणिशिलानाम्] माणिक्यानाम् [सालः] प्राकारो यस्य तत्तथोक्तम् । "प्राकारो वरणः सालः" इत्यमरः । अतएव [गुप्तावपि] संवरणेऽपि [मनोहरम्] अकृत्रिमदुर्गसंवरणमिति भावः ॥३८॥

जितसिंहभया नागा यत्राश्वा विलयोनयः ।
यक्षाः किम्पुरुषाः पौरा योषितो वनदेवताः॥३९॥
शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् ।
अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः ॥४०॥

जितेति । [यत्र] पुरे [नागाः] गजाः [जितं सिंहेभ्यो भयम्] यैस्ते तथोक्ताः सिंहाधिकबला इत्यर्थः । नाथस्तु पदं तुषारस्रुति धौतरक्तम् (१स० ६श्लो०) इत्येतद्विरोधभयात् वीतवीतभया इति पपाठ । तथा न भेतव्यं तत्र वनगजानां सिंहहतत्वाभिधानात् अत्र तु ओषधिप्रस्थगजानां हिमवन्महिम्ना सिंहातिरेकसम्भवेनाविरोधादिति । वीतवीतेति पाठे वीतं विगतं वीतात् पादाङ्कुशकर्मभ्यां भयं येषां ते तथोक्ताः स्वभावविनीता इत्यर्थः । "पादकर्मयुतं प्रोक्तं यासमङ्कुशवारणम् । उभयं वीतमाख्यातम्" इति यादवः । अश्वाः विलयोनयः विलसम्भवाः । अन्यत्र तु न तथेति वैचित्र्यम् । उक्तञ्च । अमृताद् वाष्पतो वह्नेर्वेदेभ्योऽण्डाच्च गर्भतः । साम्नो हयानामुत्पत्तिः सप्तधा परिकीर्त्तिता" इति । [यक्षाः] [किम्पुरुषाः] किन्नराश्च [पौराः] पुरजनाः । [वनदेवता एव योषितः] न तु मानुष्य इत्यर्थः ॥ ३९ ॥

शिखरेति । [यत्र] पुरे [शिखरेषु आसक्ताः मेघाः] येषान्तेषां [वेश्मनाम्] सम्बन्धिनः, [अनुगर्ज्जितानि] [प्रतिगर्जितानि] तैः [सन्दिग्धाः मुरजस्वनाः करणैः] तालव्यवस्थापकैः ताड़नविशेषैः तदुक्तं राजकन्दर्पेण । "नृत्यवादित-

यत्र कल्पद्रुमैरेव विलोलविटपांशुकैः ।
गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता ॥ ४१ ॥
यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु ।
ज्योतिषां प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम्॥४२॥
यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः ।
अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः॥४३॥

गीतानां प्रयोगवशभेदिनाम् । संस्थानं ताड़नं रोधः कारणानि प्रचक्षते इति । [व्यज्यन्ते] स्फुटीक्रियन्ते ॥ ४० ॥

यत्रेति । [यत्र] नगरे [विलोलानि] चञ्चलानि [विटपेषु अंशुकानि] येषां तैः [कल्पद्रुमैरेव] [अपौरादरेण] पौरादरं विनैव [निर्मिताः अयत्नसिद्धेत्यर्थः । [गृहेषु] यानि [यन्त्राणि] धारादारूणि तेषु [पताकाः] तासाम् [श्रीः] सम्भवतीति शेषः । तत्र लम्बाम्बराः कल्पतरव एव वैजयन्तीति सम्भाव्यन्त इत्यर्थः ॥ ४१ ॥

यत्रेति । [यत्र] पुरे [नक्तम्] रात्रौ [स्फटिकहर्म्येषु आपानभूमिषु] पानगोष्ठीप्रदेशेषु [ज्योतिषाम्] नक्षत्राणाम् [प्रतिबिम्बानि उपाहरताम्] पुष्पोपहारत्वं मौक्तिकोपहारत्वं वा [प्राप्नुवन्ति] ॥ ४२ ॥

यत्रेति । [यत्र] पुरे [दुर्दिनेषु] मेघाच्छन्नदिवसेषु [नक्तमोषधीनाम्] तृणज्योतिषाम् [प्रकाशेन] सञ्चरन्ते एभिरिति सञ्चराः पन्थानः । गोचरसञ्चरेत्यादिना (३,३,११९ पा०) घप्रत्ययान्तो निपातः । [दर्शितसञ्चराः] प्रकाशितमार्गाः [अभि-

यौवनान्तं वयो यस्मिन्नान्तकः कुसुमायुधात् ।
रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्य्ययः ॥ ४४ ॥
भ्रूभेदिभिः सकम्पोष्ठैर्ललिताङ्गुलितर्ज्जनैः ।
यत्र कोपैः कृताः स्त्रीणामाप्रसादार्थिनः प्रियाः ॥ ४५ ॥

सारिकाः] कान्तार्थिन्यः । "कान्तार्थिनी तु या याति सङ्केतं साभिसारिका:" इत्यमरः । [तमिस्राणाम्] तमसाम् कर्त्र्या-मात्कर्मणि (१) षष्ठी । [अनभिज्ञाः] तमांसि नाभिजानन्ती-त्यर्थः ॥ ४३ ॥

यौवनेति । [यस्मिन्] पुरे [वयः यौवनान्तम्] यौवना-वधिकं सर्वेऽप्यजरा इत्यर्थः । तथा [कुसुमायुधात्] कामात् [अन्यः] इति शेषः । [अन्तकः] मृत्युर्न अस्तीति शेषः । विर-हिणां तादृग्दुःखोत्पादकत्वादन्तकत्वोपचारः । कामं विना मृत्युर्नास्तीत्यर्थः । अतएव तत्कार्य्यभूतमरणाभाव इत्याशये-नाह, रतीति [रतिखेदसमुत्पन्ना निद्रा] सुप्तिरेव [संज्ञाविप-र्य्ययः] चेतनापगमः न तु दीर्घनिद्रारूप इत्यर्थः । अत्रत्याः सर्वे अजरामरा इति श्लोकतात्पर्य्यार्थः । अन्तयति अन्तं करोती-त्यन्तकः । अन्तयतेस्तत्करोतीति ण्यन्तात् ण्वुल्प्रत्ययः ॥ ४४ ॥

भ्रूभेदिभिरिति । [यत्र] पुरे [प्रियाः] युवानः [भ्रूभेदिभिः] भ्रूभङ्गवद्भिः [सकम्पा ओष्ठाः] येषु तैः [ललितानि अङ्गुलि-तर्ज्जनानि] येषु तैः [स्त्रीणां कोपैः] मानाख्यैः [आप्रसादा-

(१) कर्त्तृकर्मणोः कृति (२,३,६५पा०) इति सूत्रेणेति शेषः ।

सन्तानकतरुच्छायासुप्तविद्याधराध्वगम् ।
यस्य चोपवनं बाह्यं गन्धवद्गन्धमादनम् ॥४६॥

कुलकम् ।

अथ ते मुनयो दिव्याः प्रेक्ष्य हैमवतं पुरम् ।

र्थिनः] आप्रसादं प्रसादपर्य्यन्तम् अर्थिनः याचकाः कृताः न तु शत्रुकोपैरिति भावः ॥ ४५ ॥

सन्तानकेति । किञ्चेति चार्थः । [सन्तानकतरोः छायासु [सुप्ता विद्याधराः] देवताविशेषाः तएव [अध्वगाः] यस्मिन् तत्तथोक्तम् [गन्धवत् गन्धाढ्यं गन्धमादनम्] नाम गिरिः, यस्य पुरस्य वहिर्भवम् [वाह्यम्] उपवनम् । आरामः । अत्र [गन्धवद्गन्धमादनम्] इति आगन्तुकः पाठः । प्राचीनपाठस्तु सुगन्धिर्गन्धमादन इति पुंलिङ्गान्तः । अतएव क्षीरस्वामिना गन्धमादनमन्ये चेत्यत्र गन्धेन मादयतीति गन्धमादन इति व्याख्याय प्रयोगे च पुंलिङ्गता दृश्यत इत्याशयेनोक्तं सुगन्धिर्गन्धमादन इति कालिदास इति । सन्तानकतरुच्छायेत्यत्र पूर्वपदार्थबाहुल्यसम्भवेऽपि शलभच्छायम् इक्षुच्छायमितिवत् समर्थच्छायानिष्पत्तेस्तदपेक्षाभावात् (१) छाया बाहुल्ये (२, ४, २२पा०) इति नपुंसकत्वं नास्तीत्यनुसन्धेयम् ॥ ४६ ॥

अथेति । [अथ ते] दिवि भवाः [दिव्याः मुनयः] हिमवत इदं [हैमवतं पुरं प्रेक्ष्य] [स्वर्गाभिसन्धिना] स्वर्गोद्देशेन यत्

(१) तदपेक्षाया बाहुल्यापेक्षाया अभावात् एकेनापि सन्तानद्रुमेण समर्थच्छायानिष्पत्तेरित्याशयेनाबाहुल्यात् न नपुंसकता ।

स्वर्गाभिसन्धिसुकृतं वञ्चनामिव मेनिरे ॥ ४७ ॥

ते सद्मनि गिरेर्वेगादुन्मुखद्वाःस्थवीक्षिताः ।

अवतेरुर्जटाभारैर्लिखितानलनिश्चलैः ॥ ४८ ॥

गगनादवतीर्णा सा यथावृद्धपुरःसरा ।

तोयान्तर्भास्करालीव रेजे मुनिपरम्परा ॥ ४९ ॥

[सुकृतम्] ज्योतिष्टोमाद्यनुष्ठानं तत् [स्वर्गाभिसन्धिसुकृतम्] [वञ्चनाम्] प्रतारणाम् [इव मेनिरे ।] हिमवन्नगरमविद्य स्वर्गस्य पुण्यफलत्वं वदता वेदेन वयं विप्रलब्धा इत्यर्थः । स्वर्गादतिरमणीयमिति भावः ॥ ४७ ॥

त इति । [लिखितानलनिश्चलैः] चित्रगतज्वलननिष्पन्दैरिति वेगप्रकर्षोक्तिः । [जटाभारैः] उपलक्षिताः [ते] मुनयः द्वारि तिष्ठन्तीति [द्वाःस्थाः] [द्वारपालकाः । "प्रतीहारो द्वारपालद्वाःस्थद्वाःस्थितदर्शकाः" इत्यमरः । [उन्मुखैः] ऊर्ध्वमुखैः [द्वाःस्थैः वीक्षिताः] सन्तः न तु विनिवारिता इत्यर्थः । [गिरेः] हिमवतः [सद्मनि] [वेगादवतेरुः] अवतीर्णवन्तः ॥ ४८ ॥

गगनादिति । [गगनात् अवतीर्णा] अवरूढा [यथावृद्धम्] वृद्धानुक्रमेण स्थिताः [पुरःसराः] अग्रेसराः यस्याम् [सा] तथोक्ता । अनुपसर्जनाधिकारात् (१) न ङीप् । [सा] [मुनिपरम्परा] मुनिपङ्क्तिः [तोयान्तः] तोयाभ्यन्तरे [भास्करालो] प्रतिबिम्बितार्कपङ्क्तिः [इव] [रेजे] एतेन मुनीनां तेजस्वित्वेऽपि सुखसंस्पर्शत्वं सूच्यते । भास्करावल्यां भूयिष्ठसद्भाव-

(१) अपि शरयत्यस्य टिड्ढत्वेन ङीपः प्राप्तावपि तस्य गौणतया नैव ङीप् इत्याह अनुपसर्जनाधिकारादिति ।

तानर्घ्यमर्घ्यमादाय दूरात् प्रत्युद्ययौ गिरिः।
नमयन् सारगुरुभिः पादन्यासैर्वसुन्धराम् ॥५०॥

धातुताम्राधरः प्रांशुर्देवदारुबृहद्भुजः।
प्रकृत्यैव शिलोरस्कः सुव्यक्तो हिमवानिति ॥५१॥

विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः।
स तैराक्रमयामास शुद्धान्तं शुद्धकर्मभिः ॥५२॥

मार्घं तोयान्तरित्युक्तम्। अतएव बहुत्वसिद्धिः ॥ ४९ ॥

तानिति। [गिरिः] हिमवान् [अर्घ्यम्] अर्घार्थं जलम् [आदाय] [सारगुरुभिः] अन्तःसारदुर्भरैः [पादन्यासैः वसुन्धरां नमयन्] अधः प्रापयन्। अर्घमर्हन्तीत्यर्घ्यान् पूज्यान् (५,१,६६पा०) इत्यादिनायप्रत्ययः। [तान्] मुनीन् [दूरात् प्रत्युद्ययौ] ॥ ५० ॥

सम्प्रति हिमवन्तमेव जङ्गमस्थावररूपद्वयसाधारणैर्विशेषणै-र्विशिनष्टि,—

धात्विति। [धातुवत्ताम्रोऽधरः] यस्य स तथोक्तः। अन्यत्र धातुरेव ताम्रोऽधरो यस्य। [प्रांशु] उन्नतः उभयत्रापि समानम्। [देवदारुवद्बृहन्तौ भुजौ] यस्य स तथोक्तः देवदारव एव बृहन्तौ भुजौ यस्येत्यन्यत्र। [प्रकृत्या] स्वभावेनैव शिलावदुरो यस्य स [शिलोरस्कः] शिलैवेत्यन्यत्र। उरःप्रभृतिभ्यः कप् (५,४,१५१पा०) इति कप्। अतः [हिमवानिति सुव्यक्तः] वर्त्तमाने क्तः। स्वयं स एवायं हिमवानिति तद्धर्मप्रत्यभिज्ञानादवधारित इत्यर्थः ॥ ५१ ॥

विधीति। [स] हिमवान् [विधिना] शास्त्रेण [प्रयुक्त

तत्र वेत्रासनासीनान् कृतासनपरिग्रहः।
इत्युवाचेश्वरान् वाचं प्राञ्जलिर्भूधरेश्वरः॥५३॥
अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।
अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे॥५४॥
मूढं बुद्धमिवात्मानं हैमीभूतमिवायसम्।

सत्कारैः कृतार्चनैः शुद्धकर्मभिः अदुष्टचरितैः शुद्धान्तप्रवेशार्हैरित्यर्थः। तैः मुनिभिः स्वयं मार्गस्य दर्शयतीति [दर्शकः] दर्शयिता सन्। पश्यतेर्ण्यन्तात् ण्वुल्प्रत्ययः। [शुद्धान्तः] अन्तःपुरम् [आक्रमयामास] प्रवेशयामासेत्यर्थः। अत्र क्रमेर्गत्यर्थत्वाद्गतिबुद्धीत्यादिना (१) तैरित्यस्य न कर्मत्वम्॥५२॥

तत्रेति [तत्र] शुद्धान्ते [वेत्रासनासीनान्] [वेत्रम्] लताविशेषः। वेत्रमयविष्टरोपविष्टान् [ईश्वरान्] प्रभून् मुनीन् [भूधरेश्वरः] हिमवान् [कृतासनपरिग्रहः] उपविष्टः सन्नित्यर्थः। [प्राञ्जलिः] कृताञ्जलिः सन् [इति] एवं [वाचम्] [उवाच]॥५३॥

अपेति। [अतर्कितोपपन्नम्] अविचारितमेवोपगतम् अत्यन्तासम्भावितमित्यर्थः। [वः] युष्माकम् [दर्शनम्] [अपमेघोदयम् वर्षम्] अनभ्रा वृष्टिः तथा [अदृष्टं कुसुमम्] यस्य तत्तथोक्तम् [फलञ्च] तत् [मे प्रतिभाति] अतिदुर्लभम् संवृत्तम् इत्यर्थः। अत्र मेघोदयकुसुमरूपकारणयोरभावेऽपि वर्षफलरूपकार्ययोरुदयाभिधानात् विभावना। मुनिदर्शनस्य विशिष्ट-

---

(१) गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स णौ (१,४,५२ सूत्रेणेति शेषः)

भूमेर्दिवमिवारूढं मन्ये भवदनुग्रहात् ॥५५॥

अद्य प्रभृति भूतानामधिगम्योऽस्मि शुद्धये।
यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते ॥ ५६ ॥

अवैमि पूतमात्मानं द्वयेनैव द्विजोत्तमाः।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः ॥५७॥

वृत्तित्वेन च रूपणाद्रूपकालङ्कारश्चेत्युभयोः संसृष्टिः ॥ ५४ ॥

मूढमिति। [भवदनुग्रहात्] आत्मानम् माम् [मूढम्] बुद्धिं विनाकृतम् [बुद्धम्] मूढोभूत्वा यो बुद्धवान् तम् [इव] कर्त्तरि क्तः। [आयसम्] अयोविकारम् [हैमीभूतम्] आयसत्वम् विहाय सौवर्णत्वं प्राप्तमिवेत्यर्थः। [भूमेः] भूलोकात् [दिवम्] स्वर्गम् [आरूढमिव मन्ये]। ज्ञान-रूप-स्थानानि अद्य मे परमुत्कृष्टानि इति भावः ॥ ५५ ॥

अद्येति। [अद्य प्रभृति] इत आरभ्य [भूतानाम्] प्राणिनाम् [शुद्धये अधिगम्योऽस्मि] शुद्ध्यर्थिनां तीर्थभूतोऽस्मीत्यर्थः। भवदागमनादिति शेषः। हि यस्मात् [यत् अर्हद्भिः] सद्भिः [अध्यासितम्] अधिष्ठितं जुष्टमिति यावत्। [तत्तीर्थम् प्रचक्षते]। "निपानागमयोस्तीर्थमृषिजुष्टजले गुरौ" इत्यमरः ॥ ५६ ॥

अवैमीति। हे [द्विजोत्तमाः]! [आत्मानम्] माम् [द्वयेनैव पूतम्] शुद्धम् [अवैमि] अवगच्छामि। केन द्वयेन [मूर्ध्नि गङ्गाप्रपातेन] मन्दाकिनीपतनेन, [वः] युष्माकम् [धौतयोः] क्षालितयोः [पादयोरम्भसा च]। अत्र गङ्गाजलवत् पादाम्भसः पावनत्वमित्यौपम्यं गम्यते तच्च प्रस्तुताप्रस्तुतयोरिति दीपका-

जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥ ५८ ॥
भवत्सम्भावनोत्थाय परितोषाय मूर्च्छते ।
अपि व्याप्तदिगन्तानि नाङ्गानि प्रभवन्ति मे ॥५९॥
न केवलं दरीसंस्थं भास्वतां दर्शनेन वः ।
अन्तर्गतमपास्तं मे रजसोऽपि परं तमः ॥६०॥

लङ्कारः । "प्रियः प्रियतराख्यानम्" इति लक्षणात् प्रियोऽलङ्कार इति केचित् ॥ ५७ ॥

जङ्गममिति । हे मुनयः [द्विरूपम्] जङ्गमस्थावरात्मकत्वात् द्विप्रकारकम् [अपि मे वपुः विभक्तानुग्रहम्] विभज्य कृतप्रसादम् [मन्ये] । कुतः [जङ्गमं वपुः वः] युष्माकम् [प्रैष्यभावे] कैङ्कर्य्ये स्थितमिति शेषः । प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्येति (६,१,८९पा०वा०) वृद्धिः । "नियोज्यकिङ्करप्रैष्यभुजिष्यपरिचारकाः" इत्यमरः । [स्थावरम्] वपुः [चरणाङ्कितम्] अयमेव हि महाननुग्रहो दासजनस्य यत्कर्मसु नियोजनं मूर्द्धनि पादन्यासश्चेति तात्पर्य्यार्थः ॥ ५८ ॥

भवदिति । व्याप्ता दिगन्ता यैस्तानि [व्याप्तदिगन्तानि] महात्यपीत्यर्थः । [मे] मम [अङ्गानि भवत्सम्भावनोत्थाय] युष्मदनुग्रहजन्याय [मूर्च्छते] व्याप्नुवते [परितोषाय न प्रभवन्ति] न पर्य्याप्नुवन्ति । (२,३,१६पा०) अलमर्थयोगाच्चतुर्थी । यथा महत्स्वपि मत्राङ्गेषु न माति तथा मे हर्षो वर्द्धत इत्यर्थः ॥५९॥

नेति । [भास्वताम्] तेजस्विनां विवस्वताञ्च [वः] युष्माकम् [दर्शनेन केवलं दरीसंस्थम्] गुहागतम् [तमः] ध्वान्तरूपमेव

कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते।
मन्ये मत्पावनायैव प्रस्थानं भवतामिह ॥ ६१ ॥
तथापि तावत् कस्मिंश्चिदाज्ञां मे दातुमर्हथ।
विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु ॥ ६२
एते वयममी दाराः कन्येयं कुलजीवितम्।

न [अपास्तम्] किन्तु [मे अन्तर्गतम्] अन्तरात्मगतम् [रजसः] रजोगुणात् [परम्] अनन्तरम् [तमः] अज्ञानरूपम् [अपि अपास्तम्।] रजस्तु पादन्यासैरेवापास्तमिति भावः। प्रसिद्ध भास्वद्भिः बाह्यं तमोऽपास्यते एभिस्त्वान्तरमपि इति व्यतिरेको व्यज्यते ॥ ६० ॥

कर्त्तव्यमिति। [कर्त्तव्यम्] कार्य्यम् [वः] युष्माकम् [न पश्यामि] निस्पृहत्वादिति भावः। अथ [स्याच्चेत्] विद्येत यदि? [किं नोपपद्यते] किं नाम न सम्भवति सर्वं सुलभमेवेत्यर्थः। अथ वा किमत्र प्रयोजनचिन्तयेत्याह, [मत्पावनाय] मच्छोधनाय [एव] भवतामिह] विषये [प्रस्थानम्] इमं देशमुद्दिश्य इदं प्रयाणमित्यर्थः [मन्ये] तर्कयामि ॥ ६१ ॥

तथापीति। [तथापि] भवतां निस्पृहत्वेऽपि [कस्मिंश्चित्] कर्मणीति शेषः। [आज्ञाम्] इदं कुर्वित्यादेशम् [तावत्] इदानीम् [मे] मह्यम् [दातुम् अर्हथ] मदनुग्रहबुद्धेरिति भावः। [हि] यस्मात् [किङ्कराः] भृत्याः प्रभवन्तीति [प्रभविष्णुषु] प्रभुषु विषये। भुवश्च (३,२,१३८पा०) इतीष्णुच् प्रत्ययः। विशेषेण [नियोगः] प्रेषणमेव [प्रसादः] अनुग्रहः येषां ते तथोक्ताः। अन्यथा स्वस्वामिभावो निष्फल इति भावः ॥६२॥

ब्रूत येनात्र वः कार्य्यमनास्था बाह्यवस्तुषु ॥ ६३
इत्यूचिवांस्तमेवार्थं गुहामुखविसर्पिणा।
द्विरिव प्रतिशब्देन व्याजहार हिमालयः ॥ ६४।
अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥ ६५॥

एत इति। किं बहुना [एते वयम्, अमी दाराः, इयं कुलस्य जीवितम्] प्राणभूता परमप्रेमास्पदमित्यर्थः [कन्या, अत्र] एषां मध्ये [येन] जनेन [वः कार्य्यम्] प्रयोजनम् [ब्रूत] तमिति शेषः। येन सोऽपि दीयत इति भावः। रत्नहिरण्यादिकन्तु न मे गण्यमित्याह, [बाह्यवस्तुषु] कनकरत्नादिषु अनास्था] अनादरः। प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते। अदेयं न किञ्चिदस्तीति भावः ॥ ६३ ॥

इतीति। [इत्यूचिवान्] उक्तवान्। वचेः क्वसुप्रत्ययः। हिमालयः] हिमवान् [गुहानां मुखेषु] विवरेषु [विसर्पिणीति] तथोक्तेन प्रतिशब्देन [तमेव] पूर्वोक्तम् एव [अर्थम्] द्विः] द्विवारम्। द्वित्रिचतुर्भ्यः सुजिति (५,४,१८पा०) सुच्प्रत्ययः। [व्याजहार] बभाषे ॥ ६४ ॥

अथेति। [अथ] अनन्तरम् [ऋषयः] [उदाहरणानि] कथाप्रसङ्गाः तएव [वस्तूनि] अर्थाः तेषु अग्रं नयतीत्यग्रणीः तम् [अग्रण्यम्] प्रगल्भम्। सत्सूद्विषेत्यादिना (३,२,६१पा०) क्विप्। अग्रग्रामाभ्यां नयतेरिति (१) वक्तव्यमिति णत्वम्। [अङ्गिरसम्] नाम ऋषिम् [नोदयामासुः] प्रतिवक्तुं प्रेरया-

(१) स एषां ग्रामणीरिति (५,२,७८पा०) सूत्रनिर्देशज्ञापकात्।

उपपन्नमिदं सर्वमतः परमपि त्वयि।
मनसः शिखराणाञ्च सदृशी ते समुन्नतिः ॥६६॥
स्थाने त्वां स्थावरात्मानं विष्णुमाहुस्तथा हि ते।
चराचराणां भूतानां कुक्षिराधारतां गतः ॥६७॥
गामधास्यत् कथं नागो मृणालमृदुभिः फणैः।
आ रसातलमूलात्त्वमवालम्बिष्यथा न चेत् ॥६८॥

मासुः। [सः] अङ्गिराः [भूधरम्] हिमवन्तम् [प्रत्युवाच] ॥६५॥

उपपन्नमिति। [इदम्] एते वयममी दारा इत्याद्युक्तम् [सर्वम्] [अतः परम्] अतोऽधिकमपि [त्वयि उपपन्न] युज्यते। तथाहि [ते] [मनसः] [शिखराणाञ्च] [समुन्नतिः] [सदृशी] शिखराणीव मनो महोन्नतमित्यर्थः। किन्नाम दुष्करमुन्नतचित्तानामिति भावः। प्रस्तुताप्रस्तुतयोर्मनःशिखरयोरौपम्यस्य गम्यत्वाद्दीपकालङ्कारः ॥ ६६ ॥

स्थान इति। [त्वाम्] [स्थावरात्मनम्] स्थावररूपिणं [विष्णुमाहुः।] स्थावराणां हिमालय इति (१०अ०२५श्लो गीतावचनात्। स्थाने] युक्तम्। युक्तार्थे अव्ययमेतत्। "युक्ते द्वे साम्प्रतं स्थाने" इत्यमरः। तथाहि [ते] तव [कुक्षि [चराचराणाम्] जङ्गमस्थावररूपिणां [भूतानाम्] पृथिव्यादीनाम् [आधारतां गतः।] तवैव विष्णोः कुक्षिरिवाभू इति भावः ॥ ६७ ॥

गामिति। [नागः] शेषाहिः [मृणालमृदुभिः] बिसकोमलैः [फणैः] [गाम्] भुवम् [कथम्? अधास्यत्] धारयं [त्वम्] [आ रसातलमूलात्] पातालपर्य्यन्तम्। विकल्पा

अच्छिन्नामलसन्तानाः समुद्रोर्म्यनिवारिताः ।
नन्ति लोकान् पुण्यत्वात् कीर्त्तयः सरितश्च ते ॥६९॥
यथैव श्लाघ्यते गङ्गा पादेन परमेष्ठिनः ।
प्रभवेण द्वितीयेन तथैवोच्छिरसा त्वया ॥७०॥

मासः । नावालम्बिष्यथाश्चेत्] पादैर्नावलम्बेथा यदि । दवलम्बनादेव भुजगराजोऽपि भुवं बिभर्त्तीत्यर्थः । अत्र क्रयातिपत्त्यभावात् (१) लृङ्प्रयोगश्चिन्त्यः ॥ ६८ ॥

अच्छिन्नेति । [अच्छिन्नाः] अविच्छिन्नाः [अमलाश्च न्ताना:] प्रबन्धाः प्रवाहाश्च यासान्ताः तथोक्ताः [समुद्रोर्मिभिः अनिवारिताः] पारगमनादन्तःप्रवेशाच्चेति भावः । तव [कीर्त्तयः] [सरितश्च] गङ्गादयः [पुण्यत्वात्] पवित्रात् [लोकान् पुनन्ति] पावयन्ति । लोकपावनाः खलु पुण्यलोका इति भावः । केवलप्रकृतविषयस्तुल्ययोगितालङ्कारः ॥६९

यथेति । [गङ्गा भागीरथी प्रभवत्यस्मादिति [प्रभवः] न कारणेन परमे तिष्ठतीति [परमेष्ठिनः] विष्णोः । परमे कत् (४,१०उ०) प्रत्ययः । (२) तत्पुरुषे कृति बहुलमिति ६,३,१४पा०) अलुक् । परमेवर्हिर्दिव्यग्निभ्यः स्थः इति ८,३,९७पा०) (३) षत्वम् । [पादेन] चरणेन [यथैव श्लाघ्यते]

(१) लिङ्निमित्ते लृङ् क्रियातिपत्तौ (३,३,१३९ पा०) क्रियाया अतिपत्तिः अनिष्पत्तिः अवलम्बनक्रियाया अनिष्पत्तौ धारणाभावः तस्य प्रसंशार्थे विवक्षित इति तु लृङ् प्रयोगः समर्थनीयः ।

(२) परमे उपपदे तिष्ठतेरिनिः स्यात् स च कित् तेनालोपः ।

(३) अम्बाम्बगोभूमीत्यादिसूत्रमनुसृत्य परमे इत्यादि प्रतीकम् । परमे इत्यादिभ्यः परस्य स्था इत्यस्य सस्य षत्वं स्यात् ।

तिर्य्यगूर्द्धमधस्ताच्च व्यापको महिमा हरेः।
त्रिविक्रमोद्यतस्यासीत् स तु स्वाभाविकस्तव ॥७१

यज्ञभागभुजां मध्ये पदमातस्थुषा त्वया।
उच्चैर्हिरण्मयं शृङ्गं सुमेरोर्वितथीकृतम् ॥७२॥

काठिन्यं स्थावरे काये भवता सर्वमर्पितम्।
इदन्तु ते भक्तिनम्रं सतामाराधनं वपुः ॥७३॥

प्रशस्यते तथैव [द्वितीयेन] प्रभवेण [उच्छिरसा] तया श्लाघ्यते हरिचरणवत् तीर्थस्यापि तीर्थभूतस्त्वमिति भावः ॥ ७० ॥

तिर्य्यगिति। [तिर्य्यगूर्द्धमधस्ताच्च व्यापकः] सर्वव्यापीत्यर्थः। [महिमा] महत्त्वम् [हरेः] विष्णोः त्रिषु विक्रमेषु उद्यतस्य सतः [आसीत्।] [त्रिविक्रमोद्यतस्यापि] कदाचिदेव न तु सर्वदेत्यर्थः। [तव] [तु] व्यापको महिमा स्वाभाविकः] नित्यसिद्ध इत्यर्थः ॥ ७१ ॥

यज्ञेति। [यज्ञभागभुजाम्] इन्द्रादीनाम् [मध्ये] [पदम् आतस्थुषा] निहितवता [त्वया] उच्चैरुन्नतं हिरण्यस्य विकारो [हिरण्मयम्] दाण्डिनायनहास्तिनायनेत्यादिना (६,४,१७४पा०) निपातनात्साधु। [सुमेरोः शृङ्गम्] शिखरं प्राधान्यञ्च ध्वन्यते। "शृङ्गं प्राधान्यसान्वोश्च" इत्यमरः [वितथीकृतम्] व्यर्थीकृतं तस्य यज्ञभागाभावादिति भावः अस्य तु तत्सद्भावे प्रमाणं "हिमवतोहस्ती" इति श्रुतिः ॥७२

काठिन्यमिति। [भवता] [सर्वम्] [काठिन्यम्] असकलमित्यर्थः। [स्थावरे] स्थिरे [काये] शिलामय इत्यर्थः। [अर्पितम्] न्यस्तम्। [सताम्] महताम् [आराधनम्] पूजासा

तदागमनकार्य्यं नः शृणु कार्य्यं तवैव तत् ।
श्रेयसामुपदेशात्तु वयमत्रांशभागिनः ॥ ७४ ॥
अणिमादिगुणोपेतमस्पृष्टपुरुषान्तरम् ।
शब्दमीश्वर इत्युच्चैः सार्द्धचन्द्रं बिभर्ति यः ॥ ७५
कल्पितान्योऽन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।

नम् [ते] इदम् [वपुस्तु] अङ्गमित्यर्थः [भक्तिनम्रम्] काठिन्यलेशोऽप्यत्र नास्ति अन्यथा नम्रत्वासम्भवादित्यर्थः । तथाचासाधारण्यं ध्वन्यते ॥ ७३ ॥

तदिति [तत्] तस्मात् [नः] अस्माकम् [आगमनस्य कार्य्यम्] प्रयोजनम् [शृणु] [तत्कार्यञ्च तवैव] न त्वस्माकमित्यवधारणार्थं एवकारः । [वयन्तु श्रेयसाम्] [उपदेशात्] [अत्र] कार्य्ये अंशभागिनः] । त्वमेवात्र फलभाक् वयमुपदेष्टार इति भावः ॥ ७४ ॥

कार्यमेवाह अणिमेत्यादिना,—

अणिमिति । [यः] शम्भुः [अणिमादिगुणोपेतम्] अणिमादिभिरष्टभिर्गुणैः वाच्यभूतैरुपेतम् अष्टैश्वर्य (१) वाचकमित्यर्थः । अतएव [अस्पृष्टं पुरुषान्तरम्] येन तं तथोक्तं पुरुषान्तरस्यानभिधायकं तस्यैव एवंगुणत्वादित्यर्थः । [उच्चैः] परमम् [ईश्वर इति शब्दम्] [सार्द्धचन्द्रयुक्तं अर्द्धचन्द्रस्येत्यर्थः [बिभर्त्ति] ॥ ७५ ॥

कल्पितेति । [येन] शम्भुना [कल्पितम्] धृतिसंपत्त्यादिस्व-

(१) अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता ॥

येनेदं ध्रियते विश्वं धुर्यैर्यानमिवाध्वनि ॥७६॥

योगिनो यं विचिन्वन्ति क्षेत्राभ्यन्तरवर्त्तिनम्।
अनावृत्तिभयं यस्य पदमाहुर्मनीषिणः ॥७७॥

स ते दुहितरं साक्षात् साक्षी विश्वस्य कर्मणाम्।
वृणुते वरदः शम्भुरस्मत्संक्रामितैः पदैः ॥७८॥

स्वगुणसम्पादितम् [अन्योऽन्यसामर्थ्यम्] परस्परसहकारकरूपं यैस्तथोक्तैः। स्वस्वरूपसामर्थ्यम् अन्योन्याधेयमेवेति भावः। [पृथिव्यादिभिः आत्मभिः] अष्टाभिर्मूर्त्तिभिरित्यर्थः। [इदम्] व्यक्तम् [विश्वम्] धुरं वहन्तीति [धुर्यैः] अश्वैः। धुरो यड्ढकाविति (४,४,७७पा०) यत्प्रत्ययः। [अध्वनि यानम्] रथ एव ध्रियते ॥ ७६ ॥

योगिन इति। [योगिनः] अध्यात्मवेदिनः [क्षेत्राभ्यन्तरवर्त्तिनम्] शरीरान्तश्चरं सर्वभूतान्तर्यामिनं परमात्मस्वरूपिणमित्यर्थः। "क्षेत्रं पत्नीशरीरयोः" इत्यमरः। [यम्] शम्भुम् [विचिन्वन्ति] मृगयन्ते। [मनीषिणः] विद्वांसः [यस्य] शम्भोः [पदम्] स्थानम् अविद्यमानम् [आवृत्तेः] पुनः संसारापत्तेः [भयम्] यत्र तत्तथाभूतम् [आहुः] ॥ ७७ ॥

स इति। [विश्वस्य] जगतः [कर्मणाम् साक्षी] द्रष्टा। साक्षाद् द्रष्टरि संज्ञायामिति (५,२,९१पा०) इनिप्रत्ययः। वरान् इष्टान् ददातीति [वरदः।] आतोऽनुपसर्गे कः (३,२,३पा०) इति कप्रत्ययः। [सः] पूर्वोक्तः शम्भुः [अस्मत्संक्रामितैः पदैः] अस्मासु निवेशितैर्वाक्यैः [ते दुहितरम्] साक्षात् [वृणुते] अस्मन्मुखेन स्वयमेव याचत इत्यर्थः ॥ ७८ ॥

तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।
अशोच्या हि पितुः कन्या सद्भर्तृप्रतिपादिता ॥७९
यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ॥८०
प्रणम्य शितिकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥८१॥
उमा वधूर्भवान् दाता याचितार इमे वयम् ।

तमिति । तम् शम्भुम् [भारत्या] वाचा [अर्थम्] अभिधेयम् [इव] सुतया दुहित्रा योक्तुम् सङ्घटयितुम् [अर्हसि] । अत्र वागर्थयोः उपमानत्वसामर्थ्याच्छिवयोर्नित्ययोगो विवक्षित इत्युक्तम् वागर्थाविव सम्पृक्तावित्यत्रापि । तथाहि [सद्भर्त्रे प्रतिपादिता दत्ता [कन्या पितुः अशोच्या ॥ ७९ ॥

गुणान्तरमप्याह, –

यावन्तीति । स्थावराणि चराणि च यावन्त्येतानि] [भूतानि] सन्तीति शेषः । सर्वाणि भूतानीत्यर्थः [एनाम्] त्वद्दुहितरम् [मातरं कल्पयन्तु ।] [हि] यस्मात् [ईशः जगतः पिता ।] पितृदारेषु मातृभावो न्याय्य इति भावः ॥ ८० ॥

प्रणम्येति । [विबुधाः] देवाः [शितिकण्ठाय] शिवाय [प्रणम्य तदनन्तरम्] नीलकण्ठप्रणामानन्तरम् [अस्याश्चरणौ] [चूडामणिमरीचिभिः रञ्जयन्तु] ईश्वरपरिग्रहादखिलदेवतावन्द्या भवत्वित्यर्थः ॥ ८१

उमेति । [उमा वधूः] [भवान् दाता] [इमे वयम्] [याचि-

वर: शम्भुरलं ह्येष त्वत्कुलोद्भूतये विधि: ॥८२॥
अस्तोतु: स्तूयमानस्य वन्द्यस्यानन्यवन्दिन: ।
सुतासम्बन्धविधिना भव विश्वगुरोर्गुरु: ॥८३॥
एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥८४॥
शैल: सम्पूर्णकामोऽपि मेनामुखमुदैक्षत ।

तार:] प्रार्थका: [शम्भु: वर:] [वोढा एष: विधि:] एषा सामग्री [त्वत्कुलस्य उद्भूतये] उच्छ्रयाय [अलम्] पर्याप्तं हि नम:स्वस्तिस्वाहास्वधेत्यादिना (२,३,१६पा०) चतुर्थी ॥ ८२ ॥

अस्तोतुरिति । स्वयमन्यस्तोता न भवतीति [अस्तोतु:] किन्तु [स्तूयमानस्य] सर्वस्तुत्यस्य [वन्द्यस्य] जगद्वन्द्यस्य स्वयमन्यं न वन्दत इति [अनन्यवन्दिन:] [विश्वगुरो:] देवस्य [सुतासम्बन्धविधिना] यौनसम्बन्धाचरणेन [गुरुर्भव ।] यो नान्यं स्तौति न वन्दते तस्यापि त्वं स्तुत्यो वन्द्यश्चेत्यहो तव भाग्यवत्ता इत्यर्थ: ॥ ८३ ॥

एवमिति । [देवर्षौ] अङ्गिरसि [एवं वादिनि] सति [पार्वती पितु: पार्श्वे अधोमुखी] सती लज्जयेति शेष: । [लीलाकमलपत्राणि गणयामास] सङ्ख्यौ । लज्जावशात् कमलदलगणनाव्याजेन हर्षं जुगोपेत्यर्थ: । अनेन अवहित्थाख्य: सञ्चारी भाव उक्त: । तदुक्तम् । "अवहित्था तु लज्जादेर्हर्षाद्याकारगोपनम्" इति ॥ ८४ ॥

शैल इति [शैल:] हिमवान् [सम्पूर्णकामोऽपि] दातुं क्षतनिश्चयोऽपीत्यर्थ: । [मेनामुखम्] [उदैक्षत] उचितोत्तरजिज्ञा-

प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः ॥८५॥

मेने मेनापि तत्सर्वं पत्युः कार्य्यमभीप्सितम् ।
भवन्त्यव्यभिचारिण्यो भर्त्तुरिष्टे पतिव्रताः ॥८६॥

इदमत्रोत्तरं न्याय्यमिति बुद्धा विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ॥८७॥

एहि विश्वात्मने वत्से ! भिक्षासि परिकल्पिता ।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया ॥८८॥

तयेति भावः । तथा हि [प्रायेण] [कुटुम्बिनः] गृहस्थाः [कन्यार्थेषु] कन्याप्रयोजनेषु [गृहिणीनेत्राः] गृहिण्येव [नेत्रम्] कार्य्यज्ञापकं येषान्ते तथोक्ताः कलत्रप्रधानवृत्तय इत्यर्थः ॥ ८५ ॥

मेने इति । [मेनापि] [पत्युः] हिमालयस्य [तत्सर्वम् अभीप्सितम्] [कार्य्यं मेने] अङ्गीचकार । तथा हि [पतिः] एव [व्रतम्] यासां ताः [भर्त्तुः इष्टे अभीप्सिते] न विद्यते व्यभिचारो यासां ता [अव्यभिचारिण्यः भवन्ति] भर्तृचित्ताभिज्ञा भवन्तीति भावः ॥ ८६ ॥

इदमिति । [सः] हिमवान् [वचसामन्ते] मुनिवाक्यावसाने [अत्र] मुनिवाक्ये [इदम्] उत्तरश्लोके वक्ष्यमाणं दानमेव [न्याय्यम्] न्यायादनपेतम् [उत्तरमिति] [बुद्धा] चित्तेन [विमृश्य] विचिन्त्य मङ्गलं यथा तथा अलङ्कृताम् [मङ्गलालङ्कृताम्] [सुताम्] [आददे] हस्ताभ्यां जग्राह ॥ ८७ ॥

एहीति । हे [वत्से !] पुत्रि ! [एहि] आगच्छ [त्वम्] विश्वात्मने] शिवाय [भिक्षा] [परिकल्पितासि] निश्चितासि । "रत्नादिस्तम्बपर्यन्तं सर्वं भिक्षा तपस्विनः" इति

सिद्धं चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥८४

पशुपतिरपि तान्यहानि कृच्छ्रा-
दगमयदद्रिसुतासमागमोत्कः ।
कमपरमवशं न विप्रकुर्यु-
र्विभुमपि तं यदमी स्पृशन्ति भावाः ॥८५॥

इति श्रीकालिदासकृतौ कुमारसम्भवे महाकाव्ये
उमाप्रदानो नाम षष्ठः सर्गः ॥ ६ ॥

[प्राप्य] [सिद्धम्] निष्पन्नम् [अर्थम्] प्रयोजनम् [अस्मै] [निवेद्य च] ज्ञापयित्वा च [तद्विसृष्टाः] तेन शूलिना विसृष्टाः [खम्] आकाशम् प्रति [उद्ययुः] उत्पेतुः । अत्र संक्षिप्तार्थाभिधानात् संक्षेपो नाम गुण उक्तः तदुक्तं "संक्षिप्तार्थाभिधानं यत् संक्षेपः परिकीर्त्तित" इति ॥ ८४ ॥

भगवान् पशुपतिः त्र्यहमात्रविलम्बमपि सोढुं न शशाक तदौत्सुक्यातिशयात्,—

पशुपतिरिति । उत्कं मनो यस्य सः उत्कः । उत्क उन्मना इति (५,२,८० पा०) निपातः । [अद्रिसुतासमागमोत्कः] पार्वतीपरिणयोत्सुकः [पशुपतिरपि] [तानि] त्रीणीति शेषः [अहानि] [कृच्छ्रादगमयत्] अयापयत् । कविराह [अमी भावाः] औत्सुक्यादयश्चित्तविकाराः [अवशम्] इन्द्रियपरतन्त्रम् [अपरम्] पृथग्जनम् [कम्] न [विप्रकुर्युः] न विकारं नयेयुः । [यत्] यस्मात् [विभुम्] समर्थं जितेन्द्रियमिति यावत् [तम्] स्मरहरम् [अपि] [स्पृशन्ति] विकुर्वन्तीत्यर्थः । अ

सप्तमः सर्गः।

—∘∘—

अथौषधीनामधिपस्य वृद्धौ
तिथौ च जामित्रगुणान्वितायाम्।
समेतबन्धुर्हिमवान् सुताया
विवाहदीक्षाविधिमन्वतिष्ठत्॥ १॥

विभुविकारसमर्थनादर्थादितरजनविकारः कैमुतिकन्यायादापततीत्यर्थापत्तिरलङ्कारः। तथा च सूत्रं "दण्डापूपिकयार्थान्तरं पतनमर्थापत्तिरिति"। अर्थान्तरन्यास इति केचित् तदुपेक्षणीयं युक्तिस्तु विस्तरभयान्नोच्यते। पुष्पिताग्रावृत्तम्। "अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रेति" लक्षणात्॥ ९५॥

इति श्रीमन्महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां कुमारसम्भवव्याख्यायां सञ्जीवनीसमाख्यायां षष्ठः सर्गः॥ ६॥

अथेति। [अथ] विवाहानन्तरम् [हिमवान्] [ओषधीनामधिपस्य] चन्द्रस्य [वृद्धौ] शुक्लपक्ष इत्यर्थः। शुभकर्मस्वापूर्यमाणपक्षस्य ग्राह्यत्वात्। [तिथौ च] [जामित्रम्] लग्नात्सप्तमं स्थानं तस्य [गुणः] शुद्धिः सा च ग्रहराहित्यं तेन [अन्वितायाम्] सत्याम्। यद्यपि जामित्रगुणो लग्नधर्मः तथापि तद्द्वारा तिथेरपि तथा व्यपदेशे न दोषः। [समेतबन्धुः] मिलितबन्धुः सन् [सुतायाः] दुहितुः [विवाहदीक्षा]

वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम् ।
आसीत् पुरं सानुमतोऽनुरागा-
दन्तःपुरञ्चैककुलोपमेयम् ॥ २ ॥

सन्तानकाकीर्णमहापथं त-
च्चीनांशुकैः कल्पितकेतुमालम् ।
भासोज्ज्वलत्काञ्चनतोरणानां
स्थानान्तरं स्वर्ग इवाबभासे ॥ ३ ॥

विवाहसंस्कारः सैव [विधिः] कर्म तम् [अन्वतिष्ठत्] कृतवान् ॥ १ ॥

वैवाहिकैरिति । [अनुरागात्] प्रीतिवशात् [गृहे गृहे] प्रतिगृहम् । (८,१,४पा०) वीप्सायां द्विर्भावः । विवाहः प्रयोजनमेषामिति [वैवाहिकानि] तैः । प्रयोजनमिति (५,१,१०९पा०) ठक् । [कौतुकसंविधानैः] मङ्गलार्थसम्पादनैः [व्यग्रः] व्याकुलः [पुरन्ध्रिवर्गः] कुटुम्बिनीसंघो यस्मिन् तत्तथोक्तम् [सानुमतः] अद्रेः [पुरम्] वाह्यमोषधिप्रस्थम् [अन्तःपुरम्] अवरोधनञ्च [एककुलेन] एकगृहेण वा [उपमेयमासीत्] "सजातीयगणे गोत्रे गृहेऽपि कायितं कुलम्" इति विश्वः । सर्वेषामपि स्वगृह एव इदं शोभनं वर्त्तत इत्यभिमानोऽभूदित्यर्थः । एतेन हिमाद्रेः प्रजारागः उक्तः । अत्र सर्वं सम्पन्नमेवेत्यर्थः ॥ २ ॥

सन्तानेति । [सन्तानकैः] मन्दारकुसुमैः [आकीर्ण-

एकैव सत्यामपि पुत्त्रपङ्क्तौ
चिरस्य दृष्टेव मृतोत्थितेव ।
आसन्नपाणिग्रहणेति पित्रो-
रुमा विशेषोच्छ्वसितं बभूव ॥ ४ ॥
अङ्काद्ययावङ्कमुदीरिताशीः
सा मण्डनान्मण्डनमन्वभुङ्क्त ।

आस्तृताः [महापथाः] राजकीयपथाः यस्मिन् तत्तथोक्तं [चीनांशुकैः] पट्टवस्त्रैः [कल्पिताः] विरचिताः [केतुमालाः] ध्वजपङ्क्तयो यस्य तत्तथोक्तं [काञ्चनतोरणानाम् भासा] प्रभया [उज्ज्वलत्] दीप्यमानम् [तत्] पुरम् [स्थानान्तरम्] मेरोरन्यत्र स्थितः [स्वर्ग इव] आबभासे । उत्प्रेक्षालङ्कारः ॥३॥

एकैवेति । पुत्राश्च दुहितरश्च [पुत्राः] । भ्रातृपुत्रौ स्वसृदुहितृभ्याम् (१,२,६८पा०) इत्येकशेषः । 'पुत्रौ पुत्रश्च दुहिता च" इत्यमरः । तेषां [पङ्क्तौ] सत्यां सत्यामपि [उमा एकैव] [चिरस्य दृष्टेव] चिरान्नष्टलब्धेव [मृतोत्थितेव] मृत्वा पुनरुत्पन्नेव [आसन्नपाणिग्रहणा] आसन्नविवाहेति भर्तृगृहं गमिष्यतीति हेतोरित्यर्थः । [पित्रोः] मातापित्रोः । पिता मात्रा (१,२,७०पा०) इत्येकशेषः । [विशेषेणोच्छ्वसितम्] प्राणभूता [बभूव] पुमपत्यादपि अधिकप्रेमास्पदमभूदित्यर्थः ॥ ४ ॥

अङ्कादिति । [सा] पार्वती [उदीरिताशीः] प्रयुक्ताशीर्वादा सती [अङ्कात्] [अङ्कम्] उत्सङ्गम् [ययौ] [मण्डनात्] मण्डनान्तरमन्यत् [मण्डनम्] [अन्वभुङ्क्त] तदा सर्वे बन्धवः प्रत्ये

सम्बन्धिभिन्नोऽपि गिरेः कुलस्य
स्नेहस्तदेकायतनं जगाम ॥ ५ ॥
मैत्रे मुहूर्त्ते शशलाञ्छनेन
योगं गतासूत्तरफल्गुनीषु ।
तस्याः शरीरे प्रतिकर्म चक्रु-
र्बन्धुस्त्रियो याः पतिपुत्रवत्यः ॥ ६ ॥
सा गौरसिद्धार्थनिवेशवद्भि-

कमेव तामङ्कमारोप्य मण्डनं प्रायच्छन्नित्यर्थः । तच्च स्नेहनिबन्धनमेवेत्याह, [सम्बन्धिभिन्नः] स्वपुत्रादिभिः भिन्नो विभक्तोऽपि [गिरेः] [कुलस्य] वंशस्य [स्नेहः] [तदेकायतनम्] सैवैकमायतनं स्थानं तत् [जगाम] । तदिति छेदेऽप्ययमेवार्थः विधेयप्राधान्यान्नपुंसकत्वमिति । सर्वे बन्धवः स्वापत्येभ्योऽपि तस्यामधिकं स्निह्यन्तीति तात्पर्य्यार्थः ॥ ५ ॥

मैत्र इति । [अथ] [मैत्रे] मित्रदैवत्ये [मुहूर्त्ते] उदयमुहूर्त्तात्तृतीयमुहूर्त्ते इत्यर्थः । "आर्द्रः सार्द्रस्तथा मैत्रः शुभोवासव एव चेति" बृहस्पतिस्मरणात् । "उत्तरफल्गुनीषु" फलगुनीनक्षत्रे । "फल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे (१,२,६०पा०) इत्येकस्मिन्नपि बहुवचनम् । [शशलाञ्छनेन] चन्द्रेण [योगम्] गतासु सतीषु [तस्याः] पार्वत्याः [शरीरे] [बन्धुस्त्रियः] [प्रतिकर्म] प्रसाधनम् । "प्रतिकर्म प्रसाधनम्" इत्यमरः । [चक्रुः] कीदृश्यः [याः] [पतिपुत्रवत्यः] जीवद्भर्तृका जीवदपत्याश्चेत्यर्थः ॥ ६ ॥

दूर्वाप्रवालैः प्रतिभिन्नशोभम् ।
निर्नाभिकौशेयमुपात्तबाण-
मभ्यङ्गनेपथ्यमलञ्चकार ॥ ७ ॥
बभौ च सम्पर्कमुपेत्य बाला
नवेन दीक्षाविधिसायकेन ।
करेण भानोर्बहुलावसाने
सन्धुक्ष्यमाणेव शशाङ्करेखा ॥ ८ ॥
तां लोध्रकल्केन हृताङ्गतैला-

प्रतिकर्मप्रकारमेव प्रपञ्चयति ।

सेति। [सा] गौरी [गौरसिद्धार्थनिवेशवद्भिः] श्वेत-सर्षपप्रक्षेपवद्भिः [दूर्वाप्रवालैः] दूर्वाङ्कुरैः [प्रतिभिन्न-शोभम्] विशेषितशोभम् [निर्नाभि] अतिक्रान्तनाभि [कौशेयम्] वस्त्रविशेषो यस्मिन् तत्तथोक्तम्। "कौशेयं क्रिमिकोशोत्थम्" इत्यमरः। [उपात्तबाणम्] गृहीतशरम्। "शरः क्षत्रियया ग्राह्य" इति (३अ०४४श्लो०) मनुस्मरणात् [अभ्यङ्गनेपथ्यम्] अभ्यङ्गवेशम् [अलञ्चकार]। अलङ्कारमप्यलञ्चकारेत्यर्थः ॥७॥

बभाविति। किञ्चेति चार्थः। [बाला] [नवेन] [दीक्षा-विधौ] विवाहकृत्ये यः [सायकः] तेन [सम्पर्कमुपेत्य] [बहुला-वसाने] कृष्णपक्षात्यये शुक्लपक्षादावित्यर्थः। [भानोः करेण] किरणेन [सन्धुक्ष्यमाणा] उपचीयमाना। "सलिलमये शशिनि रवेर्दीधितयोमूर्च्छितास्तमोनैशम्। क्षपयन्ति" इत्यादिवचनात्। [शशाङ्करेखेव बभौ] ॥ ८ ॥

तामिति। [लोध्रकल्केन] लोध्रचूर्णेन [हृतमङ्गतैलम्]

माध्यानकालेयकृताङ्गरागाम् ।
वासो वसानामभिषेकयोग्यं
नार्थ्यश्चतुष्काभिमुखं व्यनैषुः ॥ ९ ॥

विन्यस्तवैदूर्यशिलातलेऽस्मि-
न्नाबद्धमुक्ताफलभक्तिचित्रे ।
आवर्जिताष्टापदकुम्भतोयैः
सतूर्य्यमेनां स्नपयाम्बभूवुः ॥ १० ॥

सा मङ्गलस्नानविशुद्धगात्री

यस्यास्तां कृतोद्वर्त्तनामित्यर्थः । [आध्यानम्] ईषच्छुष्कं तेन [कालेयेन] गन्धद्रव्येण [कृताङ्गरागाम्] कृतस्नेहधारामित्यर्थः । "अथ जायकं कालेयकञ्च कालानुसार्य्यम्" चेत्यमरः । [अभिषेकयोग्यम्] [वासः] वस्त्रम् [वसानाम्] स्नानशाटीमाच्छादयन्तीम् [ताम्] पार्वतीम् [नार्य्यः] । [चतुष्कम्] [चतुस्तम्भगृहम्] तदभिमुखम् [व्यनैषुः] । स्नानगृहं निन्युरित्यर्थः ॥९॥

विन्यस्तेति । [विन्यस्तं वैदूर्य्यशिलातलम्] मरकतशिलाप्रदेशो यस्मिन् तस्मिन् [आबद्धानां मुक्ताफलानां भक्तिभिः] । रचनाभिः [चित्रे] [अस्मिन्] चतुष्के [एनाम्] पार्वतीम् [आवर्ज्जितानाम्] आनमितानाम् [अष्टापदकुम्भानाम्] कनककलसानाम् [तोयैः] [सतूर्य्यम्] मङ्गलवाद्ययुक्तं यथा तथा [स्नपयाम्बभूवुः] । अष्टसु लोहेषु पदं प्रतिष्ठा यस्येति अष्टापदम् । अष्टनः संज्ञायामिति (६,३,१२५पा०) दीर्घः । "अष्टापदं स्यात् कनकमिति" विश्वः ॥ १० ॥

गृहीतपत्युद्गमनीयवस्त्रा ।
निर्वृत्तपर्जन्यजलाभिषेका
प्रफुल्लकाशा वसुधेव रेजे ॥ ११ ॥
तस्मात् प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ।
पतिव्रताभिः परिगृह्य निन्ये
क्लृप्तासनं कौतुकवेदिमध्यम् ॥ १२ ॥

सेति । [मङ्गलार्थस्नानेन विशुद्धगात्री] निर्मलाङ्गी पत्युर्वरस्य उद्गमनीयवस्त्रं धौतवस्त्रम् । "धौतमुद्गमनीयं स्यादिति" हलायुधः । "तत् स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम्" इत्यमरः । युगग्रहणन्तु प्रायिकाभिप्रायम् । अतएवात्र क्षीरस्वामी युगं प्रायशः, एकञ्च तदेव इति व्याख्याय गृहीतपत्युद्गमनीयवस्त्रेत्येतदेव उदाहृतवान् । [गृहीतम् पत्युः] प्रति [उद्गमनीयवस्त्रम् यया सा धौतवस्त्रमाच्छादितवतीत्यर्थः । [सा] पार्वती [निर्वृत्तः] निष्पन्नः [पर्जन्यस्य जलेनाभिषेकः] यस्याः सा तथोक्ता । प्रफुल्लतीति [प्रफुल्लम्] [काशम्] काशपुष्पं यस्याः सा तथोक्ता [वसुधेव] [रेजे] शुशुभे ॥ ११ ॥

तस्मादिति । किञ्चेति चार्थः । [तस्मात् प्रदेशात्] स्नानप्रदेशात् [वितानवन्तम्] उल्लोचयुक्तम् । "अस्त्री वितानमुल्लोच" इत्यमरः । [मणिस्तम्भचतुष्टयेन] [युक्तम्] [क्लृप्तम्] सज्जितम् [आसनम्] यस्मिन् तत् [कौतुकवेदिमध्यम्] [पतिव्रताभिः] [परिगृह्य] दोर्भ्याम् धारयित्वा [निन्ये] नीता प्रापि-

कर्णार्पितो लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभाद्-
बबन्ध चक्षूंषि यवप्ररोहः ॥ १७ ॥
रेखाविभक्तः सुविभक्तगात्र्याः
किञ्चिन्मधूच्छिष्टविमृष्टरागः ।

वाक्यात्प्रसक्तमपि [विच्छेदं] अभिमत्। प्रसक्तयोः परिभूतत्वादन्यत्र चाप्रसक्तादित्यर्थः। अत्र पूर्वार्धवाक्यार्थस्य साहस्यकथाच्छेदं प्रति हेतुत्वेनोपन्यासात् काव्यलिङ्गमलङ्कारः लक्षणमुक्तम् (१स०४८श्लो०टी०) ॥ १६ ॥

कर्णेति। [तस्याः] गौर्याः [कर्णे अर्पितः] निक्षिप्तः [यवप्ररोहः] यवाङ्कुरः [लोध्रस्य] द्रव्यविशेषस्य कषायेण विलेपनेन [रूक्षे] विग्रहे उद्वर्त्तिते इत्यर्थः। "कषायो रसभेदे स्यादङ्गरागे विलेपने" इति विश्वः। [गोरोचनायाः क्षेपेण] विन्यासेन [नितान्तगौरे] अत्यन्तारुणे। "गौरः श्वेतेऽरुणे पीते" इति विश्वः। [कपोले] गण्डस्थले [परभागलाभात्] वर्णोत्कर्षप्राप्तेः [चक्षूंषि] द्रष्टॄणामिति शेषः [बबन्ध] जहार आकर्षयेत्यर्थः। गोरोचनारुणे गण्डस्थले यवाङ्कुरो विजातीयवर्णसन्निधानाल्लब्धवर्णोत्कर्षः सन् चक्षुराकर्षकोऽभूदिति भावः ॥ १७ ॥

रेखेति। [सुविभक्तगात्र्याः] सुसंश्लिष्टावयवायाः पार्वत्याः [रेखया] मध्यगतया [विभक्तः सुश्लिष्टः [किञ्चित्] ईषत् [मधूच्छिष्टेन] सिक्थकेन [विमृष्टः] [विशेषेण निर्मलीकृतः

कामप्यभिख्यां स्फुरितैरपुष्य-
दासन्नलावण्यफलोऽधरोष्ठः ॥ १८ ॥

पत्युः शिरश्चन्द्रकलामनेन
स्पृशेति सख्या परिहासपूर्वम्।
सा रञ्जयित्वा चरणौ कृताशी-
र्माल्येन तां निर्वचनं जघान ॥ १९ ॥

[रागः] यस्य सः तथोक्तः। "मधूच्छिष्टन्तु सिक्थकमिति" "निर्णिक्तं शोधितं मृष्टम्" इति चामरः। अन्यत्रोक्तम् "लौहित्यापगमायाधरेषु सिक्थकलेपः क्रियते" [आसन्नम्] सन्निहितम् लावण्यफलम् सौन्दर्य्यप्रयोजनं मुखचुम्बनादि-रूपं यस्य स तथोक्तः [अधरोष्ठः] [स्फुरितैः] भाविशुभशंसिभिः स्पन्दैः [काम्] अनिर्वाच्याम् अपि [अभिख्याम्] शोभाम् [अपुष्यत्] पुपोष। "अभिख्यानामशोभयोः" इत्यमरः ॥१८॥

पत्युरिति। [सख्या] कर्त्र्या [चरणौ रञ्जयित्वा] लाक्षारसाक्तौ कृत्वा कृताशीरिति करोतिना समानकर्तृकत्वम्। [अनेन] चरणेन। रञ्जने द्वयोरपि नियमाच्चरणावित्युक्तापि औचित्यात्ताड़नविधौ एकतरपरामर्श इत्याहुः। [पत्युः] ईश्वरस्य [शिरश्चन्द्रकलाम्] सुरतविशेषे इति शेषः। [स्पृश] ताड़येति [परिहासपूर्वम्] [कृताशीः] प्रयुक्ताशीर्वादा [सा] पार्वती [ताम्] सखीम् [माल्येन] मालया। "माल्यं मालास्रजौ" इत्यमरः। [निर्वचनम्] यथातथा तूष्णीमित्यर्थः [जघान] ताड़यामास। निर्वचनमित्यनेन निरुक्ताख्यः शृङ्गारानुभाव उक्तः। तदुक्तं "प्रश्नवाक्यन्तु यद्ब्रूयात् अर्थात्र

तस्याः सुजातोत्पलपत्त्रकान्ते
प्रसाधिकाभिर्नयने निरीक्ष्य ।
न चक्षुषोः कान्तिविशेषबुद्ध्या
कालाञ्जनं मङ्गलमित्युपात्तम् ॥ २० ॥

सा सम्भवद्भिः कुसुमैर्लतेव
ज्योतिर्भिरुद्यद्भिरिव त्रियामा ।
सरिद्विहङ्गैरिव लीयमानै-
रामुच्यमानाभरणा चकाशे ॥ २१ ॥

विहितं हि तत्" इति ॥ १९ ॥

तस्या इति । [प्रसाधिकाभिः] अलङ्कर्त्रीभिः [सुजाते] सम्यगुत्पन्ने [उत्पलपत्त्रे] इव [कान्ते] रम्ये [तस्याः नयने निरीक्ष्य] [कालाञ्जनम्] अञ्जनविशेषः [चक्षुषोः कान्तिविशेषबुद्ध्या] शोभातिशयो भविष्यति इति बुद्धेरित्यर्थः [न उपात्तम्] न गृहीतं किन्तु [मङ्गलम्] शुभमिति हेतोः [उपात्तम्] निसर्गसुभगस्य किमाहार्य्यकाडम्बरेणेति भावः ॥२०॥

सेति । [आमुच्यमानाभरणा] निबध्यमानाभरणा [सा] गौरी [सम्भवद्भिः] उत्पद्यमानैः [कुसुमैर्लतेव] अनेन पद्मरागेन्द्रनीलादीन्याभरणानि सूचितानि लताकुसुमानां नानावर्णत्वात् । [उद्यद्भिः] उदयम् गच्छद्भिः [ज्योतिर्भिः] उडुभिः [त्रियामा] रात्रिः [इव] अनेन मौक्तिकानि कथितानि । [लीयमानैः] आश्रयद्भिर्निषीदद्भिरित्यर्थः [विहङ्गैः] चक्रवाकैः [सरिदिव] अनेन सुवर्णाभरणानि सूचितानि विहङ्गाव

आत्मानमालोक्य च शोभमान-
मादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव
स्त्रीणां प्रियालोकफलो हि वेशः ॥२२॥
अथाङ्गुलिभ्यां हरितालमार्द्रं
माङ्गल्यमादाय मनःशिलाञ्च ।
कर्णावसक्तामलदन्तपत्त्रं
माता तदीयं मुखमुन्नमय्य ॥ २३ ॥

तत् सूचनाय चक्रवाकाः अभिमताः । [चक्राशे] रेजे । अत्र लताकुसुमादीनां सहजसम्बन्धिनामुपमानत्वेनोपादानात् आहार्य्यकमपि तस्याः सहजमिवाशोभत इति भावः ॥२१॥

आत्मानमिति । किञ्चेति चार्थः । गौरी [शोभमानम् आत्मानम्] निजशरीरम् [आदर्शबिम्बे] दर्पणमण्डले । "दर्पणे मुकुरादर्शौ" इत्यमरः । [स्तिमितायताक्षी] आदरान्निश्चलायतलोचना सती [आलोक्य] [हरोपयाने] हरप्राप्तौ [त्वरिता] व्यग्रा [बभूव ।] [स्त्रीणां वेशः] नेपथ्यम् [प्रियस्य] भर्त्तुः [आलोकः] दर्शनम् [फलम्] यस्य स तथोक्तः [हि ।] अन्यथा अरण्यचन्द्रिका स्यादिति भावः । अनेन कालाक्षमत्वलक्षणमौत्सुक्यमुक्तमित्यनुसन्धेयम् ॥ २२ ॥

अथेति । [अथ] प्रसाधनानन्तरम् [माता] मेनका [माङ्गल्यम्] मङ्गलार्थम् [आर्द्रम्] द्रवम् [हरितालम्] वर्णद्रव्यविशेषम् [मनः शिलाम्] धातुविशेषम् [च] [अङ्गुलिभ्याम्] तर्ज्जनीमध्यमाभ्याम् [आदाय] [कर्णयोरवसक्ते] लग्ने [अ-

उमास्तनोद्भेदमनु प्रवृद्धो
मनोरथो यः प्रथमं बभूव ।
तमेव मेना दुहितुः कथञ्चि-
द्विवाहदीक्षातिलकञ्चकार ॥ युग्मकम्॥२४

बबन्ध चास्राकुलदृष्टिरस्याः
स्थानान्तरे कल्पितसन्निवेशम् ।
धात्रङ्गुलीभिः प्रतिसार्य्यमाण-
मूर्णामयं कौतुकहस्तसूत्रम् ॥ २५ ॥

मले दन्तपत्रे] यस्य तत्तथोक्तं तस्याः पार्वत्याः इदम् [तदीयं मुखम् उन्नमय्य] । विवाहदीक्षातिलकं चकारेत्युत्तरश्लोकेनान्वयः ॥ २३ ॥

उमेति । [उमायाः स्तनोद्भेदम् अनु] स्तनोदयमारभ्येत्यर्थः [प्रवृद्धः] वृद्धिं गतः प्रागेवोत्पन्न इति भावः [यो मनोरथः] वाञ्छा । "वाञ्छा लिप्सा मनोरथः" इत्यमरः । [प्रथमम्] मनोरथान्तरात् प्राक् अयमेव प्रथमोमनोरथ इत्यर्थः [बभूव] । [मेना दुहितुस्तमेव] मनोरथभूतमेव । तद्विषये तत्तोपचारः । [विवाहदीक्षायाम्] विवाहकृत्ये [तिलकं कथञ्चित्] कृच्छ्रेण [चकार] आनन्दवाष्पान्धतयेति शेषः । विवाहानन्तरभावित्वादन्येषाम् अयमेव प्रथमो मनोरथ इति भावः । युग्मकम् ॥ २४ ॥

बबन्धेति । [अस्याः] पार्वत्याः [अस्रैः] आनन्दवाष्पैः [आकुलदृष्टिः] अतएव [स्थानान्तरे कल्पितः सन्निवेशः] नि-

क्षीरोदवेलेव सफेनपुञ्जा
पर्य्याप्तचन्द्रेव शरत्त्रियामा।
नवं नवक्षौमनिवासिनी सा
भूयो बभौ दर्पणमादधाना॥ २६ ॥
तामर्च्चिताभ्यः कुलदेवताभ्यः
कुलप्रतिष्ठां प्रणमय्य माता।

क्षेपो यस्य तत् स्वस्थानादन्यत्र स्थापितमित्यर्थः। अतएव [धात्र्याः] उपमातुः। [अङ्गुलीभिः] [प्रतिसार्य्यमाणम्] स्वस्थानं प्राप्यमाणम् [ऊर्णामयम्] मेषादिलोमनिर्म्मितम्। ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः। [कौतुकहस्तसूत्रम्] मङ्गलहस्तसूत्रं "कौतुकं मङ्गले हर्षे हस्तसूत्रे कुतूहल" इति शाश्वतः। [बबन्ध च] मेनेति शेषः। पूर्वोक्ततिलकक्रिया-समुच्चयार्थश्चकारः॥ २५ ॥

क्षीरोदेति। नवं नूतनं क्षौमं दुकूलं निवस्ते आच्छादयतीति [नवक्षौमनिवासिनी]। वस्तेराच्छादनार्थाण्णिनिः। तथा [नवम्] [दर्पणमादधाना] बिभ्रती [सा] गौरी [सफेनपुञ्जा] सडिण्डीरपङ्क्तिः। क्षीरमुदकं यस्य सः [क्षीरोदः] क्षीरसमुद्रः। उदकस्योदः संज्ञायाम् (६,३,५७पा०) इत्युदादेशः। तस्य [वेला] तीरभूमिः [इव।] "वेला काले च जलधेस्तीरे तीरविकारयोः" इति विश्वः। [पर्य्याप्तचन्द्रा] पूर्णचन्द्रा [शरत्त्रियामा] शरद्रात्रिः [इव] [भूयः] भूयिष्ठम् [बभौ] चकाशे॥ २६ ॥

तामिति। [कारयितव्येषु दक्षा] कारयित्री कर्मोपदे-

अकारयत् कारयितव्यदक्षा
क्रमेण पादग्रहणं सतीनाम् ॥ २७ ॥
अखण्डितं प्रेम लभस्व पत्यु-
रित्युच्यते ताभिरुमा स्म नम्रा ।
तया तु तस्यार्द्धशरीरभाजा
पश्चात्कृताः स्निग्धजनाशिषोऽपि ॥ २८ ॥
इच्छाविभूत्योरनुरूपमद्रि-

प्रकुशलेत्यर्थः । [माता] मेना प्रतितिष्ठति अस्यामिति प्रतिष्ठा । आतश्चोपसर्गे (३,१,३६पा०) इति कः । स्त्रियां टाप् । [कुलस्य प्रतिष्ठाम्] कुलालम्बनभूतां स्थितिकारिणी-मित्यर्थः । [ताम्] गौरीम् । [अर्च्चिताभ्यः] पूजिताभ्यः [कुल-देवताभ्यः] गृहदेवताभ्यः [प्रणमय्य] प्रणतां कारयित्वा । ल्यपि लघुपूर्वात् (६,४,५६पा०) इति णेरयादेशः । [सती-नाम्] पतिव्रतानाम् [पादग्रहणम्] पादाभिवन्दनम् [क्रमेण अकारयत्] कारयामास । हृक्रोरन्यतरस्यामिति (१,४,५३ पा०)अन्यत्र च (१) नमेरकर्मकत्वात् गतिबुद्धीत्यादिना (१, ४,५२पा०) अणिकर्तुः कर्मत्वम् ॥ २७ ॥

अखण्डितमिति । [नम्रा] प्रणता [उमा ताभिः] स-तीभिः [पत्युः] शिवस्य [अखण्डितम्] अक्षतम् [प्रेम लभस्व] प्राप्नुहि [इत्युच्यते स्म] अभिहिता । लट् स्मे (३,२,११८) इति भूतार्थे लट् । [तस्य] हरस्य, अर्द्धं शरीरस्य, अर्द्धशरीरम् ।

(१) अन्यत्र प्रणमय्येत्यत्र नमेरकर्मकत्वात् अकर्मकत्वेन विवक्षणात् तात्पर्यमित्यर्थः ।

स्तस्याः कृती कृत्यमशेषयित्वा।
सभ्यः सभायां सुहृदास्थितायां
तस्थौ वृषाङ्कागमनप्रतीक्षः॥ २९॥

तावद्भवस्यापि कुबेरशैले
तत्पूर्वपाणिग्रहणानुरूपम्।
प्रसाधनं मातृभिरादृताभि-
र्न्यस्तं पुरस्तात् पुरशासनस्य॥ ३०॥

अव्ययं नपुंसकमिति (२,२,२,पा०) समासः। तज्जतीति [अर्धशरीरभाजा तया] गौर्य्या [तु स्निग्धजनाशिषः] बन्धुजनाशीर्वादाः [अपि पश्चात्कृताः] अधरीकृताः ततोऽप्यधिकफललाभादिति भावः॥ २८॥

इच्छाविभूत्योरिति। [कृती] कुशलः सभायां साधुः [सभ्यः]। सभायां यः (४,४,१०५पा०) इति यप्रत्ययः। [अद्रिः] हिमवान् [इच्छाविभूत्योः] उत्साहैश्वर्य्ययोः [अनुरूपम्] सदृशं यथा तथा [तस्याः] पार्वत्याः [कृत्यम्] कर्त्तव्यम् [अशेषयित्वा] अशेषं निःशेषं कृत्वा समाप्येत्यर्थः। अशेषशब्दात्तत्करोतीति (३,१,२६पा०वा०) ण्यन्तात् क्त्वाप्रत्ययः। [सुहृदास्थितायाम्] बन्धुजनाक्रान्तायाम् [सभायाम्] संसदि [वृषाङ्कस्य] हरस्य [आगमनं प्रतीक्षते] इति तथोक्तः सन्। कर्मण्यण् (३,२,१पा०) इति अण्। [तस्थौ] स्थितः॥ २९॥

तावदिति। [तावत्] यावद्गौरी प्रसाधनम् क्रियते तत्काल एवेत्यर्थः। [कुबेरशैले] कैलासे तदेव पूर्वम् [तत्पूर्वम्]

तद्गौरवान्मङ्गलमण्डनश्रीः
सा पस्पृशे केवलमीश्वरेण ।
स एव वेशः परिणेतुरिष्टं
भावान्तरं तस्य विभोः प्रपेदे ॥ ३१ ॥

बभूव भस्मैव सिताङ्गरागः
कपालमेवामलशेखरश्रीः ।

तच्च तत् [पाणिग्रहणम्] तस्य [अनुरूपम् प्रसाधनम्] अलङ्कारसामग्री [आहृताभिः] सादराभिः । कर्त्तरि क्तः । [मातृभिः] ब्राह्मीप्रभृतिभिः सप्तमातृकाभिः (१) [पुरम्] शास्तीति पुरशासनः तस्य [पुरशासनस्य ।] कर्त्तरि ल्युट् । [भवस्यापि] [पुरस्तात्] अग्रे [न्यस्तम्] निक्षिप्तम् ॥ ३० ॥

तदिति । [ईश्वरेण] शिवेन [सा मङ्गलमण्डनश्रीः] शुभप्रसाधनसम्पत् [तद्गौरवात्] तासु मातृषु आदरात् [केवलम् पस्पृशे] स्पृष्टैव न तु दध्रे इत्यवधारणार्थः केवलशब्दः । "केवलश्चावधारणे" इति शाश्वतः । किन्तु [तस्य विभोः] देवस्य [स एव वेशः] स्वाभाविको भस्मकपालादिवेश एव [परिणेतुः] लोके उद्वोढुः [इष्टम्] अपेक्षितम् [भावान्तरम्] रूपान्तरम् [प्रपेदे] अङ्गरागादिरूपतां प्रापेत्यर्थः ॥ ३१ ॥

भावान्तरापत्तिमेवाह,—

बभूवेति । [भस्मैव सिताङ्गरागः] शुक्लगन्धानुलेपनम् [बभूव] । कपालमेव [अमलं शेखरम्] शिरोभूषणं तस्य

(१) ब्राह्मी च वैष्णवी चैन्द्री रौद्री वाराहिकी तथा ।
कौबेरी चैव कौमारी मातरः सप्त कीर्त्तिताः ॥

उपान्तभागेषु च रोचनाङ्को
गजाजिनस्यैव दुकूलभावः ॥ ३२ ॥
शङ्खान्तरद्योति विलोचनं य-
दन्तर्निविष्टामलपिङ्गतारम् ।
सान्निध्यपक्षे हरितालमय्या-
स्तदेव जातं तिलकक्रियायाः ॥ ३३ ॥
यथाप्रदेशं भुजगेश्वराणां

[श्रीः] शोभा [बभूव]। [गजाजिनस्यैव उपान्तभागेषु] अञ्चलप्रदेशेषु [रोचनैवाङ्कः] हंसादिचिह्नं यस्य स तथोक्तः [दुकूलभावः] पट्टांशुकत्वञ्च [बभूव ।] भस्मादिकमेवाङ्गरागादिभावं प्राप्तमित्यर्थः ॥ ३२ ॥

शङ्खेति । [शङ्खान्तरे] ललाटास्थिमध्ये [द्योतते] इति तथोक्तम् । "शङ्खो निधौ ललाटास्थ्नि" इत्यमरः । [अन्तर्निविष्टा मध्यगता [अमला पिङ्गा तारा] कनीनिका यस्य तत्तथोक्तम् । "तारकाक्ष्णः कनीनिका" इत्यमरः । [यत् विलोचनं] [तत् विलोचनमेव] [हरितालमय्याः] वर्णद्रव्यविशेषविकारस्य [तिलकक्रियायाः] तिलकरचनायाः सन्निधिरेव सान्निध्यं तदेव पक्षः साध्यम् । "पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु" इति यादवः । तस्मिन् [सान्निध्यपक्षे जातम्] प्रविष्टमित्यर्थः अनेन ललाटलोचनमेव तस्य हरितालतिलकमभूदित्युक्तम् ॥ ३३ ॥

यथेति [यथाप्रदेशम्] 'प्रदेशान् प्रकोष्ठादीननतिक्रम्य

करिष्यतामाभरणान्तरत्वम् ।
शरीरमात्रं विकृतिं प्रपेदे
तथैव तस्थुः फणरत्नशोभाः ॥ २४ ॥

दिवापि निष्ठ्यूतमरीचिभासा
बाल्यादनाविष्कृतलाञ्छनेन ।
चन्द्रेण नित्यं प्रतिभिन्नमौले-
श्चूडामणेः किं ग्रहणं हरस्य ॥ २५ ॥

इत्यद्भुतैकप्रभवः प्रभावात्
प्रसिद्धनेपथ्यविधेर्विधाता ।

[आभरणान्तरत्वम्] कङ्कणाद्याभरणविशेषत्वम् [करिष्यताम्] सम्पादयिष्यताम् [भुजगेश्वराणां शरीरमात्रम्] शरीरमेव [विकृतिम्] रूपान्तरम् [प्रपेदे] । [फणरत्नशोभास्तथैव तस्थुः] तासां तथैवोपादेयत्वादिति भावः ॥ २४ ॥

दिवेति । [दिवा] दिने [अपि निष्ठ्यूताः] उद्गीर्णाः मरीचिभासः] किरणकान्तयो यस्य तेन [बाल्यात्] अल्पतनुत्वात् [अनाविष्कृतलाञ्छनेन] अदृश्यमानकलङ्केनेत्यर्थः । [चन्द्रेण नित्यम्] सर्वदा [प्रतिभिन्नमौलेः] सङ्गतमुकुटस्य [हरस्य चूडामणेर्ग्रहणम्] स्वीकारः [किम् ?] किमर्थम् ? । चन्द्रचूडामणेर्देवस्य किम् ? अन्यैश्चूडामणिभिरिति भावः ॥ २५ ॥

इतीति [इति] इत्थम् [प्रभावात्] सामर्थ्यात् [प्रसिद्धनेपथ्यविधेः] वेशविधानस्य [विधाता] निर्माता । अतएव [अद्भुतानाम्] आश्चर्याणाम् [एकप्रभवः] मुख्यनिधिः स देव

आत्मानमासन्नगणोपनीते
खड्गे निषक्तप्रतिमं ददर्श ॥ ३६ ॥
स गोपतिं नन्दिभुजावलम्बी
शार्दूलचर्मान्तरितोरुपृष्ठम् ।
तद्भक्तिसंक्षिप्त बृहत्प्रमाण-
मारुह्य कैलासमिव प्रतस्थे ॥ ३७ ॥
तं मातरो देवमनुव्रजन्त्यः
स्ववाहनक्षोभचलावतंसाः ।
मुखैः प्रभामण्डलरेणुगौरैः
पद्माकरं चक्रुरिवान्तरीक्षम् ॥ ३८ ॥

[आसन्नगणेन] पार्श्वस्थवर्गेण प्रमथगणेनेत्यर्थः [उपनीते] आनीते [खड्गे निषक्तप्रतिमम्] सङ्क्रान्तप्रतिबिम्बम् [आत्मानम्] [ददर्श ।] वीरपुरुषाणामेष आचारः ॥ ३६ ॥

स इति । [सः] देवः [नन्दिभुजावलम्बी] नन्दिकेश्वरभुजावलम्बनः सन् [शार्दूलचर्मणा] व्याघ्रचर्मणा [अन्तरितम्] आच्छादितम् [उरु] विशालम् [पृष्ठम्] यस्य तं तथोक्तम् । "शार्दूलद्वीपिनौ व्याघ्रे" इत्यमरः । तस्मिन् देवे [भक्त्या संक्षिप्तम्] सङ्कोचितम् [बृहत् प्रमाणम्] यस्य तम् [कैलासमिव गोपतिम्] वृषभम् [आरुह्य प्रतस्थे] चचाल ॥ ३७ ॥

तमिति । [तम्] [देवम् अनुव्रजन्त्यः] अनुगच्छन्त्यः [स्ववाहनानां क्षोभेण] प्रकम्पेण [चलावतंसाः] चलकुण्डलाः [मातरः] सप्त मातृकाः [प्रभामण्डलानि] एव [रेणवः]

तासाञ्च पश्चात् कनकप्रभाणां
काली कपालाभरणा चकाशे ।
वलाकिनी नीलपयोदराजी
दूरं पुरःक्षिप्तशतह्रदेव ॥ ३८ ॥

ततो गणैः शूलभृतः पुरोगै-
रुदीरितो मङ्गलतूर्य्यघोषः ।
विमानशृङ्गाण्यवगाहमानः
शशंस सेवावसरं सुरेभ्यः ॥ ४० ॥

परागाः तैः [गौरैः] अरुणैः । "गौरोऽरुणे सिते पीते" इति यादवः । [मुखैः] [अन्तरीक्षम्] आकाशम् [पद्माकरमिव चक्रुः] ॥ ३८ ॥

तासामिति । [कनकप्रभाणाम्] सुवर्णवर्णानाम् [तासाम्] मातॄणाम् [पश्चात् कपालाभरणा] सितकपालालङ्कारेत्यर्थः । [काली] महाकाली देवी च । कृष्णवर्णत्वसूचनाय कालीसंज्ञया अभिधानम् । वलाकिनी वलाकावती । (५,२,११६ पा०) व्रीह्यादित्वादिनिः । [दूरम्] यथा तथा [पुरः] अग्रे [क्षिप्ताः] प्रसारिताः [शतह्रदाः] विद्युतो यस्याः सा तथोक्ता [नीलपयोदराजी] कालमेघपङ्क्तिः [इव] [चकाशे] ॥ ३९ ॥

तत इति । [ततः] अनन्तरम् [शूलभृतः] शिवस्य पुरो गच्छन्तीति । [पुरोगैः] अग्रेसरैः । अन्यत्रापि दृश्यत इति वक्तव्यमिति (३,२,४८पा०वा०) गमेर्डप्रत्ययः । [गणैः] प्रमथैः [उदीरितः] उत्पादितः [मङ्गलतूर्य्यघोषः] मङ्गलवाद्यध्वनिः

उपाददे तस्य सहस्ररश्मि-
स्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूलादविदूरमौलि-
र्बभौ पतद्गङ्ग इवोत्तमाङ्गे ॥ ४१ ॥
मूर्त्ते च गङ्गायमुने तदानीं
सचामरे देवमसेविषाताम् ।

[विमानशृङ्गाण्यवगाहमानः] [सुरेभ्यः] विमानस्थेभ्यः [सेवावसरं शशंस]। सुराः प्रस्थानतूर्य्यध्वनिमाकर्ण्य अयमेव नः सेवावसर इत्याजग्मुरित्यर्थः ॥ ४० ॥

उपेति । [तस्य] हरस्य [सहस्ररश्मिः] सूर्य्यः [त्वष्ट्रा] विश्वकर्मणा [निर्मितं नवमातपत्रम् उपाददे] धृतवानित्यर्थः । उत्प्रेक्षते तद्दुकूलात्तस्यातपत्रस्य प्रान्तलम्बिनः [दुकूलादविदूरमौलिः] तद्दुकूलस्यासन्नमौलिरित्यर्थः । [सः] हरः [उत्तमाङ्गे] शिरसि । "उत्तमाङ्गं शिरः शीर्षम्" इत्यमरः । पतन्ती गङ्गा यस्य सः [पतद्गङ्ग इव बभौ]। तद्दुकूलादित्यत्र दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामिति (२,३,३४ पा०) दूरार्थयोगे विकल्पेन पञ्चमी । नाथेनोक्तम् अन्यारादित्यत्र (२,३,२९पा०) आराच्छब्दस्यार्थग्रहणार्थत्वात् पञ्चमीति तदनाकरम् । किञ्चास्य शास्त्रोक्तविकल्पापवादत्वात् दूरं ग्रामस्येत्यादि षष्ठीप्रयोगः दूरापास्तः स्यादित्युपेक्षणीयमेव ॥४१॥

मूर्त्ते इति । गङ्गा च यमुना च [गङ्गायमुने मूर्त्ते] विग्रहधारिण्यौ [सचामरे] चामरसहिते सत्यौ अतएव [समुद्रगा] नदी तस्याः [रूपम्] स्वरूपं तस्य [विपर्य्यये अपि] अभावे अपि ।

समुद्रगारूपविपर्ययेऽपि
सहंसपाते इव लक्ष्यमाणे ॥ ४२ ॥
तमभ्यगच्छत् प्रथमोविधाता
श्रीवत्सलक्ष्मा पुरुषश्च साक्षात् ।
जयेति वाचा महिमानमस्य
संवर्द्धयन्तौ हविषेव वह्निम् ॥ ४३ ॥
एकैव मूर्त्तिर्बिभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम् ।

सह हंसपातेन हंससञ्चारेण वर्त्तते इति [सहंसपाते इव] तेन सहेति तुल्ययोगे (२,२,२८पा०) इति बहुव्रीहिः। वोपसर्ज्जनस्येति (६,३,२८पा०) सभावः [लक्ष्यमाणे] दृश्यमाने सत्यौ [तदानीम्] विवाहसमये [देवमसेविषाताम्] अभजताम्। सेवतेर्लुङ्। गङ्गायमुने चामरग्राहिण्यौ देवमुपतस्थतु रित्यर्थः ॥ ४२ ॥

तमिति। [प्रथमः] आद्यः [विधाता] चतुर्मुखः तथा [श्रीवत्सलक्ष्मा श्रीवत्साङ्कः [पुरुषः] विष्णुश्च [साक्षात् तम्] देवम् [अभ्यगच्छत्] संमुखमाययौ किं कुर्वन्तौ [जयेति वाचा] जयशब्देन [अस्य] ईश्वरस्य [महिमानम्] महत्त्वम् [हविषा वह्निमिव संवर्द्धयन्तौ] वृद्धिं गमयन्तौ ॥ ४३ ॥

न चानुचितमेतदुक्तमित्याह,—

एकैवेति। [सा एकैव मूर्त्तिस्त्रिधा] ब्रह्मविष्णुशिवात्मकत्वेन [बिभिदे]। औपाधिकोऽयं भेदो न वास्तविक इत्यर्थः।

विष्णोर्हरस्तस्य हरिः कदाचित्
वेधास्तयोस्तावपि धातुराद्यौ ॥ ४४ ॥
तं लोकपालाः पुरुहूतमुख्याः
श्रीलक्षणोत्सर्गविनीतवेषाः ।
दृष्टिप्रदाने कृतनन्दिसंज्ञा-
स्तद्दर्शिताः प्राञ्जलयः प्रणेमुः ॥ ४५ ॥

अतएव [एषाम्] त्रयाणाम् प्रथमावरयोर्भावः [प्रथमावरत्वम्] ज्येष्ठकनिष्ठभावः [सामान्यम्] साधारणम् । इच्छया सर्वे ज्येष्ठा भवन्ति कनिष्ठाश्चेत्यर्थः । एतदेव विवृणोति [कदाचित् हरः विष्णोः आद्यः] कदाचित् [हरिस्तस्याद्यः] कदाचित् [वेधाः तयोः] हरिहरयोः [आद्यः] [कदाचित्] [तौ] हरिहरौ [अपि] [धातुः] स्रष्टुः [आद्यौ] एवमेतेषां पौर्वापर्य्यमनियतमिति दर्शितम् ॥ ४४ ॥

तमिति । [पुरुहूतमुख्याः] इन्द्रादयः [लोकपालाः] [श्रीलक्षणानाम्] ऐश्वर्य्यचिह्नानां छत्रचामरवाहनानाम् [उत्सर्गेण] त्यागेन [विनीतवेषाः] अनुनीतवेषाः सन्तः तथा [दृष्टिप्रदाने] दर्शननिमित्ते दर्शनप्रदानार्थमित्यर्थः । [कृतानन्दिनः] प्रतीहारस्य [संज्ञा] सङ्केतो यैस्तादृशाः मम दर्शनं दापयेति नन्दिनं प्रति कृतहस्तादिसूचना इत्यर्थः । "संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना" । इत्यमरः [तद्दर्शिताः] तेन नन्दिना दर्शिताः अयमिन्द्रः प्रणमति अयं चन्द्र इत्याद्युक्तिपूर्वकं निवेदिताः [प्राञ्जलयः] कृताञ्जलयः सन्तः [तम्] भवम् [प्रणेमुः] प्रणताः ॥ ४५ ॥

कम्पेन मूर्ध्नः शतपत्त्रयोनिं,
वाचा हरिं, वृत्रहणं स्मितेन ।
आलोकमात्रेण सुरानशेषान्,
सम्भावयामास यथाप्रधानम् ॥ ४६ ॥

तस्मै जयाशीः ससृजे पुरस्तात्
सप्तर्षिभिस्तान् स्मितपूर्वमाह ।
विवाहयज्ञे वितते ऽत्र यूय-
मध्वर्य्यवः पूर्ववृता मयेति ॥ ४७ ॥

विश्वावसुप्राग्रहरैः प्रवीणैः

कम्पेनेति । [सः] देवः [शतपत्त्रयोनिम्] चतुर्मुखम् [मूर्ध्नः कम्पेन] तथा [हरिं वाचा] सम्भाषणेन वृत्रं हतवन्तं [वृत्रहणम्] इन्द्रम् ब्रह्मभ्रूणवृत्रेषु क्विप् (३,२,८७पा०) इति क्विप् । [स्मितेन] मन्दहासेन [अशेषान् सुरानालोकमात्रेण] दृष्टिमात्रेण इत्थं [यथाप्रधानम्] यथार्हम् [सम्भावयामास] ॥४६

तस्मा इति । [तस्मै] शिवाय [सप्तर्षिभिः] । दिक्संख्ये संज्ञायाम् इति (२,१.५०पा०) समासः । [पुरस्तात्] अग्रे [जयेति, आशीः] [ससृजे] प्रयुक्ता । [तान्] सप्तर्षीन् [स्मित-पूर्वमाह ।] किमिति । [अत्र वितते] विस्तृते प्रवर्त्तिते [विवाहः] एव [यज्ञः] तस्मिन् [यूयम् मया] [पूर्वम्] एव [वृताः] प्रार्थिताः [अध्वर्य्यवः] ऋत्विजः [इति] विशेषवाचिना सामान्यमुक्तम् ॥ ४७ ॥

विश्वावस्विति । [विश्वावसुः] नाम कश्चिद् गन्धर्वः देव-

सङ्गीयमानत्रिपुरावदानः।
अध्वानमध्वान्तविकारलङ्घ्य-
स्ततार ताराधिपखण्डधारी ॥ ४८ ॥
खे खेलगामी तमुवाह वाहः
सशब्दचामीकरकिङ्किणीकः।
तटाभिघातादिव लग्नपङ्के
धुन्वन् मुहुः प्रोतघने विषाणे ॥ ४९ ॥

गायकः [तत् प्राग्रहरैः] तत्प्रमुखैः [प्रवीणैः] प्रकृष्टवीणैः निपुणैर्वा। "प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः" इत्यमरः। त्रयाणां पुराणां समाहारस्त्रिपुरम्। तद्धितार्थोत्तरपदेत्यादिना (२,१,५१पा०) समाहारसमासः। पात्रादिभ्यः प्रतिषेधो वक्तव्यः स नपुंसकमिति (२,४,१७) सूत्रवृत्ती (सि० कौ० ३९७पृ०स्वबा०) इति स्त्रीलिङ्गात्वतानिषेधः। त्रिपुरस्य सम्बन्धि अवदानम् पूर्ववृत्तं कर्म विजयरूपम् [त्रिपुरावदानम्] तत् सङ्गीयमानम्] स्तूयमानं यस्य स तथोक्तः। "अवदानं कर्म वृत्तम्" इत्यमरः। ध्वान्तम् तमो मोह इति यावत् तद्विकारेण रागादिना लङ्घ्योऽभिभवनीयो न भवतीति [अध्वान्तविकारलङ्घ्यः।] विवाहादिकन्तु तस्य लीलेत्यर्थः। [ताराधिपखण्डधारी] चन्द्रशेखरः शम्भुः [अध्वानम्] मार्गम् [ततार] अत्यगच्छत् ॥ ४८ ॥

खेइति। [खे] आकाशे खेलं सुन्दरं गच्छतीति [खेलगामी] [सशब्दाः] शब्दायमानाः [चामीकरकिङ्किण्यः] काञ्चनक्षुद्रघण्टिकाः यस्य स तथोक्तः। "किङ्किणी क्षुद्र-

स प्रापदप्राप्तपराभियोगं
नगेन्द्रगुप्तं नगरं मुहूर्त्तात् ।
पुरोविलग्नैर्हरदृष्टिपातैः
सुवर्णसूत्रैरिव कृष्यमाणः ॥ ५० ॥

तस्योपकण्ठे घननीलकण्ठः
कुतूहलादुन्मुखपौरदृष्टः ।
स्ववाणचिह्नादवतीर्य्य मार्गा-
दासन्नभूपृष्ठमियाय देवः ॥ ५१ ॥

घण्टिकाः" इत्यमरः । "मयूतश्च" इति कप् वाह्यते अनेनेति वाहो वृषभः । करणे घञ् । [प्रीतघने] स्यूतमेघे अतएव [तटाभिघातात्] [रोधोभेदात्] [लग्नपङ्के] श्लिष्टकर्दमे [इव] स्थिते [विषाणे] शृङ्गे [मुहुर्धुन्वन्] [तम्] हरम् [उवाह] वहति स्म ॥४८॥

स इति । [सः] वाहः [न प्राप्तः पराभियोगः] शत्रुसमाक्रान्तिर्यस्य तत्तथोक्तं [नगेन्द्रेण] हिमवता [गुप्तम्] रक्षितम् [नगरम्] ओषधिप्रस्थम् [पुरः] अग्रे [विलग्नैः] संक्रान्तैः [हरदृष्टिपातैः सुवर्णसूत्रैः कृष्यमाण इव] [मुहूर्त्तात्] प्रापत् अन्यथा कथं दूरस्याशुप्राप्तिः स्यादिति भावः । पुरः प्रसृताः हरदृष्टयः पिङ्गलवर्णत्वात् सौवर्णानि वृषाकर्षणदामानीव अलक्ष्यन्त इत्यर्थः ॥ ५० ॥

तस्येति । [तस्य] पुरस्य [उपकण्ठे] अन्तिके घनः मेघ इव नीलः कण्ठो यस्य स [घननीलकण्ठः] [देवः] [कुतू-

तमृद्धिमद्बन्धुजनाधिरूढै-
र्वृन्दैर्गजानां गिरिचक्रवर्त्ती ।
प्रत्युज्जगामागमनप्रतीतः
प्रफुल्लवृक्षैः कटकैरिव स्वैः ॥ ५२ ॥

वर्गावुभौ देवमहीधराणां
द्वारे पुरस्योद्घटितापिधाने ।
समीयतुर्दूरविसर्पिघोषौ
भिन्नैकसेतू पयसामिवौघौ ॥ ५३ ॥

कूलात्] दर्शनीत्सुक्यात् [उन्मुखैः पौरैर्दृष्टः] सन् [स्वबाण-चिह्नात्] त्रिपुरविजयसमये स्वबाणाङ्कात् [मार्गात्] कृत-च्छिद्राकाशदेशात् [अवतीर्य] अवरुह्य [आसन्नभूपृष्ठम्] निकटभूतलम् [इयाय] प्राप ॥ ५१ ॥

तमिति । [आगमनेन] शिवागमनेन [प्रतीतः] हृष्टः [गिरिचक्रवर्त्ती] पर्वताधिराजः हिमवान् [ऋद्धिमता] वस्त्रालङ्कारादिसमृद्धेन [बन्धुजनेन अधिरूढैः] अनेन बन्धूनां समस्वाम्यं सूचितम् । [गजानां वृन्दैः] [प्रफुल्लाः] विकासितकुसुमाः [वृक्षाः] येषु तैः [स्वैः] स्वकीयैः [कटकैः] नितम्बैः [इव] [तम्] हरम् [प्रत्युज्जगाम] अभिययौ । "कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः ॥ ५२ ॥

वर्गाविति । [दूरविसर्पी] दूरगामी [घोषः] ययोस्तौ देवाश्च महीधराश्च तेषाम् [देवमहीधराणाम्] [उभौ वर्गौ] [उद्घटितापिधाने] अपनीतकवाटे [पुरस्य द्वारे] भिन्नः दीर्णः

ह्रीमानभूद्भूमिधरो हरेण
त्रैलोक्यवन्द्येन कृतप्रणामः ।
पूर्वं महिम्ना स हि तस्य दूर-
मावर्जितं नात्मशिरो विवेद ॥ ५४ ॥
स प्रीतियोगाद्विकसन्मुखश्री-
र्जामातुरग्रेसरतामुपेत्य ।

एकसेतु याभ्यां तौ [भिन्नैकसेतू] [पयसामोघौ] प्रवाहौ [इव] [समीयतुः] सङ्गतौ ॥ ५३ ॥

ह्रीमानिति । [भूमिधरः] हिमवान् त्रयो लोकाः [त्रैलोक्यम्] चातुर्वर्ण्यादित्वात् (५,१,१२४पा०सू०वा०) ष्यञ्-प्रत्ययः । तस्य [वन्द्येन] नमस्कार्येण [कृतप्रणामः] सन् । "ऋत्विक्पितृव्यश्वशुरमातुलानां यवीयसाम् । प्रवयाः प्रथमं कुर्यात् प्रत्युत्थायाभिवादनम्" इति स्मरणात् । [ह्रीमान-भूत्] महादेवं प्रति स्वयमल्पत्वात् सङ्कोचं प्रापेत्यर्थः । ननु विदितेश्वरमहिम्नः स्वयं प्रागेव प्रणतस्य जामातुराचारमात्र-स्वीकारे कः सङ्कोच इति शङ्कां निरस्यति,—पूर्वमिति [हि] यस्मात् [सः] हिमवान् [पूर्वम्] प्रागेव [तस्य] ईश्वरस्य [महिम्ना] सामर्थ्येन [दूरम्] अत्यन्तम् [आवर्जितम्] नमि-तम् [आत्मशिरः न विवेद] सत्यं स्वयं प्रणतत्वानुसन्धानेन सङ्कोचः तदनुसन्धानन्त्वौत्सुक्यान्नास्तीति भावः ॥ ५४ ॥

स इति । [प्रीतियोगात्] सन्तोषसम्बन्धात् [विकसन्मुख-श्रीः] विकसन्ती मुखश्रीर्यस्य स तथोक्तः [सः] हिमवान् जायां मिमीते जानातीति [जामातुः] वरस्य । (६,३,१०८

प्रावेशयन्मन्दिरमृद्धमेन-
मागुल्फकीर्णापणमार्गपुष्पम् ॥ ५५ ॥
तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-
मीशानसन्दर्शनलालसानाम् ।
प्रासादमालासु बभूवुरित्थं
त्यक्तान्यकार्य्याणि विचेष्टितानि ॥ ५६ ॥
आलोकमार्गं सहसा व्रजन्त्या
कयाचिदुद्वेष्टनवान्तमाल्यः ।

पा०) पृषोदरादित्वात्साधु । "जामाता दुहितुः पतिरिति" अमरः [अग्रेसरताम्] पुरोगामित्वम् [उपेत्य] [एनम्] देवम् आगुल्फं पादग्रन्थिपर्यन्तं कीर्णानि पर्यस्तानि आपणमार्गेषु पण्यवीथिकासु पुष्पाणि यस्मिन् तत् [आगुल्फकीर्णापणमार्गपुष्पम् ।] "तद्ग्रन्थी घुटिके गुल्फौ" इत्यमरः । [ऋद्धम्] समृद्धम् [मन्दिरम्] नगरम् । "मन्दिरं नगरेऽगारे मन्दिरोमकरालये" इति विश्वः । [प्रावेशयत्] ॥ ५५ ॥

तस्मिन्निति । [तस्मिन्मुहूर्त्ते] हरपुरप्रवेशसमये [ईशानस्य सन्दर्शने लालसानाम्] लोलुपानाम् । "लोलुपो लोलुभो लोलो लालसोलम्पटश्च सः" इति यादवः । [पुरसुन्दरीणाम्] [प्रासादमालासु] [इत्थम्] वक्ष्यमाणप्रकारेण [त्यक्तान्यकार्य्याणि] विसृष्टकार्यान्तराणि [विचेष्टितानि] व्यापाराः । नपुंसके भावे क्तः (३,३,११४ पा०) इति क्तः [बभूवुः] आसन् ॥ ५६ ॥

तान्येवाह पञ्चभिः श्लोकैः,—

बन्धुं न सम्भावित एव तावत्
करेण रुद्धोऽपि च केशपाशः ॥ ५७ ॥

प्रसाधिकालम्बितमग्रपाद-
माक्षिप्य काचिद् द्रवरागमेव ।
उत्सृष्टलीलागतिरा गवाक्षा-
दलक्तकाङ्कां पदवीं ततान ॥ ५८ ॥

विलोचनं दक्षिणमञ्जनेन

आलोकेति। [आलोकमार्गम्] दर्शनपथं गवाक्षमित्यर्थः। [सहसा व्रजन्त्या] गच्छन्त्या [कयाचित्] [उद्वेष्टनः] द्रुतगतिवशादुन्मुक्तबन्धनः अतएव [वान्तमाल्यः] उद्गीर्णमाल्यश्च यः सः [उद्वेष्टनवान्तमाल्यः] [करेण रुद्धः] गृहीतः [अपि च] [केशपाशः] केशकलापः। "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः। [तावत्] आलोकनमार्गप्राप्तिपर्यन्तम् [बन्धुम्] बन्धनायेत्यर्थः। [न सम्भावितः] न स्मृत एव॥ ५७॥

प्रसाधिकेति। [काचित्] स्त्री [प्रसाधिकया] अलङ्कर्त्र्या [आलम्बितम्] रञ्जनार्थं धृतम् [द्रवरागमेव] आर्द्रालक्तकमेव अग्रश्चासौ पादश्च [अग्रपादः] इति समानाधिकरणसमासः। "हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदाभ्याम्" इति वामनः। तम् आक्षिप्य आकृष्य [उत्सृष्टलीलागतिः] त्यक्तमन्दगमना सती [आ गवाक्षात्] गवाक्षपर्यन्तं पदद्वयमेतत्। [पदवीमलक्तकाङ्काम्] लाक्षारसचिह्नाम् [त-

सम्भाव्य तद्वञ्चितवामनेत्रा।
तथैव वातायनसन्निकर्षं
ययौ शलाकामपरा वहन्ती॥ ५९॥
जालान्तरप्रेषितदृष्टिरन्या
प्रस्थानभिन्नां न बबन्ध नीवीम्।
नाभिप्रविष्टाभरणप्रभेण
हस्तेन तस्थाववलम्ब्य वासः॥ ६०॥

विलोचनमिति। [अपरा] स्त्री [दक्षिणम्] विलोचनम् [अञ्जनेन सम्भाव्य] अलङ्कृत्य [तद्वञ्चितम्] तेनाञ्जनेन वञ्चितम् [वामनेत्रम्] यस्याः सा तथोक्ता सती [तथैव] तेनैव रूपेण [शलाकाम्] अञ्जनकूर्चिकाम् [वहन्ती] बिभ्रती [वातायनसन्निकर्षम्] गवाक्षसमीपम् [ययौ] दक्षिणग्रहणं संभ्रमात् व्युत्क्रमद्योतनार्थं "सव्यं हि पूर्वं मनुष्या अञ्जते" इति श्रुतेः॥ ५९॥

जालान्तरेति। [अन्या] स्त्री [जालान्तरप्रेषितदृष्टिः] गवाक्षमध्यप्रसारितदृष्टिः सती [प्रस्थानेन] गमनेन [भिन्नाम्] त्रुटिताम् [नीवीम्] वस्त्रग्रन्थिम्। "नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससि" इति विश्वः। [न बबन्ध] नाबध्नात्। किन्तु [नाभिं प्रविष्टा] [आभरणानाम्] किङ्किणीनाम् [प्रभा] यस्य तेन। प्रभैव नाभेरावरणम् [अभूत्] इति भावः। [हस्तेन वासोऽवलम्ब्य] धृत्वा [तस्थौ] ॥ ६०॥

अर्धाचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलन्ती।
कस्याश्चिदासीद्रशना तदानी-
मङ्गुष्ठमूलार्पितसूत्रशेषा॥ ६१॥

तासां मुखैरासवगन्धगर्भै-
र्व्याप्तान्तराः सान्द्रकुतूहलानाम्।
विलोलनेत्रभ्रमरैर्गवाक्षाः
सहस्रपत्राभरणा इवासन्॥ ६२॥

तावत् पताकाकुलमिन्दुमौलि-
रुत्तोरणं राजपथं प्रपेदे।

अर्धेति। [सत्वरम्] सवेगम् [उत्थितायाः] [कस्याश्चित्] अर्धमाचिता मणिभिर्गुम्फिता [अर्धाचिता] [दुर्निमिते] सम्भ्रमाद्दुःखेन निक्षिप्ते डु मिञ् प्रक्षेपणे इति धातोः कर्मणि क्तः। [पदे पदे] प्रतिपदं वीप्सायां द्विर्भावः। [गलन्ती] गलद्रत्ना सती [रशना] मेखला [तदानीम्] तस्मिन्नवसरे [अङ्गुष्ठमूले अर्पितम्] लगितम् [सूत्रम्] एव [शेषः] यस्याः सा [आसीत्]॥ ६१॥

तासामिति। तदानीं [सान्द्रकुतूहलानाम् तासाम्] स्त्रीणाम् [आसवगन्धो गर्भे] येषु तैः [विलोलानि नेत्राणि] एव [भ्रमराः] येषु तैः [मुखैर्व्याप्तान्तराः] छन्नावकाशाः [गवाक्षाः] [सहस्रपत्राभरणा इवासन्] कमलालङ्कृता एव

प्रासादशृङ्गाणि दिवापि कुर्वन्
ज्योत्स्नाभिषेकद्विगुणद्युतीनि ॥ ६३ ॥
तमेकदृश्यं नयनैः पिबन्त्यो
नार्य्यो न जग्मुर्विषयान्तराणि।
तथाहि शेषेन्द्रियवृत्तिरासां
सर्वात्मना चक्षुरिव प्रविष्टा ॥ ६४ ॥

तावदिति। [तावत्] तस्मिन्नवसरे [इन्दुमौलिः] ई-श्वरः [दिवापि प्रासादशृङ्गाणि] [ज्योत्स्नाया] अभिषेकेण स्नपनेन [द्विगुणद्युतीनि] द्विरावृत्तकान्तीनि। "गुणस्त्वावृ-त्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु" इति वैजयन्ती। [कुर्वन्] [पताकाभिराकुलम्] आकीर्णम् [उत्तोरणम्] उच्छ्रिततोर-णम् [राजपथं प्रपेदे] ॥ ६३ ॥

तमिति। एकः एव दृश्यः दर्शनीयः तम् [एकदृश्यम् तम्] ईश्वरम् [नयनैः पिबन्त्यः] अतितृष्णया पश्यन्त्य इ-त्यर्थः। [ताः शङ्करं दृष्टिभिरापिबन्त्यः] इति वा पाठः। [नार्यो विषयान्तराणि] ततोऽन्यान्विषयान् शब्दादीनित्यर्थः। [न जग्मुः] न विदुरित्यर्थः। [तथाहि आसाम्] नारीणाम् [शेषेन्द्रियवृत्तिः] श्रोत्रादिप्रवृत्तिः [सर्वात्मना] [स्वरूपकार्त्-स्न्येन [चक्षुः प्रविष्टेव] श्रोत्रादिनीन्द्रियाणि स्वातन्त्र्येण ग्रहणासामर्थ्याच्चक्षुरेव प्रविश्य कौतुकात् स्वयमप्येनमुपलभन्ते किमु ?। अन्यथा स्वस्वविषयाधिगमः किं न स्यादिति

स्थाने तपो दुश्चरमेतदर्थ-
मपर्णया पेलवयापि तप्तम्।
या दास्यमप्यस्य लभेत नारी
सा स्यात् कृतार्था किमुताङ्कशय्याम् ॥६५॥

परस्परेण स्पृहणीयशोभं
न चेदिदं द्वन्द्वमयोजयिष्यत्।
अस्मिन् द्वये रूपविधानयत्नः
पत्युः प्रजानां विफलोऽभविष्यत् ॥ ६६ ॥

अथ पौराङ्गनावचनान्याह,—

स्थान इति। [पेलवया] कोमलया [अपि] [अपर्णया पार्वत्या एतस्मै शिवाय इदम् [एतदर्थम्।] अर्थेन सह नित्यसमासः सर्वलिङ्गता चेति (२,१,३६सू०वा० विशेष्यनिघ्नत्वम्। [दुश्चरं तपस्तप्तं स्थाने युक्तम्। कुतः? या नारी अस्य] ईश्वरस्य [दास्यम् दासीत्वम् अपि लभेत सा कृतार्था स्यात्।] या अङ्क एव शय्या ताम् [अङ्कशय्याम्] लभेत सा [किमुत?] कृतार्थेति किमु वक्तव्यमित्यर्थः ॥ ६५ ॥

परस्परेणेति। [स्पृहणीयशोभम्] सर्वैराशास्यमानसौन्दर्यम् [इदं द्वन्द्वम्] मिथुनम्। द्वन्द्वं रहस्येत्यादिना (८,१,१५पा०) निपातः। [परस्परेण नायोजयिष्यत् चेत्] न योजयेद्यदि [प्रजानां पत्युः] विधातुः [अस्मिन् द्वये द्वन्द्वे रूपविधाने] सौन्दर्यनिर्माणे [यत्नः] प्रयासः [विफलोऽभविष्यत्] भवेत। एतदनुरूपस्त्रीपुंसान्तराभावादिति भावः। लिङ्

न नूनमारूढरुषा शरीर
मनेन दग्धं कुसुमायुधस्य ।
व्रीडादमुं देवमुदीक्ष्य मन्ये
सन्न्यस्तदेहः स्वयमेव कामः ॥ ६७ ॥

अनेन सम्बन्धमुपेत्य दिष्ट्या
मनोरथप्रार्थितमीश्वरेण ।
मूर्द्धानमालि ! क्षितिधारणोच्च-
मुच्चैस्तरं वक्ष्यति शैलराजः ॥ ६८ ॥

नेति । [आरूढरुषा] प्ररूढकोपेन [अनेन] हरेण [कुसुमायुधस्य] कामस्य [शरीरं न दग्धं नूनम्] किन्तु [कामः अमुं देवमुदीक्ष्य] दृष्ट्वा [व्रीडात्] सौन्दर्य्येण जितोऽस्मीति लज्जया स्वयमेव सन्न्यस्तदेहः] त्यक्तदेह इति [मन्ये] इत्युत्प्रेक्षा । न स्वयं न्यस्ताकृतेः कोपः सम्भवतीति भावः ॥ ६७ ॥

काचित्काश्चिदाह,—

अनेनेति । हे [आलि!] सखि ! । "आलिः सखी वयस्या च" इत्यमरः । [शैलराजः] हिमवान् [दिष्ट्या] इत्यानन्देऽव्ययम् । [मनोरथैः प्रार्थितम्] अवरुद्धम् अभिलाषविषयीकृतमित्यर्थः । "प्रार्थना याच्ञावरोधयोः" इत्यभिधानात् । [अनेन] ईश्वरेण [सम्बन्धमुपेत्य] अवाप्य [क्षितिधारणेनोच्चम्] उन्नतम् [मूर्द्धानमुच्चैस्तरम्] उन्नततरम् । उच्चैरित्यव्ययात्तप्प्रत्ययः । मूर्धौ द्रव्यत्वाद्यामुप्रत्ययाभावो निपातः। किमेत्तिङ

इत्यौषधिप्रस्थविलासिनीनां
शृण्वन् कथाः श्रोत्रसुखास्त्रिनेत्रः।
केयूरचूर्णीकृतलाजमुष्टिं
हिमालयस्यालयमाससाद ॥ ६९ ॥

तत्रावतीर्याच्युतदत्तहस्तः
शरद्घनाद्दीधितिमानिवोक्ष्णः।
क्रान्तानि पूर्वं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश ॥ ७० ॥

प्रकर्षे तस्य विधानादिति। [वक्ष्यति] धारयिष्यति वहतेर्लृट् ॥ ६८ ॥

इतीति। [त्रिनेत्रः] त्र्यम्बकः त्रिनेत्रत्रिनयनशब्दयोः क्षुभ्नादिषु चेति (८,४,३९पा०) णत्वाभावः [इति] इत्थम् [ओषधिप्रस्थविलासिनीनाम्] सम्बन्धिनीः [श्रोत्रसुखाः] श्रवणमधुराः [कथाः] आलापान् [शृण्वन्] [केयूरैः] अङ्गदैः [चूर्णीकृताः लाजानां मुष्टयः] यस्मिन् तं तथोक्तम्। तत्रावकीर्णाः आचारलाजाः अन्तराल एवाङ्गदैः चूर्णपेषं पिष्यन्त इति पुरन्ध्रिजनसम्बाधातिशयोक्तिः। [हिमालयस्य] हिमवतः [आलयम्] भवनम् [आससाद] ॥ ६९ ॥

तत्रेति। [तत्र] हिमवदालये [अच्युतेन] विष्णुना [दत्तहस्तः] वितीर्णहस्तावलम्बः सन् [शरद्घनात्] शरन्मेघात् शरद्विशेषणान्मेघस्य शुभ्रत्वं गम्यते। [दीधितिमान्] सूर्यः [इव] [उक्ष्णः] वृषात् [अवतीर्य] [कमलासनेन पूर्वम्] अग्रे [illegible] कक्ष्यान्तराणि गेहप्रको-

[Bengali library stamp]

तमन्वगिन्द्रप्रमुखाश्च देवाः
सप्तर्षिपूर्वाः परमर्षयश्च।
गणाश्च गिर्य्यालयमभ्यगच्छन्
प्रशस्तमारम्भमिवोत्तमार्थाः ॥ ७१ ॥

तत्रेश्वरो विष्टरभाग् यथावत्
सरत्नमर्घं मधुमच्च गव्यम्।
नवे दुकूले च नगोपनीतं
प्रत्यग्रहीत् सर्वममन्त्रवर्जम् ॥ ७२ ॥

ष्ठान्तराणि [विवेश]। "कक्ष्या कच्छे वरत्रायां काञ्च्यां गेहे प्रकोष्ठके" इति यादवः ॥ ७० ॥

तमिति। [तम्] ईश्वरम् [अन्वक्] अनुपदम् अव्ययमेतत्। "अन्वगन्वक्षमनुगेऽनुपदं क्लीवमव्ययम्" इत्यमरः। [इन्द्रप्रमुखा देवाश्च] सप्त ऋषयः पूर्वे येषान्ते [सप्तर्षिपूर्वाः]। न बहुव्रीहाविति (१,१,२९पा०) सर्वनामसंज्ञाप्रतिषेधः। [परमर्षयः] सनकादिमहर्षयश्च। सन्महत्परमोत्तमो-त्कृष्टाः पूज्यमानैरिति (२,१,६१पा०) तत्पुरुषः। [गणाः] प्रमथाश्च [उत्तमार्थाः] महाप्रयोजनानि [प्रशस्तम्] प्रकृष्टम् अमोघमित्यर्थः। आरभ्यत इति [आरम्भः] उपायः तम् [इव गिर्य्यालयम्] हिमवन्मन्दिरम् [अभ्यगच्छन्] प्राविशन्नित्यर्थः ॥७१॥

तत्रेति। [तत्र] हिमवदालये [ईश्वरो विष्टरभाक्] आसनगतः उपविष्ट इत्यर्थः। [यथावत्] यथार्हं विधिवदित्यर्थः। [सरत्नम्] रत्नसहितम् [अर्घ्यम्] अर्घार्थंजलम्। मधु

दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधदक्षैः ।
वेलासमीपं स्फुटफेनराजि-
र्नवैरुदन्वानिव चन्द्रपादैः ॥ ७३ ॥

तया प्रवृद्धाननचन्द्रकान्त्या
प्रफुल्लचक्षुः कुमुदः कुमार्य्या ।
प्रसन्नचेतःसलिलः शिवोऽभूत्
संसृज्यमानः शरदेव लोकः ॥ ७४ ॥

मधुपर्कमित्यर्थः । "दधिमधुनी सर्पिर्मध्वलाभ" इति आ-श्वलायनगृह्यसूत्रात् । [नवे दुकूले च] इति [सर्वम् अगोप-नीतम्] हिमवदानीतम् अर्घ्यादिकं मन्त्रान् वर्जयित्वा मन्त्र-वर्जं ततोनञ्समासः [अमन्त्रवर्जम्] मन्त्रान् न वर्जयित्वा इत्यर्थः द्वितीयायाञ्चेति (३,४,५३पा०) णमुल्प्रत्ययः इत्याह—न्यासकारः अनुदात्तं पदमेकवर्जमित्यत्र । [प्रत्यग्रहीत्] स्वीकृतवान् ॥ ७२ ॥

दुकूलेति । अथ [दुकूलवासाः] दुकूलं वसान इत्यर्थः । [सः] हरः [विनीतैः] अनुद्धतैः अवरोधेषु ये दक्षाः तैः [अ-वरोधदक्षैः] वधूसमीपं [निन्ये] नीतः । कथमिव [स्फुटा फेना-नाम् राजिः] यस्य सः उदकमस्यास्तीति [उदन्वान्] समुद्रः । उदन्वानुदधौ चेति (८,२,१३पा०) निपातनात्साधुः । [नवैः] अचिरोदितैः [चन्द्रपादैः] चन्द्रकिरणैः [वेलासमीप-मिव] ॥ ७

तयोः समापत्तिषु कातराणि
किञ्चिद्व्यवस्थापितसंहृतानि ।
ह्रीयन्त्रणां तत्क्षणमन्वभूव-
नन्योन्यलोलानि विलोचनानि ॥ ७५ ॥
तस्याः करं शैलगुरूपनीतं
जग्राह ताम्राङ्गुलिमष्टमूर्त्तिः ।

आननचन्द्रस्य कान्तिः यस्यास्तया तथोक्तया [तया कुमार्या शरदा लोक इव संसृज्यमानः] सङ्गच्छमानः [शिवः] [चक्षूंषि कुमुदानि इव तानि [प्रफुल्लानि] यस्य सः तथोक्तः चेतः सलिलमिव तत्-प्रसन्नं यस्य सः तथोक्तः [प्रसन्नचेतः सलिलोऽभूत्] । शरल्लोकयोरपि यथोचित विशेषणानि योज्यानि ॥ ७४ ॥

तयोरिति । [तयोः] वधूवरयोः [समापत्तिषु] यदृच्छया सङ्गतिषु [कातराणि चकितानि । "अधीरे कातरे" इत्यमरः । दृष्टुमसमर्थानीति भावः । [किञ्चित्] ईषत् व्यवस्थापितानि स्थिरीकृतानि पश्चात् संहृतानि निवर्त्तितानि चेति [व्यवस्थापितसंहृतानि] । पूर्वकालेत्यादिना (२,१,४९ पा०) तत्पुरुषः [अन्योऽन्यस्मिन् लोलानि] सतृष्णानि । "लोलश्चलसतृष्णयोः" इत्यमरः । [विलोचनानि दृष्टयः] तत् क्षणम् तस्मिन् क्षणे [ह्रीयन्त्रणाम्] ह्रिया निमित्तेन सङ्कोचम् [अन्वभूवन्] ॥ ७५ ॥

तस्या इति । [अष्टमूर्त्तिः] शिवः तस्मादीश्वराच्छ्रुत

उमातनौ गूढतनोः स्मरस्य
तच्छङ्किनः पूर्वमिव प्ररोहम् ॥ ७६ ॥

रोमोद्गमः प्रादुरभूदुमायाः
स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत् ।
वृत्तिस्तयोः पाणिसमागमेन
समं विभक्तेव मनोभवस्य ॥ ७७ ॥

शरीरे [गूढतनोः] गुप्तशरीरस्य [स्मरस्य पूर्वम्] [प्ररोहमिव] प्रथमाङ्कुरमिव स्थितम् शैलगुरूपनीतं [शैलगुरुणा] हिमवता उपनीतं प्रापितम्। अथवा शैलगुरुणा हिमवत्पुरोधसा [उपनीतम्] [ताम्राङ्गुलिम्] रक्ताङ्गुलिं [तस्याः] पार्वत्याः [करं जग्राह] ॥ ७६ ॥

रोमोद्गमेति। [उमायाः रोमोद्गमः] रोमाञ्चः [प्रादुरभूत्]। पुमान् गौः पुङ्गवः वृषभः। गोरतद्धितलुकीति (५, ४,९२,पा०) टच्। सः केतुः चिह्नं यस्य सः [पुङ्गवकेतुः] शिवः [स्विन्नाङ्गुलिरासीत्]। अत्रोत्प्रेक्षते [पाणिसमागमेन] पाण्योः संस्पर्शेन कर्त्रा [तयोः] वधूवरयोः [मनोभवस्य वृत्तिः] अवस्थितिः [समं विभक्तेव] समीकृतेवेत्यर्थः। प्राक्सिद्धस्याप्यनुरागसाम्यस्य सम्प्रति तत्कार्यदर्शनात् पाणिसंसर्गकृतत्वमुत्प्रेक्ष्यते। ननु कन्या तु प्रथमसङ्गमे स्विन्नकरचरणा भवति पुमांस्तु रोमाञ्चितो भवतीति वात्स्यायनेन विपरीतमुक्तमिति चेत् नैष दोषः एभिरनयोर्लाभं परीक्षेतेति वाक्ये एभिरिति बहुवचनेन स्वेदरोमाञ्चग्रहणस्य सकलसात्त्वि-

प्रयुक्तपाणिग्रहणं यदन्य-
द्वधूवरं पुष्यति कान्तिमग्र्याम् ।
सान्निध्ययोगादनयोस्तदानीं
किं कथ्यते श्रीरुभयस्य तस्य ॥ ७८ ॥

प्रदक्षिणप्रक्रमणात् कृशानो-
रुदर्चिषस्तन्मिथुनं चकाशे ।
मेरोरुपान्तेष्विव वर्त्तमान-
मन्योन्यसंसक्तमहस्त्रियामम् ॥ ७९ ॥

अन्यथाभिधानात् स्वोक्तिविरोध इत्यपास्तम् । तदेतत् रघुवंशसञ्जीवन्यां सुव्यक्तमवोचम् सात्त्विकास्तु "स्तम्भप्रलयरोमाञ्चाः स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्त्तिताः" इति ॥ ७७ ॥

प्रयुक्तेति । [यत्] यस्मात्कारणात् [प्रयुक्तं पाणिग्रहणम्] यस्य तत्तथोक्तम् [अन्यत् ।] लौकिकम् वधूश्च वरश्च [वधूवरम्] समाहारे द्वन्द्वैकवद्भावः । [तदानीम्] पाणिग्रहणकाले [अनयोः] उमागिरिशयोः [सान्निध्ययोगात्] सन्निधिभावात् [अग्र्याम्] उत्तमाम् [कान्तिम्] शोभाम् [पुष्यति] पुष्णाति [तस्योभयस्य] उमामहेश्वरात्मकस्य मिथुनस्य [श्रीः किम् ? कथ्यते] अनुप्रवेशादन्यस्य शोभालाभः तस्य शोभा किम् ? वक्तव्येत्यर्थः । "विवाहसमये गौरीशिवौ वधूवरावनुप्रविशेताम्" इत्यागमः ॥ ७८ ॥

तौ दम्पती त्रिः परिणीय वह्नि-
मन्योन्यसंस्पर्शनिमीलिताक्षौ ।
स कारयामास वधूं पुरोधा-
स्तस्मिन् समिद्धार्चिषि लाजमोक्षम् ॥८०॥

सा लाजधूमाञ्जलिमिष्टगन्धं
गुरूपदेशाद्वदनं निनाय ।

[कृशानोः] कर्मणः [प्रदक्षिणप्रक्रमणात्] प्रदक्षिणीकरणात् [चकाशे।] किमिव [मेरोरुपान्तेषु] परिसरेषु [वर्त्तमानम्] आवर्त्तमानं मेरुं प्रदक्षिणीकुर्वदित्यर्थः। [अन्योन्येन संसक्तम्] सङ्गतं मिथुनस्याप्येतत् विशेषणम्। अहश्च त्रियामा च [अहस्त्रियामम्] रात्रिन्दिवम् [इव] समाहारे द्वन्द्वैकवद्भावः ॥ ७९॥

ताविति। [सः] पुरस्तादेव हितं विधत्ते इति [पुरोधाः] पुरोहितः [अन्योन्यस्य संस्पर्शेन] स्पर्शसुखेन [निमीलिताक्षौ तौ] जाया च पतिश्च [दम्पती] कर्मभूतौ। जायाशब्दस्य (२,२,३१ ग०सू०) दम्भावो निपातितः। [वह्निं त्रिः] त्रिवारम्। "द्वित्रिचतुर्भ्यः सुजिति" (५,४,१८पा०) सुच् [परिणीय] परितो नीत्वा प्रदक्षिणीकार्य्येत्यर्थः। नयति-र्द्विकर्मकाल्ल्यप् [समिद्धार्चिषि] दीप्तज्वाले [तस्मिन्] वह्नौ [वधूं लाजमोक्षम्] लाजविसर्गम् [कारयामास]। हृक्रोरन्यतरस्यामिति (१,४,५३ पा०) विकल्पादणिकर्तुः कर्मत्वम् ॥ ८०॥

कपोलसंसर्पिशिखः स तस्या
मुहूर्त्तकर्णोत्पलतां प्रपेदे ॥ ८१ ॥
तदीषदार्द्रारुणगण्डलेख-
मुच्छ्वासिकालाञ्जनरागमक्ष्णोः ।
वधूमुखं क्लान्तयवावतंस-
माचारधूमग्रहणाद्बभूव ॥ ८२ ॥
वधूं द्विजः प्राह तवैष वत्से !
वह्निर्विवाहं प्रति कर्मसाक्षी ।

[इष्टः] घ्राणतर्पण इत्यर्थः [गन्धः] यस्य तं [लाजधूमाञ्जलिम्] वदनं निनाय ।] [कपोलसंसर्पिणी शिखा] यस्य सः तथोक्तः [स] धूमः [तस्याः] गौर्य्याः [मुहूर्त्तकर्णोत्पलतां प्रपेदे ।] धूमस्य विसृमरत्वात् मुहूर्त्तग्रहणम् ॥ ८१ ॥

तदिति । [तत्] वधूमुखम् [आचारधूमग्रहणात्] आचारप्राप्तधूमत्वात् [ईषदार्द्रे] स्विन्ने [अरुणे] च [गण्डलेखे] गण्डस्थले यस्य तत्तथोक्तम् [अक्ष्णोः] [उच्छ्वासी] उद्गच्छन् [कालाञ्जनस्य रागः] अञ्जनं यस्य तत्तथोक्तम् [क्लान्तो यवावतंसः] यवाङ्कुरकर्णपूरो यस्य तत्तथाभूतम् [बभूव ।] "लाजाञ्जलिं विसृज्य धूमाग्रं जिघ्रेत्" इति प्रयोगवृत्तिकारः ॥ ८२ ॥

वधूमिति । अथ [वधूं द्विजः] पुरोधाः [प्राह ।] किमिति हे [वत्से ! एष वह्निः तव विवाहं प्रति] विवाहकर्मणी-

शिवेन भर्त्रा सह धर्मचर्य्या
कार्य्या त्वया मुक्तविचारयेति ॥ ८३ ॥

आलोचनान्तं श्रवणे वितत्य
पीतं गुरोस्तद्वचनं भवान्या ।
निदाघकालोल्वणतापयेव
माहेन्द्रमम्भः प्रथमं पृथिव्या ॥ ८४ ॥

ध्रुवेण भर्त्रा ध्रुवदर्शनाय
प्रयुज्यमाना प्रियदर्शनेन ।

[मुक्तविचारया] निर्विचारया [त्वया धर्मचर्य्या] धर्माचरणम् [कार्य्या] कर्त्तव्येति । अयञ्च प्राजापत्यविवाहो द्रष्टव्यः । यथाह आश्वलायनः "सहधर्मञ्चरेति प्राजापत्य" इति ॥ ८३ ॥

आलोचनान्तमिति । भवस्य पत्नी [भवान्या ।] इन्द्रवरुणभवशर्वरुद्रेत्यादिना (४,१,४८ पा०) ङीप् आनुगागमश्च । [आलोचनान्तम्] नेत्रान्तपर्य्यन्तम् आङ्मर्य्यादाभिविध्योः (२,१,१३ पा०) इत्यव्ययीभावः । [श्रवणे] श्रोत्रे [वितत्य] विस्तार्य्य [तत् पूर्वोक्तम् गुरोः] याजकस्य [वचनम्] सह धर्मं चरेति वाक्यम् [निदाघकाले] ग्रीष्मकाले [उल्वणतापया] उत्कटसन्तापया [पृथिव्या] [प्रथमम्] आद्यम् [माहेन्द्रम्] पार्जन्यम् [अम्भ इव पीतम्] अत्यादरेण [illegible] ॥ ८४ ॥

धाद्दृष्ट इत्याननमुन्नमय्य
ह्रीसन्नकण्ठी कथमप्युवाच ॥ ८५ ॥
इत्थं विधिज्ञेन पुरोहितेन
प्रयुक्तपाणिग्रहणोपचारौ ।
प्रणेमतुस्तौ पितरौ प्रजानां
पद्मासनस्थाय पितामहाय ॥ ८६ ॥
वधूर्विधात्रा प्रतिनन्द्यते स्म

नेन ध्रुवेण] शाश्वतेन [भर्त्रा] [ध्रुवस्य] नक्षत्रविशेषस्य [दर्श-नाय ।] "ध्रुवो भभेदे क्लीवन्तु निश्चिते शाश्वते त्रिषु" इत्य-मरः । [प्रयुज्यमाना] दृश्यतामिति प्रेर्यमाणा [ह्रीसन्न-कण्ठी] ह्रिया हीनस्वरा [सा] वधूः [कथमपि आननमुन्न-मय्य दृष्ट इत्युवाच] ॥ ८५ ॥

इत्थमिति । [इत्थम्] अनेन प्रकारेण । इदमस्थमुरिति (५,३,२४ पा०) थमुप्रत्ययः । [विधिज्ञेन] विवाहप्रयोगज्ञेन शास्त्रज्ञेनेत्यर्थः । [पुरोहितेन] हैमवतेन [प्रयुक्तपाणिग्रहणो-पचारौ] कृतविवाहकर्माणौ [प्रजानां पितरौ तौ] उमामहे-श्वरौ [पद्मासनस्थाय] पद्मासनोपविष्टाय पितृणां पित्रे [पि-तामहाय] ब्रह्मणे । "पितामहो विरिञ्चौ स्याज्जातस्य जन-केऽपि च" इति विश्वः । पितृव्यमातुलमातामहपितामहा इति (४,२,३६ पा०) निपातनात्साधुः । [प्रणेमतुः] नमश्च-क्रतुः । पितामहस्य पित्रोरपि पूज्यत्वादिति भावः ॥ ८६ ॥

वधूरिति । [वधूः] कन्या [विधात्रा] ब्रह्मणा हे [कल्य-

कल्याणि ! वीरप्रसवा भवेति ।
वाचस्पतिः सन्नपि सोऽष्टमूर्त्तौ
त्वाशास्य चिन्तास्तिमितो बभूव ॥ ८७ ॥
क्लृप्तोपचारां चतुरस्रवेदीं
तावेत्य पश्चात् कनकासनस्थौ
जायापती लौकिकमेषणीय
मार्द्राक्षतारोपणमन्वभूताम् ॥ ८८ ॥
पत्रान्तलग्नैर्जलबिन्दुजालै-

णि !] शोभने ! वीरः प्रसवोऽपत्यं यस्याः सा [वीरप्रसवा] वीरसूः [भवेति प्रतिनन्द्यते स्म] आशिषमुक्तेत्यर्थः । [सः] विधाता [वाचस्पतिः] वागीश्वरः [अपि सन् ।] कस्कादिषु (८,३,४८ पा०) पाठात्साधुः [अष्टमूर्त्तौ] शिवे [तु] [आशास्यम्] आकाङ्क्ष्यं तत्र [चिन्ता] विचारः तस्याम् [स्तिमितः] मन्दः [बभूव ।] तस्य निरीहस्याशास्याभावादाशिषि स्तिमितत्वमित्यर्थः ॥ ८७ ॥

क्लृप्तेति । तौ [जायापती] वधूवरौ [पश्चात्] नमस्कारानन्तरम् [क्लृप्ताः] [रचिताः] [उपचाराः] पुष्परचनादयो यस्याम् [तां चतुरस्रवेदीम् एत्य] प्राप्य [कनकासनस्थौ] सन्तौ [लौकिकम्] लोके विहितम् आचारप्राप्तमित्यर्थः । अतएव [एषणीयम्] आशास्यम् । "तथापि लौकिकाचारं मनसापि न लङ्घयेत्" इतिशास्त्रादवश्यकर्त्तव्यमित्यर्थः । इषेरिच्छार्थत्वात् [illegible] फलम् । [आर्द्राक्षतारोपणम् अन्वभूताम् ।]॥८८॥

राकृष्टमुक्ताफलजालशोभम् ।
तयोरुपर्य्यायतनालदण्ड
माधत्त लक्ष्मीः कमलातपत्रम् ॥ ८९ ॥
द्विधा प्रयुक्तेन च वाङ्मयेन
सरस्वती तन्मिथुनं नुनाव ।
संस्कारपूतेन वरं वरेण्यं
वधूं सुखग्राह्यनिबन्धनेन ॥ ९० ॥

पत्रान्तेति । [लक्ष्मीः] श्रीदेवी [पत्रान्तेषु] दलप्रान्तेषु [लग्नैर्जलबिन्दुजालैः] [आकृष्टा आहृता मुक्ताफलजालेन] प्रान्तलम्बिना मुक्ताकलापेन या [शोभा] सा येन तत्तथोक्तम् [आयतम्] दीर्घम् [नालम्] इव [दण्डः] यस्य तत् [कमलम्] एव [आतपत्रम्] तत् [तयोः उपरि आधत्त] दधौ ॥ ८९ ॥

द्विधेति । अथ [सरस्वती] वाग्देवी [द्विधा] संस्कृतप्राकृतरूपेण द्वैविध्येन [प्रयुक्तेन] उच्चारितेन [वाङ्मयेन] शब्दजालेन [तन्मिथुनं नुनाव] तुष्टाव । णु स्तुताविति धातोर्लिट् । केन ? कमित्याह संस्कारेति [संस्कारेण] शास्त्रव्युत्पत्त्या [पूतेन] प्रकृतिप्रत्ययविभागशुद्धेन संस्कृतेनेत्यर्थः [वरेण्यम्] वरणीयं श्लाघ्यमित्यर्थः । वृणोतेरौणादिकः (वृञएन्य इति ३,९८सू०) एन्यप्रत्ययः । [वरम्] वोढारं शिवम्, [सुखेन ग्राह्यम्] सुबोधम् [निबन्धनम्] रचना यस्य तेन वाङ्मयेन प्राकृतभाषयेत्यर्थः [वधूम्], नुनावेत्यनेन सम्बन्धः ॥ ९० ॥

तौ सन्धिषु व्यञ्जितवृत्तिभेदं
रसान्तरेषु प्रतिबद्धरागम् ।
अपश्यतामप्सरसां मुहूर्त्तं
प्रयोगमाद्यं ललिताङ्गहारम् ॥ ८१ ॥

ताविति । [तौ] दम्पती [सन्धिषु] मुखादिनिर्वहणान्तेषु पञ्च सन्धिषु । तदुक्तं दशरूपके । "मुखं प्रतिमुखं गर्भः सावमर्षोपसंहृतिः" इति । [व्यञ्जितवृत्तिभेदम्] स्फुटीकृतकौशिक्यादिवृत्तिविशेषम् रसानुगुण्येनेति शेषः । तदुक्तं भूपालेन "कौशिकी स्यात्तु शृङ्गारे रसे वीरे तु सात्वती । रौद्रबीभत्सयोर्वृत्तिर्नियतारभटी पुनः । शृङ्गारादिषु भावज्ञैः रसेष्विष्टा तु भारती ।" तथा । "कौशिक्यारभटी चैव सात्वती भारती तथा । चतस्रोवृत्तयोज्ञेयास्तासु नाट्यं प्रतिष्ठितम्" इति । [रसान्तरेषु] शृङ्गारादिरसभेदेषु" "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस" इत्यमरः । "शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुतशान्ताख्याः रसाः पूर्वैरुदाहृता" इति [प्रतिबद्धरागम्] प्रतिनियमेन प्रवर्त्तितः वसन्तललितादिरागो यस्मिन् तम्, यस्मिन् रसे योरागो विहितस्तदनुसारेण प्रयुक्तरागमित्यर्थः । यथा कोहलः । "रौद्रेऽद्भुते तथा वीरे पुंरागेण प्रगीयते । शृङ्गारहास्यकरुणाः स्त्रीरागेण प्रकीर्त्तिताः । भयानके च बीभत्से शान्ते गेयो नपुंसके" इति । [ललिताङ्गहारम्] मधुराङ्गविक्षेपम् "अङ्गहारोऽङ्गविक्षेप" इत्यमरः । आदौ भव

देवास्तदन्ते हरमूढभार्य्यं
किरीटबद्धाञ्जलयो निपत्य ।
शापावसाने प्रतिपन्नमूर्त्ते-
र्ययाचिरे पञ्चशरस्य सेवाम् ॥ ९२ ॥

तस्यानुमेने भगवान् विमन्यु-
र्व्यापारमात्मन्यपि सायकानाम् ।
कालप्रयुक्ता खलु कार्य्य(काल)विद्भि-
र्विज्ञापना भर्तृषु सिद्धिमेति ॥ ९३ ॥

करणादीनां नाटकं प्रकृतिं बुधा" इति । [अप्सरसाम्] वेश्यादीनाम् प्रयुज्यत इति [प्रयोगः] रूपकं नाटकमित्यर्थः ाद्यमिति विशेषणात् । तम् [मुहूर्त्तमपश्यताम्] दृष्टवन्तौ । प्राधान्ये त्यादिना (७,३,७८पा०) दृशेः पश्यादेशः ॥९१॥

देवा इति । [देवाः] इन्द्रादयः [तदन्ते] तस्य प्रयोगदर्शन-ान्ते अवसाने [ऊढभार्य्यम्] परिणीतदारम् [हरम्] [किरी-] बद्धाः अञ्जलयः] येषान्ते तथोक्ताः सन्तः [निपत्य] प्रणम्य ापावसाने प्रतिपन्नमूर्त्तेः] लब्धशरीरस्य "परिणेष्यति र्वतीं यदेत्यादिना" शापस्य पार्वतीपरिणयान्तत्वा-त्यर्थः । [पञ्चशरस्य] कामस्य कर्त्तुः [सेवां ययाचिरे पुनः मासादितशरीरस्य तस्य सेवा स्वीक्रियतामिति प्रार्थया-सुरित्यर्थः दुह्याच्पचित्यादिना द्विकर्मकत्वम् ॥ ९२ ॥

तस्येति । [विमन्युः] विगतक्रोधः [भगवान्] ईश्वरः

अथ विबुधगणांस्तानिन्दुमौलिर्विसृज्य
क्षितिधरपतिकन्यामाददानः करेण।
कनकक़लसयुक्तं भक्तिशोभासनाथं
क्षितिविरचितशय्यं कौतुकागारमागात्॥

मेने तथाहि [कार्य्यविद्भिः] कार्यज्ञैः अथ वा [कालविद्भिः] अवसरज्ञैः [काले] योग्यावसरे [प्रयुक्ता] अनुष्ठिता [भर्तृषु] स्वामिषु विषये [विज्ञापना] [सिद्धिमेति खलु] सफला भवतीत्यर्थः। अयमेवास्य स्मरसेवास्वीकारः यदात्मन्यपि तत्सायकव्यापारम् अङ्गीकृतवानिति॥ ९३॥

अथेति। [अथेन्दुमौलिः] ईश्वरः [तान् विबुधगणान् विसृज्य] [क्षितिधरपतिकन्याम्] पार्वतीम् [करेण आददानः] [कनककलसयुक्तम्] मङ्गलार्थमन्तर्निहितहेममयपूर्णकुम्भम् [भक्तयः] पुष्पादिरचनाः तासाम् [शोभया सनाथम्] सहितमित्यर्थः। [क्षितिविरचितशय्यम्] क्षितौ विरचिता स्थण्डिले कल्पिता शय्या तल्पं यस्मिन् तत्तथोक्तम्। [कौतुकागारमागात्] शय्यागृहं जगाम। अत्राश्वलायनः। "अत ऊर्द्ध्वमक्षारलवणाशिनावधः शायिनौ ब्रह्मचारिणौ स्याताम्" इति। अतऊर्द्ध्वं विवाहादूर्द्ध्वम् आत्रिरात्रादिति शेषः "त्रिरात्रं द्वादशरात्रं वा" इति वचनात्। तथा कामशास्त्रेऽपि "अथ परिणयरात्रौ प्रक्रमेणैव किञ्चित्तिसृषु च रजनीषु स्तब्धभावा दुनोति। त्रिदिवसमिह न भिन्द्याद् ब्रह्मचर्यं न चास्याः [illegible] नर्म कुर्य्यात्"

